In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत-अकाडमी-षष्ठ्यब्दग्रन्थमाला - 12

महाकविकालिदासविरचितम्

विक्रमोर्वशीयं नाम नाटकम्

(रत्नदीपिकापराख्यया मृत्युञ्जयभूपालीयया व्याख्यया संवलितम्)

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः
आचार्य के नीलकण्ठम्
निदेशकः

सम्पादकौ परियोजना-अनुसन्धातारौ च
डा वि सुब्रह्मण्यम् उपनिदेशकः
डा जोशी सन्तोषकुमारः शोधसहायकः

संस्कृत अकाडमी
(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)
उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07
2022

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत-अकाडमी-षष्ठ्यब्दग्रन्थमाला - 12

महाकविकालिदासविरचितम्

विक्रमोर्वशीयं नाम नाटकम्

(रत्नदीपिकापराख्यया मृत्युञ्जयभूपालीयया व्याख्यया संवलितम्)

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः
आचार्य के नीलकण्ठम्
निदेशकः

सम्पादकौ परियोजना-अनुसन्धातारौ च
डा वि सुब्रह्मण्यम्, उपनिदेशकः
डा जोशी सन्तोषकुमारः, शोधसहायकः

संस्कृत अकाडमी
(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)
उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07
2022

In Public domain. Digitization Muthulakshmi Research Academy

Vikramorvaśīyaṃ Nāma Nāṭakam
(Re-printing of rare book project)
This Publication is published with the financial support under Ashtadashi Scheme of Rashtriya Sanskrit Sansthan, New Delhi)

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sansthan
Osmania University Campus,
Hyderabad – 500 007

Contact of Sales In charge:
+919866498906

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Data entry
Dr. Nagendra

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Vikramorvaśīyaṃ Nāma Nāṭakam
ISBN – 978-93-80171-67-8

© Sanskrit Academy

Year	:	2022
Copies	:	300
Pages	:	xi+239
Price	:	Rs 400
		$ 40

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Shashtyabda Granthamala - 12

Mahākavi Kālidāsaviracitam

Vikramorvaśīyaṃ Nāma Nāṭakam

(Ratnadīpikāparākhyayā mṛtyuñjayabhūpālīyayā vyākhyayā saṃvalitam)

(Published under 'Re-printing rare books project' of Ashtadashi Scheme of Central Sanskrit University, New Delhi)

Chief Editor
Prof K Neelakantham
Director

Editors and Project Investigators
Dr. V. Subrahmanyam, Deputy Director
Dr. Joshi Santosh Kumar, Research Assistant

Sanskrit Academy
Adarsha Shodha Sansthan
(Recognised by Central Sanskrit University, New Delhi)
Osmania University Campus, Hyderabad – 500 007
2022

In Public domain. Digitization Muthulakshmi Research Academy

Vikramorvaśīyaṃ Nāma Nāṭakam
(Re-printing of rare book project)
This Publication is published with the financial support under Ashtadashi Scheme of Rashtriya Sanskrit Sansthan, New Delhi)

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sansthan
Osmania University Campus,
Hyderabad – 500 007

Contact of Sales In charge:
+919866498906

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Data entry
Dr. Nagendra

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Vikramorvaśīyaṃ Nāma Nāṭakam
ISBN – 978-93-80171-67-8

© Sanskrit Academy

Year	:	2022
Copies	:	300
Pages	:	xi+239
Price	:	Rs 400
		$ 40

In Public domain. Digitization Muthulakshmi Research Academy

PREFACE

॥ ओं श्री गुरुभ्यो नमः ॥

॥ श्रीशङ्करभगवत्पादाः विजयन्ते ॥

We have recently published Kalidasa's **AbhijnAna Shakuntalam** a critical edition with the commentary **PurNachandrika** written by Sri Mrutyunjaya Nisshanka BhupAla. And now bringing out another drama **Vikramorvasheeyam** of Kalidasa with a commentary **Ratnadeepikaa** authored by the same scholar. This book was originally published first in Telugu script by वर्तमानतरङ्गिणी मुद्राक्षरशाला, चेन्नपुरी (Vartamaanatarangini Mudraksharashala, Chennapuri) in the year 1878.

This Mrutyunjaya Nisshanka BhupAla was said to have belonged to *Sangamavalasa Samsthanam*, (सङ्गमवलससंस्थानम्) which is located near Vishakhapattanam and Parvatipuram of Andhra Pradesh. This BhupAla was son of Peddanna Nisshanka and Sanyaasaamba. Mrutyunjaya Nisshanka, with the help of his maternal uncle, went to Vishakhapattanam in his childhood and learnt many Shastras under a revered Scholar Mahamahopadhyaya Sriman Paravastu Venkata Rangacharyulu. He gained mastery over several languages like Sanskrit, Telugu, and English and also mastered the Shastras like Sahitya, Nyaya, Vyakarana in addition to Astrology, Medicine, Architecture, Music and some other arts. (Nisshankacharitam of Sriman Venkata Rangacharyulu, verses No.51, 59, 60)

Mrutyunjaya Nisshanka was a great poet and commentator in both Telugu and Sanskrit. He wrote 10 Kavyas and one drama in Telugu. He has written Sanskrit commentary on all the three dramas of Kalidasa and also composed

In Public domain. Digitization Muthulakshmi Research Academy

Neetishasrtasangraha: a Sanskrit poem in hundred slokas. He has shown his great regards for legendary poet Kalidasa by starting Neetishastrasangraha with a sloka क्व नीतिशास्त्रविज्ञानं क्व मतिश्चाल्पसङ्गतिः that is similar to क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः of Raghuvamsha. The commentary on three dramas of Kalidasa was very famous in that region and scholars used to call them as "Sangamavalasa Vyaakhyaanas".

And now, when we made a study on the commentaries of Vikramorvasheeyam, it has six ancient and nine modern commentaries. The lists of all these is given here.

Ancient Commentaries

1.	Kaataya Cemana	Kumaaragiriraajeeya	Published
2.	Ranganatha	Prakaashika	Published
3.	Konesheara	Koneshwari/Viveka	Published
4.	Raamamaayaa	-	Unpublished
5.	Ghanashyama	Vikramrvashiya Vyakhya	Unpublished
6.	Abhirama	Vyaakhyaa	Unpublished

Modern Commentaries

1.	AbhyacharaNa	Vikramorvashiya Vyakhya	Published 1872
2.	Jivananda Vidyasagara	Tika	Published 1873
3.	Mrityunjaya Nisshanka Bhupale	Ratnadeepika	Published 1878
4.	M. R. Kale	Arthaprakashika	Published 1898
5.	Aashanandavarman	Tika (Sanskrit-Hindi)	Published 1926
6.	Chakradhara Shastry	Chandrakala	Published 1926
7.	Surendranatha Shastry	Kalpalataa	Published 1942
8.	Ramachandra Mishra	Prakasha (Sanskrit-Hindi)	Published 1953
9.	Vindhyeshwariprasad Mishra	Vinoda (Sanskrit-Hindi)	Published 1984

In Public domain. Digitization Muthulakshmi Research Academy

Among these Sanskrit Academy has already published this drama with three commentaries प्रकाशिका, कुमारगिरिराजीय, कोणेश्वरी in 1966. Apart from these Fifteen three more commentaries were also written on this highlighting the Prakrit passages.

Mrutyunjaya Nisshanka BhupAla in the beginning of **Ratnadeepikaa** of **Vikramorvasheeyam** made it clear that his commentary is to benefit all - "कवीन् श्री कालिददासाद्यान् अभिवन्द्य गुरूनपि। सर्वेषां सुखबोधार्थं कुर्वे श्रीरत्नदीपिकाम्". He says that it is written in easy and understandable Sanskrit only to facilitate all the Sanskrit lovers. Studying carefully the whole commentary we have observed that Mrutyunjaya Nisshanka BhupAla has taken utmost care to explain the graceful language of Mahakvi Kalidasa. He quoted Koshas and Panini's sutras abundantly in the commentary for the convenience of the learners. Sri Akella Venkata Shastry, a versatile scholar opined that the two आक्षेप and समाधान from six fold definitions of Vyaakhyana "पदच्छेदः पदार्थोक्तिः विग्रहो वाक्ययोजना। आक्षेपोऽथ समाधानं व्याख्यानं षड्विधं मतम्" are not taken in the commentaries of Mrutyunjaya Nisshanka BhupAla since his aim itself was to write a very simple commentary to the learners of Sanskrit Dramas of Mahakavi Kalidasa.

Mrutyunjaya Nisshanka BhupAla also wrote **Vibudharanjani** on Malavikagnimitram and all these three commentaries he wrote on the advice of David Fremantle Carmichael, honourable member of Madras Legislative Council during 1873 to 1875 in the first provincial legislature for Madras Presidency. (P. No 486, Aandhra Samsthanamulu-Sahityaposhanamu by Tumati Donappa). Basing on this it can be inferred that these commentaries were composed during

In Public domain. Digitization Muthulakshmi Research Academy

1873 to 1875. Appreciating the three Sanskrit commentaries, the president of Royal Asiatic Society, King Edward VII has honoured Mrutyunjaya Nisshanka BhupAla with a membership in the society (P. No 160, Nisshankacharitamu).

Coming to the publication of this work, I appreciate the sincere efforts of Dr. V. Subrahmanyam, Deputy Director, and Dr. Joshi Santosh Kumar, research assistant of the academy; they have made a thorough study of this विक्रमोर्वशीयम् with रत्नदीपिका. I congratulate both of them. I thank Dr. K. Varalakshmi, Dy. Director and Mr. K. V. Suryaprakash, research assistant in the academy for their encouragement and valuable suggestions at every moment.

My sincere thanks to Prof. Srinivasa Varkhedi Honourable Vice-chancellor and Prof. Ranjit kumar Barman, Registrar I/c, Central Sanskrit University, New Delhi (formerly Rashtriya Sanskrit Sansthan) who were kind enough in allotting this project of reprinting of rare books to Sanskrit Academy, It is a pleasure to acknowledge the motivation of Prof. D. Ravinder, Honourable Vice-chancellor Osmania University in the publications and all round development of Sanskrit Academy.

I, on behalf of Sanskrit Academy, offer my sincere thanks to Karshak Art Printers Vidyanagar Hyderabad for printing this book elegantly.

We humbly welcome the suggestions if any from the scholars for further improvement of the book.

Prof. K. Neelakantham
Director

In Public domain. Digitization Muthulakshmi Research Academy

आमुखम्

व्याख्यातृपरिचयः

आन्ध्रप्रदेशतेलङ्गाणप्रान्तयोः महान्तो मूर्धन्याः तेलुगुदेशीयाः संस्कृतकवयः, व्याख्यातारः बहवो विलसन्ति। अमीषु चतुष्पञ्चशो विदुषो विहाय अन्ये संस्कृतजगति अप्रसिद्धाः। कारणं तावत् तेषां संस्कृतकृतयः तेलुगुलिप्या मुद्रिताः। अतस्ताः कृतयः तेलुगुदेशे एव प्रचुरं प्राचुर्यं लेभिरे। तादृशान् मूर्धन्यान् परिचाययितुं संस्कृतपरिषदा अष्टादशीति परियोजनान्तर्गतत्वेन दुर्लभग्रन्थपुनर्मुद्रणम् आरब्धम्।

नाटकस्यास्य व्याख्याकृत् श्रीमान् मृत्युञ्जयनिश्शङ्कभूपालो नाम। विजयनगरस्य 'सङ्गमवलस' संस्थानीयोऽयम्। कदाचित् 18 शतकस्य आदिमकाले विभिन्नैः कारणैः संस्थानात् च्युतः सन् व्याख्यातुः पिता पेद्दननिश्शङ्कः बोब्बिलिराजस्य आश्रयं प्रार्थितवान्, लब्धवाँश्च। तत्रैव कृतिव्याख्याकर्ता पेद्दननिश्शङ्क–सन्यासाम्बा–दम्पत्योः द्वितीयापत्यत्वेन जन्म अलभत। एषः यदा मातुः गर्भे आसीत् तदैव दुर्भाग्यात् पिता दिवम्प्रयातः। तदग्रेऽयं बोब्बिलिराजस्य पर्यवेक्षणे परिपोषितोऽभवत्।[1] ततः परं तस्य मातुलेन विद्याविनयकोविदेन मेदिनीरायनरसिंहराजेन सह विशाखपट्टणं प्रयाय आङ्ग्लान्ध्रभाषयोः प्रावीण्यं प्राप्नोत्। तत्रैव महामहोपाध्यायानां परवस्तु वेङ्कटरङ्गाचार्याणां सान्निध्ये संस्कृतग्रन्थान् अधीयाय। 1847 तमे वर्षे अयं भूस्वामी (अधिनायकः) बभूव। स्वकीये भूस्वाम्ये बहून् कवीन् विदुषः च पर्यपूपुषयत्।

---

1 ఆపన్ను సంగవమవలస భూపతి నిశ్శంకనృపతి మును గదుఁ గరుణన్
గాపాడెను రాయఁడపక్ష్మాపాలవరుండు కొంతకాలము దనుకన్ – అవతారిక
(ప్రపతనపారిజాతము)

In Public domain. Digitization Muthulakshmi Research Academy

"श्रौतप्रयोगेषु स्मार्तक्रियासु च प्रावीण्यं प्राप्य भेदाभेदवादनिपुणया प्रतिभया वेदान्तप्रसङ्गान् अकार्षीत्। यमनियमासनादि–योगान्तरङ्गसारान् सारल्येन पपौ। स्वाधीनशक्तिरयं नीतिशास्त्रग्रन्थनिर्माता बभूव। वैद्यविद्यायां नैपुण्यं लब्धा दीनानां सेवां चकार। ज्योतिर्वद्भूत्वा शुभाशुभफलनिरूपणम् अकार्षीत्। शिल्पविज्ञानविशेषज्ञाता, विविधरत्नपरीक्षाप्रविवेकबुद्धिरयं श्रीमान् निश्शङ्कभापालो विजयतेतराम्" इति श्रीमान् परवस्तु वेङ्कटरङ्गाचार्यः स्वीये श्रीमन्निश्शङ्कचरितमित्याख्ये ग्रन्थे लिलेख।[2]

मृत्युञ्जयस्य मातुलः सङ्गमवलसतः क्रोशमिते दूरे दुर्गमेकं निर्माय मृत्युञ्जयनिगरमिति नाम चकार। अदः नगरं स्वीये भूस्वाम्ये मुख्यं नगरमासीत्। तत् नगरं परितः विद्यामानेषु देव–ब्राह्मणसम्पत्तिरूपेण लब्धेषु बहुषु ग्रामेषु मन्दिर–वापी–कूप–तटाकादीन् निर्माय तत्रस्थप्रजाः धर्मेण पर्यपीपलत्, परिपुपोष च।[3]

राजशेखरविलासः, गौरीविवाहः, श्रीसूर्यनारायणचरितम्, दशावतारनाटकम्, पारिजातम्, हिल्–भूस्वामिचरितम्, भूमिपालकविधिदर्पणम्, कार्मेकिल्–गुणप्रकाशसूक्तिरत्नावलिः, मानसबोधश्रीशम्भुशतकम्, भल्लाणचरितम्, गुम्पसोमेश्वरचरितम् इत्येषा मृत्युञ्जयनिश्शङ्केन प्रणीतानां प्रमुखतेलुगुग्रन्थानामावलिः।

कविरयं शतश्लोकयुक्तं त्रिपरिच्छेदात्मकं 'नीतिशास्त्रसङ्ग्रहः' इति संस्कृतकाव्यमेकं चकार। ग्रन्थस्यास्य प्रथमे परिच्छेदे 30 श्लोकाः, द्वितीयतृतीयपरिच्छेदयोः 35 श्लोकाः विराजन्ते। मृत्युञ्जस्यैव आस्थानविद्वान्

---

[2] श्रीमन्निश्शङ्कचरितम् – 51, 59, 60 श्लोकाः

[3] श्रीमन्निश्शङ्कचरितम् – 136 पृष्ठसङ्ख्या

In Public domain. Digitization Muthulakshmi Research Academy

आकेल्ल वेङ्कटशास्त्रिवर्यः ग्रन्थमेतं तेलुगुभाषया व्याचख्यौ। कालान्तरे श्री पेरम्बुदूरि शेषाचार्यः आङ्ग्लभाषया विवरणं प्रणिनाय।[4]

अयं मृत्युञ्जयनिश्शङ्कभूपालः त्रयाणां कालिदासनाटकानां व्याख्यां चकार। शाकुन्तलनाटकव्याख्यानस्य नाम 'पूर्णचन्द्रिका' आसीत्। इयमेव उत्तरोत्तरा 'मृत्युञ्जभूपालीयमि'ति नाम्ना तस्मिन्प्रान्ते विश्रुताभवत्। विक्रमोर्वशीयस्य 'रत्नदीपिका'ख्यव्याख्यां, मालविकाग्निमित्रस्य 'विबुधरञ्जनी'इत्याख्यव्याख्यां चकार।

मृत्युञ्जयनिश्शङ्कस्य संस्कृतान्ध्रभाषयोः सेवां प्रशंसन् वङ्गस्थायाः एशियाटिक् सोसायिटीति संस्थायाः अध्यक्षः सप्तम एड्वर्डराजा मृत्युञ्जयनिश्शङ्कभूपालम् एशियाटिक् सोसायिटीति संस्थायाः सदस्यत्वेन चितवान्।

परियोजनान्तर्गतत्वेन अस्यैव व्याख्यातुः पूर्णचन्द्रिकाव्याख्यानेन अभिज्ञानशाकुलन्तलनाटकमपि प्राकाशितमभवत् 2020 तमे वर्षे। रत्नदीपिका व्याख्योपेतं मालविकाज्ञिमित्रं नोपलब्धम्। प्रयत्नो विधीयते।

विक्रमोर्वशीयमिति नाटकमिदं रत्नदीपिकाव्याख्यानसंवलितम् 1884 (1806 शालिवाहनशकवर्षे) तमे वर्षे परवस्तु वेङ्कटरङ्गाचार्यवर्यैः, आकेल्ल वेङ्कटशास्त्रिभिश्च सुसम्पादितं सत् चेन्नपुरीस्थवर्तमानतरङ्गिणीमुद्रणालयात् तेलुगुलिप्या सम्मुद्रितमभवत्। इदानीम् अस्मत्सम्पादने पादटिप्पणीसहितं दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन पुनर्मुद्राप्यते।

व्याख्याता व्याख्यानेऽस्मिन् स्थाने स्थाने कवयितुः कालिदासस्य काव्यकलायाः पाटवस्य चमत्कारस्य च प्रकटनपुरस्सरं व्युत्पित्सूनां सुखबोधाय

---

4 आन्ध्रसंस्थानमुलु साहित्यपोषणमु, डा तूमाटि दोणप्प, आन्ध्रविश्वकलापरिषद् प्रकाशनम् – 484 पृष्ठसङ्ख्या

In Public domain. Digitization Muthulakshmi Research Academy

व्युत्पत्ति–कोश–उदाहरण–सन्दर्भपरिचयादिभिः सह रस–रीति–गुण–अलङ्कारादीनां स्पुटतरविवेचनेन नाटकस्यास्य सौन्दर्यं वर्धितवान् वर्तते इति निश्चप्रचं वक्तुं शक्यते।

मृत्युञ्जयनिश्शङ्कभूपालसदृशान् महतः कवीन् परिचाययितुं संस्कृतपरिषदा अष्टादशीति परियोजनामाध्यमेन प्रकाशनानि विदधाति। इयं परियोजना देहलीस्थस्य केन्द्रियसंस्कृतविश्वविद्यालयस्य अनुदानेन प्रवर्तते। परियोजनायाः अस्याः आवाम् अनुसन्धाताराविति आत्मानं धन्यौ मन्यावहे। ईदृगवसरं दत्तवते परिषन्निदेशकाय आचार्याय नीलकण्ठवर्याय आदौ कार्तज्ञं विन्दावहे।

केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतये, कुलसचिवाय, परियोजनायाः अधिकारिभ्यश्च नमोवाकान् वितरावः। उस्मानियाविश्वविद्यालयस्य कुलपतये, कुलसचिवाय च आधमर्ण्यं प्रकटयावः। संस्कृतपरिषदः इतरसहकारिसदस्येभ्यः धन्यवादान् विदद्वः।

इत्थं बुधजनविधेयौ परियोजना अनुसन्धातारौ

सन्तोषसुब्रह्मण्यौ

षष्ट्यब्दग्रन्थमालापराख्या दुर्लभग्रन्थपुनर्मुद्रणपरियोजना

In Public domain. Digitization Muthulakshmi Research Academy

विषयानुक्रमणिका

- *Preface* — *Prof. K. Neelakantham* — *i-iv*
- *आमुखम्* — *डा. विरिवेण्टि सुब्रह्मण्यम्* — *v- viii*
- *नाटकप्रस्तावना* — *01–06*
- *प्रथमोऽङ्कः* — *07–33*
- *द्वितीयोऽङ्कः* — *34–87*
- *तृतीयोऽङ्कः* — *88–133*
- *चतुर्थोऽङ्कः* — *134–190*
- *पञ्चमोऽङ्कः* — *191–232*
- *श्लोकानुक्रमणिका* — *233–239*

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

महाकविकालिदासविरचितम्

विक्रमोर्वशीयं नाम नाटकम्

(रत्नदीपिकापराख्यया मृत्युञ्जयभूपालीयया व्याख्यया संवलितम्)

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

प्रस्तावना

वेदान्तेषु यमाहुरेकपुरुषं व्याप्यस्थितं रोदसी
यस्मिन्नीश्वर इत्यनन्यविषयश्शब्दो यथार्थाक्षरः ।
अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते
स स्थाणुस्स्थिरभक्तियोगसुलभो निःश्रेयसायास्तुवः ॥ 1 ॥

॥ श्रीरत्नदीपिका ॥

श्रीमद्धैमवतीशं श्रितजनरक्षं भजे मुदा सततम् ।
निष्प्रत्यूहसमाप्त्यै व्याख्याया विक्रमोर्वशीयस्य ॥
श्रीमृत्युञ्जयनिश्शङ्कक्षितिपालवरेण रच्यते स्पष्टम् ।
श्रीरत्नदीपिकाख्या व्याख्या श्रीविक्रमोर्वशीयस्य ॥
कवीन् श्रीकालिदासाद्यानभिवन्द्य गुरूनपि ।
सर्वेषां सुखबोधार्थं कुर्वे श्रीरत्नदीपिकाम् ॥

अथ तत्र भवान्कालिदासनामा महाकविः -

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥

इत्यालङ्कारिकाभिमतवाक्यं प्रमाणयन्विक्रमोर्वशीयाख्यनाटकरूपं काव्यं चिकीर्षमाणश्चिकीर्षितस्य ग्रन्थस्याविघ्नपरिसमाप्तिप्रचाराद्यर्थं पूर्वरङ्गप्रधानाङ्गभूतां नान्दी रूपामाशिषं प्रयुङ्क्ते ।

वेदान्तेष्विति ॥ यं - शिवम्, वेदान्तेषु - उपनिषत्सु, रोदसी - द्यावापृथिव्या, सू ॥ ''दिवोद्यावेति द्युशब्दस्य द्वन्द्वे द्यावादेशः'', नि ॥ ''द्यावाभूमी रोदसी'' इत्यमरः, व्याप्य - विसृत्य, स्थितं - विद्यमानम्, एकपुरुषम् - प्रधान-

In Public domain. Digitization Muthulakshmi Research Academy

नान्द्यन्ते सूत्रधारः - (नेपथ्याभिमुखमवलोक्य) मारिष! इतस्तावत्।

पुरुषं, सू ।। ''पूर्वकालैकेत्या''दिना समासः, आहुः - वदन्ति। ब्रह्मादय इति शेषः। सर्वोपनिषत्प्रतिपाद्यमिति भावः। यस्मिन् - शिवे, अनन्यविषयः - अनितर-साधारणः, ईश्वर इति शब्दो - नामधेयं, यथार्थाक्षरः - अणिमाद्यष्टैश्वर्यविशिष्ट-प्रतिपादकतया अनुगतार्थकवर्णः भवतीत्यध्याहारः। यश्शिवश्च, नियमित-प्राणादिभिः - संनिरुद्धप्राणापानव्यानोदानसमानवायुभिः, मुमुक्षुभिः - मोक्षाभि-लाषुकैः योगिभिरित्यर्थः। अन्तः - हृदये, मृग्यते - अन्विष्यते, स्थिरभक्तियोग-सुलभः, स्थिरेण - निश्चलेन, भक्तियोगेन - भजनभावनया, सुलभः - सुगमः, सः - प्रसिद्धः, स्थाणुः - शिवः, वः - युष्माकं सामाजिकानामित्यर्थः। निश्श्रेयसाय-मोक्षाय, नि ।। ''मुक्तिः कैवल्यनिर्वाणश्रेयोनिश्श्रेयसामृतम्। मोक्षोऽपवर्ग'' इत्यमरः। सू ।। ''अचतुरे''त्यादिना निपातनात्साधुः। अस्तु - भवतु। आशीरर्थे लोट्। अयं नान्दीश्लोकः।

तथाचोक्तं वसन्तराजीये। प्रथमं पूर्वरङ्गश्च ततः प्रस्तावनेति च। आरम्भे सर्वनाट्यानामेतत्सामान्यमिष्यते। यन्नाट्यवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये। कुशीलवाः प्रकुर्वन्ति पूर्वरङ्गस्स उच्यते -

यद्यप्यङ्गानि भूयांसि पूर्वरङ्गस्य नाटके।
तथाप्यवश्यकर्तव्या नान्दी नन्दीश्वरक्रिया ।।
आशीर्नमस्क्रियारूपश्श्लोकः काव्यमुखोदितः।
नान्दीति कथ्यते तस्याः पदादि नियमोपि वा ।।

पदादिनियमोपिवेत्यत्र वा शब्दस्य विकल्पार्थबोधकतयास्मिन्नान्दीश्लोके पदसङ्ख्यानियमो न कृतः कविना।

अथ प्रस्तावनां विवक्षुन्तत्प्रधानाङ्गभूतां प्ररोचनां प्रस्तौति। **नान्द्यन्त इति** ।। तल्लक्षणन्तु -

In Public domain. Digitization Muthulakshmi Research Academy

(प्रविश्य) **पारिपार्श्विकः - भावायमस्मि ।**

सूत्रधारः - मारिष! बहुशः परिषदा पूर्वेषां कवीनां दृष्टप्रयोगः प्रबन्धः। तत्तावदहं विक्रमोर्वशीयं नाम नामपूर्वं प्रयोक्ष्ये। तदुच्यतां पात्र-वर्गः, स्वेषु स्वेषु पात्रेष्वसम्मूढैर्भवितव्यमिति।

नियोजनं प्रयोज्यस्य निर्देशो देशकालयोः ।
काव्यार्थसूचकैस्सूक्तैस्सभायाश्चित्तरञ्जनम् ।।

कविकाव्यनटादीनां प्रशंसा च प्ररोचनेति । नान्द्यन्ते - नान्द्याः - उक्त-लक्षणायाः, अन्ते - विधानावसाने । सूत्रधारः - सूत्रम् - काव्यार्थस्य सूचनम्, तद्धारयति - प्रवर्तयतीति तथोक्तः। नटवर्गाधिपः । आहेति शेषः । नेपथ्याभिमुखम् - नेपथ्यस्य - नटवर्गस्थानस्य, अभिमुखम् - पुरोमुखम्, अवलोक्य - वीक्ष्य, नेपथ्यं नाम - रङ्गस्थलव्यतिरिक्तं पर्णिकाग्रहणयोग्यं नटवर्ग- स्थानम् । तदुक्तं - ''कुशीलवकुटुम्बस्य स्थलं नेपथ्यमिष्यत'' इति । हे मारिष ! मारिषेत्यार्य-सम्बोधनम्, नि ।। ''आर्यस्तु मारिष'' इत्यमरकोशे चोक्तत्वात्, इतस्तावत् - इमं प्रदेशं प्रति, आगच्छेति शेषः ।

प्रविश्येति । पारिपार्श्विकः - परिपार्श्वं वर्तते पारिपार्श्विकः, सूत्रधारस्य पार्श्वदेशवर्ती नटः । अस्यैव मारिषसंज्ञा । सू ।। ''अव्ययीभावाच्चेति ठक्प्रत्ययः। अव्ययानां भमात्रे टिलोपः''। प्रविश्य - समीपमागत्य । आहेति शेषः। किमिति । हे भाव - विद्वन् सूत्रधार, नि ।। ''भावो विद्वानि''त्यमरः, अयमस्मि - एषोऽह-मागतोऽस्मि ।

सूत्रधार इति । सूत्रधारः प्राह - किमिति । हे मारिष!, परिषदा - संसदा, तन्निष्ठजनेनेत्यर्थः, नि ।। ''समज्यापरिषद्गोष्ठी सभासमिति संसद'' इत्यमरः, पूर्वेषां कवीनां - प्राचीनानां पण्डितानां, प्रबन्धः - कल्पनाकथारूपं

In Public domain. Digitization Muthulakshmi Research Academy

पारिपार्श्विकः - यदाज्ञापयति भावः। इति निष्क्रान्तः।

काव्यं, नि।। ''प्रबन्धः कल्पना कथे''त्यमरः, बहुशः - अनेकवारं, सू।। ''बह्वल्पार्थाच्चस्कारकादन्यतरस्यामिति शस्प्रत्ययः'', दृष्टप्रयोगः - अवलोकिताभिनयः। अनेन सभ्यप्रशंसा कृता, तत्तस्मात् । अहं तावत् - इदानीं, विक्रमोर्वशीयं नाम, विक्रमः - पुरूरवाः पराक्रमश्च, ऊर्वशी - अप्सरो विशेषश्च विक्रमोर्वश्यौ, ते अधिकृत्य कृतो ग्रन्थः विक्रमोर्वशीयम् । एतदभिधानं, सू।। ''अधिकृत्यकृतो ग्रन्थ इत्यधिकारेशि शुक्रन्दयमनभद्रन्द्वेत्यादिना छप्रत्ययः'', अपूर्वं - सामाजिकैः प्रागनवलोकितं, नाटकं - रूपकविशेषं, प्रयोक्ष्ये - अभिनेष्ये। नाटकस्य रूपकविशेषत्वे प्रमाणम् ।

नाटकं सप्रकरणं भाणः प्रहसनं डिमः ।
वीथी समवकाराङ्कव्यायोगेहामृगा इति ।।

कथ्यन्ते दशधा मार्गा रूपकाणां विचक्षणैः। तत्र नाटकं यथा -

कर्तव्यं नाटके वस्तु प्रख्यातं मिश्रमेव वा ।
बीजादि परिभाषान्तसर्वलक्षणसंयुतम् ।।
राजर्षिवंश्यो दिव्यो वा धीरोदात्तश्च नायकः ।
एको रसो भवेदङ्गी वीरशृङ्गारयोर्द्वयोः ।।
अङ्गान्येव रसास्सर्वे भवेन्निर्वहणादितः ।।

पञ्चादि दशपर्यन्तमङ्काः कार्यायथोचितमित्युक्तलक्षणम् ।

तत् - तस्मात्, पात्रवर्गः - भूमिकाग्राहकसमूहः, स्वेषु स्वेषु पात्रेषु - स्वकीयेषु तेषु तेषु वेषेषु, ''पात्रशब्देन वेषो वेषधारी चोच्यते'', असम्मूढैः - मौढ्यरहितैः, जागरूकैरित्यर्थः, भवितव्यम् - वर्तितव्यम्, इत्येवं प्रकारेण उच्यताम् - नियुज्यतां त्वयेति शेषः ।

पारिपार्श्विक इति । पारिपारिश्वको - मारिषः, प्राहेति शेषः । किमिति।

In Public domain. Digitization Muthulakshmi Research Academy

सूत्रधारः - यावदिदानीमार्यमिश्रान् विज्ञापयामि -

प्रणयिषु वा दाक्षिण्यादथवा सद्वस्तुपुरुषबहुमानात् ।

शृणु तमनोभिरवहितैः क्रियामिमां कालिदासस्य ।। 2 ।।

(नेपथ्ये) अय्य! परित्ताअदु परित्ताअदु जोसुरपक्खवादीजस्सवा अम्बरतळेगईअन्थि। **(आर्य! परित्रायतां परित्रायतां यस्सुरपक्षपाती यस्य वाम्बरतले गतिरस्ति)।**

~~~~~~

भावः - सूत्रधारः, यदाज्ञापयति - यन्नियोजयति, तत्करोमीति वाक्याध्याहारः। इत्युक्त्वा निष्क्रान्तो - निर्गतः, नेपथ्यं प्रति गत इत्यर्थः ।

एवं मारिषं सम्प्रेष्य सदा सदश्चित्तावधानं प्रति याचते। **सूत्रधार इत्यादिना।** सूत्रधारः प्राह । किमिति । इदानीम् - अद्य, आर्यमिश्रान् - पूज्यतमान्, यावद्विज्ञापयामि - सर्वं निवेदयिष्यामि । किमिति । प्रणयिषु - सुहृद्भूतेष्वस्मासु, दाक्षिण्यात् - कारुण्याद्वा, अथवा - तथा नोचेत्, सद्वस्तुपुरुषबहुमानात् - सद्वस्तुनि - एतन्नाङ्कप्रतिपाद्ये कथाशरीरे, पुरुषे - तत्प्रणेतरि कविराजे वा, बहुमानात् - गौरवात्, आवहितैः - सावधानैः, मनोभिः - चित्तैः, इमाम् - अभिनेष्यमाणां, कालिदासस्य - तन्नाम्नः कवेः, क्रियां कृतिं - विक्रमोर्वशीय नाटकरूपां, शृणुत - आकर्णयतेति प्रार्थनायां लोट् ।

नेपथ्य इति । नेपथ्ये - तिरस्करिण्यन्तरितनटवर्णस्थाने । किञ्चिद्वाक्यं निर्गतं किमित । हे आर्य! प्रभो! परित्रायतां परित्रायतां - रक्ष्यतां रक्ष्यताम् । अयं जनस्त्वयेति वाक्याध्याहारः। यः - प्रभुः, सुपक्षपाती - देवसहायवर्ती । नि ।। ''पक्षःपार्श्वगरुत्साध्वसहायबलभित्तिष्वि''त्यमरः। यस्य वा - प्रभोश्च, अम्बरतले - वियद्देशे, गतिः - सञ्चारः, अस्ति - विद्यते । तेनेति पूर्वेणान्वयः। अत्र स्त्री - विदूषकबालानां शूद्राणां प्राकृतं वच इति प्राकृते प्राप्ते प्रायेण प्राकृत-
~~~~~~

In Public domain. Digitization: Muthulakshmi Research Academy

सूत्रधारः - (आकाशे कर्णं दत्वा) **अये ! किन्नु खलु मम विज्ञापनानन्तरमेव आर्तानाङ्कुररीणामिवाकाशे शब्दश्श्रूयते।** (विचिन्त्य) **भवतु ज्ञातम् ।**

ऊरूद्भवानरसखस्य मुनेस्सुरस्त्री
कैलासनाथमुपसृत्य निवर्तमाना ।
बन्दीकृता विबुधशत्रुभिरर्धमार्गे
क्रन्दत्यतश्शरणमप्सरसाङ्गणोऽयम् ॥ 3 ॥

॥ इति निष्क्रान्तः ॥

स्थाने शौरसेनी विधीयत इति शौरसेनी प्रयुक्ता । अत एवाय्योर्य इति शौरसेनी कार्यं कृतम् ।

सूत्रधार इति । सूत्रधारः - आकाशे कर्णं दत्वा - वियति श्रोत्रं प्रसार्य, कश्चिद्ध्वनिं श्रुत्वा प्राह । किमिति । अये इत्यात्मन्येवानिर्दिष्टसम्बोधनम् । मम विज्ञापनानन्तरं - निवेदनोत्तरक्षण एव, आर्तानां - आपन्नानां, कुररीणां - कुरर स्त्रीपक्षणामिव । ''सू ॥ जातेरस्त्रीविषयादयोपथादिति ङीप्'' नि ॥ ''उत्क्रोश-कुररौ समावित्यमरः ।'' शब्दः - वर्णात्मको ध्वनिः, आकाशे - अन्तरिक्षे, श्रूयते - आकर्ण्यते, किन्नु खलु - को वा भवेत् । अत्र नु शब्दो वितर्कार्थकः। नि ॥ ''नुपृच्छायां वितर्के चे''त्यमरः। विचिन्त्य - सम्यग्विचार्य, भवतु - अस्तु, ज्ञातम् - बुद्धम् । तदेवाह । ऊरूद्भवेति । नरसखस्य - नराख्यस्य मुनेर्मित्रस्य। सू ॥ ''राजाहस्सखिभ्यष्टजिति टच् ।'' मुनेः - नारायणाख्यस्य ऋषेः, ऊरूद्भवा-सक्थि सञ्जाता । सुरस्त्रीदेवयोषा ऊर्वशीत्यर्थः। कैलासनाथं - कुबेरम्, उपसृत्य - संसेव्य, निवर्तमाना - पुनरागच्छन्ती सती, अर्धमार्गे - मार्गमध्ये, विबुधशत्रुभिः - देव विरोधिभीराक्षसैरित्यर्थः, बन्दीकृता - अवग्रहेण निरुद्धा, अतः कारणात्, अयं - नेपथ्यवर्ती, अप्सरसां - सुरस्त्रीणां, गणस्समूहः। शरणं - रक्षणं प्रति, क्रन्दति - आक्रोशति, इत्युक्त्वा निष्क्रान्तः - निर्गतः ।

In Public domain. Digitization Muthulakshmi Research Academy

॥ प्रथमोङ्कः ॥

(ततः प्रविशत्यप्सरसाङ्गणः)

अप्सरसः - अय्य! परित्ता अदुपरित्ता अदुजोसुर पक्खवादीजस्सवा अम्बरतलेगई अत्थि। **(आर्य! परित्रायतां परित्रायतां यस्सुरपक्षपाती यस्य वाम्बरतले गतिरस्ति)।**

(ततः प्रविशति राजा रथेन सूतश्च)

~~~~~~

अथाङ्कः प्रस्तूयते । ततः प्रविशतीत्यादि । तल्लक्षणं यथा-

द्वेधा वस्तु विभागस्स्यात्प्रकाशस्सूच्य इत्यपि।
प्रकाश्यो मधुरोदात्तरसभावनिबन्धनः।।
अङ्कैः प्रकाशयेदेनमङ्कलक्ष्म प्रचक्ष्यते।
प्रत्यक्षनेतृचरितोबीजबिन्दुसमन्वितः।।
प्रसक्तार्थोपसंहारीपताकास्थानसंयुतः।।

अङ्को नाम प्रकाशार्थः संविधानरसाश्रयः। एकाहैवेक रात्रे वा चरितं तत्र वर्णयेत्। प्रयुक्तैः पञ्चभिः पात्रैस्तैषामन्ते च निर्गम इति । ततः सूत्रधारनिष्क्रमणानन्तरम् । अप्सरसाङ्गणः - स्वर्वेश्यानां समूहः, प्रविशति - प्राप्नोति, रङ्गस्थलमिति शेषः। अप्सरहः प्राहुः। किमिति। आर्य परित्रायतामित्यादि व्याख्यातं प्रस्तावनान्ते।

ततः प्रविशतीत्यादि। ततः - अनन्तरम्, रथेन - स्यन्दनेन, राजा-पुरूरवाः, सूतस्सारथिश्च, प्रविशति - रङ्गस्थलमागच्छतीति प्रत्येकान्वयः । राजा वदति। किमिति। आक्रन्दितेन - परिदेवनेन, अलं - न कर्तव्यमित्यर्थः, सूर्योपस्थानात् - भास्करोपासनात्, सूर्यमुपस्थायेत्यर्थः। सू।। ‘‘ल्यब्लोपे कर्मण्यधि-
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

राजा - **अलमाक्रन्दितेन। सूर्योपस्थानात् प्रतिनिवृत्तं पुरूरवसं मामुपेत्य कथ्यतां भवत्यः कुतः परित्रातव्याः।**

रम्भा - असुरावळेअदो (असुरावलेपात्)।

राजा - **असुरावलेपेन किं भवतीनामपराद्धम्।**

रम्भा - जातवो विसेसपरिसं किदस्समहिंदस्स सुउमाळंपहरणं पच्चादेसो रूअगव्विदाएसिरी ए अरंकारो सग्गस्ससाणोपि असहीउव्वसी

~~~~~~

करणे चेति पञ्चमी'', प्रतिनिवृत्तं - प्रत्यागतम्, पुरूरवसं - तन्नामकं माम्, उपेत्य - आगत्य, भवत्यः - यूयं, कुतः - कस्मात्, परित्रातव्याः - रक्षणीयाः, कथ्यताम् - उच्यतां स इति शेषः। सू ।। ''कुत इत्यत्र भीत्रार्थानामित्य-पादानत्वात्पञ्चमी''। इति राज्ञा पृष्टे तासां मध्ये काचिदुत्तरमाह -

रम्भेति। रम्भा वदति। किमिति। असुरावलेपात् - राक्षसगर्वात्, परि-त्रातव्या इत्यध्याहारः।

राजेत्यादि। रम्भा वक्ति। किमिति। असुरावलेपेन - दानवाहङ्कारेण, भवतीनां - युष्माकं, किमपराद्धं - कोवापराधं, भवेदिति शेषः। सू ।। ''नपुंसके भावे क्तः''।

रम्भेत्यादि। रम्भा प्रतिवक्ति। किमिति। या - ऊर्वशी, तपोशेष-परिशङ्कितस्य - तपोविशेषेण - महत्तरेण तपसा, परिशङ्कितस्य - यं प्राप्तस्य, आत्मवदाक्रमणशङ्कयेति भावः, महेन्द्रस्य -वासवस्य, सुकुमारं - मृदुलं, प्रहरणं-आयुधभूता, या ऊर्वशी, रूपगर्वितायाः - सौन्दर्येणाभिमानिन्याः, श्रियो लक्ष्म्याः, प्रत्यादेशः - निराकरणं, या च, स्वर्गस्य - त्रिदिवस्य, अलङ्कारः - भूषणप्रायाः, नोऽस्माकं, प्रियसखी - इष्टसहचरी, सा - प्रसिद्धा, ऊर्वशी - तन्नाम्निवराप्सराः,
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

कुबेरभवणादोणिवट्टमाणा समावत्तिदिट्ठेण हिरण्णपुरवासिणाकेसिणादाण वाहिवेणचित्तळेहादुदि अबंदिग्गाहंगहिदा। (या तपोविशेषपरिशङ्कितस्य महेन्द्रस्य सुकुमारं प्रहरणं प्रत्यादेशो रूपगर्विताया-श्श्रियः अलङ्कारस्स्वर्गस्य सानः प्रियसखी ऊर्वशी कुबेरभवनान्निवर्तमाना समापत्तिदृष्टेन हिरण्यपुरवासिना केशिना दानवाधिपेन चित्रलेखाद्वितीयाबन्दीग्राहं गृहीता)।

राजा - अपि ज्ञायते कतमेन दिग्विभागेन गतस्सजाल्मः।

मेनका - पुव्वत्तरेण (पूर्वोत्तरेण)।

राजा - तेन हि मुच्यतां विषादः, यतिष्ये वस्सखी प्रत्यानयनाय।

~~~~~~

कुबेरभवनात् - त्र्यम्बकसखागारात्, निवर्तमाना - प्रत्यागच्छन्ती सती, समापत्तिदृष्टेन - हठादवलोकितेन, हिरण्यपुरवासिना - तन्नामकपट्टणनिवासिना, केशिना- केशिनामधेयेन, दानवाधिपेन - राक्षसराजेन, चित्रलेखाद्वितीया - चित्रलेखाख्यया सख्या सहेत्यर्थः, बन्दीग्राहं गृहीता - बन्दीत्वेन अवरुद्धा। अतस्तं हत्वा तां मोचयेत्याशयः।

राजेति। राजा वदति। किमिति। सजाल्मः - असमीक्ष्यकारी। सदानवः। कतमेन दिग्विभागेन - केन वा दिक्प्रान्तेन, गतः - यातः, अपि ज्ञायते - अवबुध्यते किं, भवतीभिरिति शेषः।

मेनकेति। मेनका प्रतिवदति। किमिति। पूर्वोत्तरेण - प्राच्युदीच्यन्तरालेन, ऐशानदिग्विभागेनेत्यर्थः, गत इति शेषः।

राजेति। राजा कथयति। किमिति। वः - युष्माकम्, सखीप्रत्यानयनाय- सख्या ऊर्वश्याः, प्रत्यानयनाय - प्रत्यागमनाय, यतिष्ये - यत्नं करिष्ये, तेन हि - तेन हेतुना, विषादः - खेदः, मुच्यतां - त्यज्यताम्, युष्माभिरिति शेषः।
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

अप्सरसः - सरिसं खुसोमादो एक्कंतरस्स (सदृशं खलु सोमादेकान्तरस्य)।

राजा - क्व पुनर्मां भवत्यः प्रतिपालयिष्यन्ति।

अप्सरसः - इमस्सिं हेमऊडसिहरे (अस्मिन् हेमकूटशिखरे)।

राजा - सूत ऐशानीं दिशं प्रति चोदयाश्वानाशु गमनाय।

सूतः - यथाज्ञापयत्यायुष्मान्। इति यथोक्तं करोति।

~~~~~~

अप्सरस इति। अप्सरसः कथयन्ति। किमिति। सोमात् - चन्द्रात् आरभ्येति शेषः, एकान्तरस्य - एकमन्तरं यस्य तस्य, एकेन - बुधेन व्यवहितस्य चन्द्रस्य पौत्रस्येत्यर्थः, सदृशं खलु - अनुरूपं हि, एतत्प्रतिज्ञाकरणमित्यध्याहारः। नि ।। ''अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये इत्यमरः'' ।

राजेति। राजा वक्ति। किमिति। भवत्यः - यूयम्, क्व पुनः - कुत्र वा स्थाने, मां प्रतिपालयिष्यन्ति - मदागमनं प्रतीक्ष्य वर्तिष्यन्ते।

अप्सरस इति। अप्सरसः प्राहुः। किमिति। हे प्रभो! - अस्मिन् परिदृश्यमाने, हेमकूटशिखरे - तन्नामकनगशृङ्गे, भवन्तं प्रतिपालयिष्याम इति वाक्यशेषः।

राजेति। राजा ब्रूते। किमिति। हे सूत! - सारथे। नि।। ''सूतः क्षत्ता च सारथि''रित्यमरः, ऐशानीं - शिवाधिपतिकाम्, प्रागुत्तरामध्यगतां, दिशम् - हरितं प्रति, आशुगमनाय - शीघ्रयानाय, अश्वान् - हयान्, चोदय - गमय।

सूत इति। सूतः कथयति। आयुष्मान् - दीर्घायुर्विशिष्टो राजा, रथिकस्सूतेनायुष्मत्पदवाच्यः, तदुक्तम् दशरूपके - ''आयुष्मानितिवक्तव्यस्सूतेन रथिकस्सदेति'', यथा - येन प्रकारेण, आज्ञापयति - नियोजयति, तथा करोमीति वाक्यशेषः। इति - एवमुक्त्वा, यथोक्तं -यथाज्ञप्तं, करोति - अश्वान् गमयति।
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

राजा - (रथवेगं निरूपयन्) **सूत साधु साधु अनेन रथवेगेन पूर्वप्रस्थितं वैनतेयमप्यासादयेयं, किं पुनस्तमपकारिणं मघोनः। सम्प्रति हि-**

अग्रे यान्ति रथस्य रेणुवदमी चूर्णी भवन्तो घना-
श्चक्रभ्रान्तिररान्तरेषु जनयत्यन्यामिवारावलिम्।
चित्रन्यस्तमिवाचलं हयशिरस्यायामवच्चामरं
यष्ट्यग्रे समवस्थितो ध्वजपटः प्रान्तेन वेगानिलात्॥ 4॥

(निष्क्रान्तो राजा रथेन सूतश्च।)

राजेत्यादि। राजा - पुरूरवाः, रथवेगं - स्यन्दनरयं, निरूपयन् - प्रतिपादयन्, वक्ति, किमिति, हे सूत - सारथे, साधु साधु - सम्यक्सम्यक्। रथचोदनमतीवश्लाघनीयमित्यर्थः। अत एव अनेन रथवेगेन - एतेन स्यन्दनजवेन, पूर्वप्रस्थितं - प्रथमनिर्गतं, वैनतेयं - सुवर्णमपि, सू।। ''स्त्रीभ्यो ढगि''ति ढक् प्रत्ययः, आसादयेयम् - प्राप्तुं शक्नुयाम्, सू।। ''शकिलिङ्चेति शक्यार्थे लिङ्'', मघोनः - इन्द्रस्य, अपकारिणं - द्रोहिणं, तं - दानवं, किं पुनः - आसादयेयमिति, किमु - वक्तव्यम्। तमेवोपसादयति। **सम्प्रति हीत्यादिना**। सम्प्रति - अधुना हि, हि शब्दोऽत्र हेतुपरः, नि।। ''हिहेताववधारण इत्यमरः'', अमीघनाः - एते मेघाः, चूर्णीभवन्तः - रथवेगेन शकलीभवन्तः, रेणुवत् - धूलिभिस्तुल्यम्, सू।। ''तेन तुल्यं क्रियाचेद्वतिरि''ति वतिप्रत्ययः, रथस्य - शताङ्गस्य, अग्रे - पुरतः, यान्ति - गच्छन्ति, चक्रभान्तिः - रथाङ्गपरिभ्रमणम्, आरान्तरेषु - शलाकान्तरालेषु, अन्याम् - इतराम्, अरावलिम् - शलाकाश्रेणिं, जनयति - प्रादुर्भावयतीव स्थिता, हयशिरसि - अश्वमूर्ध्नि, आयामवत् - दीर्घं, यच्चामरं - चमरीमृगवालव्यजिनं, तत्, अचलम् - वेगातिशयेन निश्चलं सती, चित्रन्यस्तं - चित्रार्पितमिव स्थितमिति शेषः, ध्वजपटः - पताकाग्रस्थितमंशुकं, प्रान्तेन - पार्श्वभागेन, वेगानिलात् -

In Public domain. Digitization Muthulakshmi Research Academy

सहजन्या - हळा! गदोराएसी, अम्हेविजहाणिद्दिट्ठं पदेसं संकमामो (**सखि गतो राजर्षिः, वयमपि यथानिर्दिष्टं प्रदेशं सङ्क्रामामः**)।

शेषाः - तह (**तथा**) । इति सर्वाश्शैलारोहणं नाटयित्वा स्थिताः।

रम्भा - अविणामसोराएसी समुद्धरेणोहि अअसळ्ळम् (**अपि नाम सराजर्षिस्समुद्धरेन्नो हृदयशल्यम्**)।

मेनका - सहि मातेसंसओभोदु, णंउ अट्टिदसंपरा ओमहिंदो विमज्झिमलो आदोसबहुमाणं आणिअतं जव्वविअअसेणामुहेणिओएदि (**सखि**

~~~~~~

वायुवेगात्, यष्ट्यग्रे - ध्वजस्तम्भाग्रभागे, समवस्थितः - निश्चलत्वेन विद्यते, इत्युक्त्वा, राजा सूतश्च रथेन सह निष्क्रान्तो निर्गत इति प्रत्येकान्वयः ।

सहजन्येति । सहजन्या नाम काचिदप्सरस्त्री प्राह किमिति । हे सखि। राजाः - पुरूरवाः, गतः - यातः, ऊर्वशीप्रत्यानयनार्थमिति शेषः । वयमपि-सर्वावयञ्च, यथानिर्दिष्टं - निर्दिष्टमनतिक्रम्य, प्रदेशं - स्थानम्, सङ्क्रामामः - प्रविशामः ।

शेषा इति । शेषाः - ऊर्वशी चित्रलेखाव्यतिरिक्ताप्सरसः, तथा - तेन प्रकारेण कुर्म इत्यध्याहारः, इत्युक्त्वा, सर्वाः - ता रम्भादयः, शैलारोहणं - नगो सङ्गमनं, नाटयित्वा - अभिनीय, स्थिताः - संनिविषाः ।

रम्भेति । रम्भा प्राह । किमिति । सराजर्षिः - पुरूरवाः, नः - अस्माकं, हृदयशल्यम् - तद्रूपमनोव्यथां, समुदरेदपि नाम - अपनयेद्वा किं, नामेति सम्भावनायाम् ।

मेनकेति । मेनका ब्रूते । किमिति । हे सखि - रम्भे, ते -तव, संशयः-सन्देहः, मा भवतु - माभूत्, कस्मादिति चेत्, महेन्द्रः - वासवोपि, उपस्थित-
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

मा ते संशयो भवतु। ननूपस्थितसाम्परायो महेन्द्रोऽपि मध्यमलोकात्सबहुमानमानीय तमेव विजयसेनामुखे नियोजयति)।

रम्भा - इधसव्वधाविअईभोदु **(इह सर्वथा विजयी भवतु)।**

(क्षणमात्रं स्थित्वा)

सहजन्या - हळा! समस्ससधसमस्ससधएसो सूइदहरिणकेदणोतस्सरा एसिणो सोमदत्तोरथोदीसदिणक्खुसो अकदद्धो णिवट्टिस्सदि **(सख्यस्समाश्वसित समाश्वसित एष सूचित हरिणकेतनस्तस्य राजर्षेस्सोमदत्तो रथो दृश्यते। न खलु सोऽकृतार्थो निवर्तिष्यते)।**
सर्वा उच्चक्षुषो विलोकयन्ति।

साम्परायः - रक्षोभिस्सह प्राप्तयुद्धस्सन्, तं - राजानमेव, मध्यमलोकात् - मर्त्य लोकात्, सबहुमानं - सगौरवम्, आनीय - आगतं कृत्वा, विजयसेनामुखे - जय शीलसैन्याग्रभागे, नियोजयति ननु - आज्ञापयति खलु।

रम्भेति। रम्भा वक्ति। किमिति। इहास्मिन्कार्ये, सर्वथा - सर्वप्रकारैः, विजयी - शत्रुजेता, भवतु - अस्तु।

क्षणमात्रमिति। सहजन्या नाम काचिदप्सराः। क्षणमात्रं - तत्परिमित कालं, त्रिंशत्कलात्मकमित्याशयः, नि।। ''त्रिंशत्कुताः कला। तास्तु त्रिंशत्क्षण'' इत्यमरः। सू।। ''कालाध्वनोरत्यन्तसंयोग इति द्वितीया'', स्थित्वा - तूष्णीं भूय, प्राह, किमिति, हे सख्यः - सहचर्यः, समाश्वसित समाश्वसित - निवृत्तदुःखा भवथ सम्भ्रमाद्द्विरुक्तिः, सूचितहरिणकेतनः - किञ्चिद्दृष्टकुरङ्गध्वजः, सोमदत्तः- चन्द्रप्रतिपादितः, एषोऽयं, तस्य राजर्षेः - पुरूरवसः, रथः - शताङ्गः, दृश्यते - विलोक्यते, स राजा, अकृतार्थः - अनिष्पन्नकार्यस्सन्, न निवर्तिष्यते खलु - न प्रत्यागमिष्यति हि इति तयोक्ते सर्वास्सुरस्त्रियः। उच्चक्षुषः - उन्नमिताक्ष्यः, विलोकयन्ति - पश्यन्ति, राजानमितिशेषः।

In Public domain. Digitization Muthulakshmi Research Academy

ततः प्रविशति स्तिमितवेगेन रथेन राजा सूतश्च, चित्रलेखावलम्बितहस्ताभयनिमीलिताक्षी चोर्वशी।

चित्रलेखा - समस्ससदुसमस्ससदु पिअसही **(समाश्वसितु समाश्वसितु प्रियसखी)।**

राजा - सुन्दरि! समाश्वसिहि।

गतं भयं भीरु! सुरारिसम्भवं त्रिलोकरक्षीमहिमा हि वज्रिणः।
तदेतदुन्मीलयचक्षुरायतं महोत्पलं प्रत्युषसीव पद्मिनी॥ 5 ॥

चित्रलेखा - अम्हो! उससिदमेत्तजीविदा अज्जविसण्णं णपडिवज्जदि **(अहो! उच्छ्वसितमात्रजीविता अद्यापि संज्ञां न प्रतिपद्यते)।**

~~~~~~

तत इति। ततः - अनन्तरम्, स्तिमितवेगेन - मन्दीभूतजवेन, रथेन-स्यन्दनेन सह राजा, सूतः - सारथिश्च, चित्रलेखावलम्बितहस्ता - चित्रलेखया दत्तहस्तावलम्बा, भयनिमीलिताक्षी - साध्वसमुकुलितनेत्रा ऊर्वशी च, प्रविशति-प्राप्नोतीति प्रत्येकं क्रियान्वयः।

चित्रलेखेति। चित्रलेखा वक्ति। किमिति। प्रियसखी - इष्टसहचरी ऊर्वशी, समाश्वसितु समाश्वसितु - त्यक्तदुःखा भवतु आदराद्द्विरुक्तिः।

राजेति। राजा कथयति। किमिति। हे सुन्दरि -लावण्यवति, समाश्वसिहि-विमुक्तदुःखा भव, कुत इति चेत्। **गतमिति**। हे भीरु - भयशीले, सुरारिसम्भवं-राक्षसजनितम्, भयं - भीतिकारणम्, गतं - निरन्तरम्, वज्रिणः - इन्द्रस्य, महिमा- सामर्थ्यं, त्रिलोकरक्षी - लोकत्रयपालको हि, तत्तस्मात्, आयतं - विशालं, एतत् - त्वदीयं, चक्षुः - नेत्रं, नेत्रे इत्यर्थः, जातावेकवचनम्, पद्मिनी - नलिनी, प्रत्युषसि - निशावसाने, महोत्पलं - पङ्कजमिव, उन्मीलय - विकासय।
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

राजा - बलवदत्रभवती परित्रस्ता, तथा हि -

मन्दारकुसुमदाम्ना गुरुरस्यास्सूच्यते हृदयकम्पः ।
मुहुरुच्छ्वसता मध्ये परिणाहवतोः पयोधरयोः ।। 6 ।।

चित्रलेखा - हळा पच्चवत्था वेहि अत्ताणं - अणच्चराविअमे पडिभासि (सखि पर्यवस्थापयात्मानम् - अनप्सरा इव मे प्रतिभासि)।

राजा -

मुञ्चति न तावदस्याः कम्पं कुसुमसमबन्धनं हृदयम् ।
पश्य हरिचन्दनेन स्तनमध्योच्छ्वासिना कथितम् ।। 7 ।।

चित्रलेखेति। चित्रलेखा प्राह। उच्छ्वसितमात्रजीविता - निश्श्वासमात्रप्राणविशिष्टा ऊर्वशी, अद्य - इदानीमपि, संज्ञां - चेतनां, नि।। ''संज्ञास्याच्चेतनानामहस्ताद्यैश्चार्थसूचने''त्यमरः, न प्रतिपद्यते - न प्राप्नोति, अहो - आश्चर्यम्।

राजेति। राजा कथयति। अत्रभवती - मान्या युष्मत्सखी, बलवत् - नितरां, परित्रस्ता - भीता असुरेभ्य इति शेषः, तथाहि - तदेवोपपादयति। मन्दारेति। परिणाहवतोः - सुविशालयोः, पयोधरयोः - स्तनयोः, मध्ये - अन्तरे, मुहुः - वारं वारं, उच्छ्वसता - प्रकम्पिना, मन्दारकुसुमदाम्ना - मन्दारपुष्परचितया स्रजा, गुरुः - महान्, अस्याः - ऊर्वश्याः, हृदयकम्पः - हृदयोपरि भागचलनं, सूच्यते - द्योत्यते।

चित्रलेखेति। चित्रलेखा वदति। किमिति। हे सखि - ऊर्वशि, आत्मानं - स्वम्, पर्यवस्थापय - प्रकृतिं गमय, मे - मम, अनप्सराः - अप्सरोव्यतिरिक्तकान्तेव, प्रतिभासि - प्रकाशसे। अप्सरसां नेदृशी भीतिर्युज्यते इति भावः।

राजेति। राजा प्राह। अस्याः - ऊर्वश्याः, कुसुमसमबन्धनं - पुष्पसुकुमारं, हृदयम् - हृत्प्रदेशः, स्तनमध्योच्छ्वासिना - चन्दनविशेषेण, कथितम्-

In Public domain. Digitization Muthulakshmi Research Academy

ऊर्वशी प्रकृतिमागच्छति ।

राजा - भद्रे! प्रकृतिमापद्यते ते प्रियसखी पश्य -

आविर्भूते शशिनि तमसा मुच्यमानेव रात्रि-
नैशस्यार्चिर्हुतभुज इव छिन्नभूयिष्ठधूमा ।
मोहेनान्तर्वरतनुरियं लक्ष्यते मुक्तकल्पा
गङ्गा रोधःपतनकलुषा गृह्णतीव प्रसादम् ।। ८ ।।

~~~~~~

सूचितं, कम्पं - चलनं, तावदद्यापि, न मुञ्चति - न त्यजति, पश्य - विलोकय, वाक्यार्थः कर्म ।

ऊर्वशीति। ऊर्वशी। प्रकृतिं - स्वाभाविकावस्थाम्, आगच्छति - प्राप्नोति, चैतन्यमेतीति भावः ।

राजेति। राजा ब्रूते। किमिति। हे भद्रे - चित्रलेखे, ते- तव, प्रियसखी - इष्टसहचरी, प्रकृतिं - चेतनां, आपद्यते - प्राप्नोति, पश्य - प्रेक्षस्व, आविर्भूत इति, अन्तः - अन्तःकरणे, मोहेन - भयजनितमूर्छया, मुक्तकल्पा - त्यक्तप्राया सू ।। ''ईषदसमाप्ताकल्पबिति कल्पप्रत्ययः'', इयम् - एषा, वरतनुः - कोमलाङ्गी ऊर्वशी, शशिनि - चन्द्रे, आविर्भूते - उदिते सति, तमसा - अन्धकारेण, मुच्यमाना - त्यज्यमाना, रात्रिः - निशेव, छिन्नभूयिष्ठधूमा - अपगतबहुलधूमा, नैशस्य - नक्तंभवस्य, हुतभुजः - वह्नेः, अर्चिः - ज्वालेव, रोधःपतनकलुषा - रोधसः - तटस्य, पतनेन - पातेन, कलुषा - आविला, नि ।। ''कलुषोऽनच्छ आविल'' इत्यमरः, प्रसादं - प्रसन्नत्वं, गृह्णती - आप्नुवन्ती, गङ्गा - भागीरथीव, लक्ष्यते - दृश्यते ।

चित्रलेखेति। चित्रलेखा वक्ति। हे सखि - ऊर्वशि, विस्रब्धा - विश्वा-
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

चित्रलेखा - सहि ! वीसद्धाहो हि - पराभूदाक्खुतिदसपरिपन्धिणोहदासा **(सखि ! विस्रब्धा भव - पराभूताः खलु त्रिदशपरिपन्थिनो हताशाः)।**

ऊर्वशी - (चक्षुषी उन्मील्य) सहि किंपहावदंसिणामहिंदेण? **(सखि किं प्रभावदर्शिना महेन्द्रेण?)।**

चित्रलेखा - णहिणहि महिंदसरिसाणुभावेण इमिणाराएसिणा **(नहि नहि महेन्द्रसदृशानुभावेनानेन राजर्षिणा)।**

ऊर्वशी - (राजानवमलोक्यात्मगतम्) उअकिदंखुमे दाणवेहिं **(उपकृतं खलु मे दानवैः)।**

राजा - (प्रकृतिस्थामूर्वशीं निर्वर्ण्यात्मगतम्) **स्थाने खलु नारायणमृषिं**

सवती, भव - सम्पद्यस्व, त्रिदशपरिपन्थिनः - देवशत्रवः, हताशाः - अपगततृष्णाः, पराभूताः - जिताः खलु।

ऊर्वशीति। ऊर्वशी। चक्षुषी - नेत्रे, उन्मील्य - विकास्य, प्राह, सखि-चित्रलेखे, प्रभावदर्शिना - प्रतापसम्पन्नेन, नि।। ''सप्रतापः प्रभावश्च यत्तेजः कोश दण्डजमि''त्यमरः, महेन्द्रेण - सुरेश्वरेण, किं - पराभूताः किमित्यर्थः।

चित्रलेखेति। चित्रलेखा कथयति। नहिनहि - महेन्द्रेण न वराभूताहि, सम्भ्रमेणात्र द्विरुक्तिः, किन्तु, महेन्द्रसदृशानुभावेन शक्रसमानप्रभावसम्पन्नेन, अनेन - पुरोवर्तिना, राजर्षिणा - नृपवर्येण, पुरूरवनेत्यर्थः।

ऊर्वशीति। ऊर्वशी। राजानं - पुरूरवसम्, अवलोक्य - वीक्ष्य, आत्म-गतम् - स्वगतम्, दानवैः - राक्षसैः, मे - मह्यम्, उपकृतंखलु - प्रियमाचरितं हि। राजसमावेशरूप उपकारः कृत इति भावः।

राजेति। राजा - पुरूरवाः, ऊर्वशीं, निर्वर्ण्य - विलोक्य, आत्मगतम्-

In Public domain. Digitization Muthulakshmi Research Academy

प्रलोभयन्त्यस्तदूरुसम्भवामेनां दृष्ट्वा व्रीडितास्सर्वा अप्सरस इति-
अथवा नेयं तपस्विनस्सृष्टिर्भवितुमर्हति। किन्तु -

अस्यास्सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तप्रभ-
श्शृङ्गारैकरसस्स्वयं नु मदनो मासो नु पुष्पाकरः।
वेदाभ्यासजडः कथं सविषयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः॥ 9॥

~~~~~~

स्वगतम्, नारायणं - तन्नामानं, ऋषिं - मुनिं, प्रलोभयन्त्यः - प्रकर्षेण मोहयन्त्यः, सर्वा अप्सरसः- समस्तास्स्वर्वेश्याः, तदूरुसम्भवां - तस्य - नारायण मुनेः ऊरोस्सक्थिप्रदेशात्, सम्भवां - सञ्जाताम्, एनाम् - ऊर्वशीं, दृष्ट्वा -वीक्ष्य नि॥ ''निर्वर्णनस्तुनिध्यानं दर्शनालोकनेक्षणमि''त्यमरः, व्रीडिताः - लज्जिता इति स्थाने, खलु - युक्तमेव, नि॥ ''युक्ते द्वे साम्प्रतं स्थाने'' इत्यमरः, अथवा - तथा नोचेत्, इयम् - ऊर्वशी, तपस्विनः - तापसस्य, सृष्टिः - निर्माणं, भवितुं - असितुम्, नार्हति - योग्या न भवति, किन्तु - परन्तु, अस्या इति - अस्या ऊर्वश्याः, सर्गविधौ - सृष्टिक्रियायां, कान्तप्रभः - मनोज्ञरुचिः, चन्द्रः - इन्दुः, प्रजापतिः - स्रष्टा, अभून्नु - नु इति वितर्के - अभवत्किमित्यर्थः, नि॥ ''नृपच्छायां वितर्के चे''त्यमरः, शृङ्गारैकरसः - शृङ्गार एक एव रसो यस्य तथा भूतः, मदनः - मन्मथः, स्वयं - स्वेनैव, अभून्नु - स्रष्टाभवत्किम्, पुष्पाकरः - कुसुमनिधिः, मासः - चैत्रः, अभून्नु - स्रष्टाभवत्किम्, तथा न चेत्, वेदाभ्यास-जडः - निरन्तरनिगमपाठमूढमतिः, अत एव विषयव्यावृत्तकौतूहलः - इन्द्रिया-र्थावबोधरहितचित्तवृत्तिः, पुराणः - चिरन्तनः, मुनिः - ऋषिः, इदम् - एतादृशं, मनोहरम् - अतिरमणीयं, रूपं - सौन्दर्यं, निर्मातुं - स्रष्टुम्, कथं - केन वा प्रकारेण, प्रभवेत् - समर्थो भवेत्, न प्रभवेदेवेत्यर्थः।
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

ऊर्वशी - हळा सोमेसहि अणोकहिंणुभवे? **(सखि समे सखीजनः कुत्र नु भवेत्?)।**

चित्रलेखा - महाराओ अभअदा ईजाणादि **(महाराजोऽभयदायी जानाति)।**

राजा - (ऊर्वशीमवलोकयन्) **महति विषादे वर्तते, पश्यतु भवती -**

यदृच्छया त्वं सकृदप्यवन्ध्ययोः
पथि स्थिता सुन्दरि यस्य नेत्रयोः।
त्वया विना सोऽपि समुत्सुको भवे-
त्सखीजनस्ते किमुतार्द्रसौहृदः ॥10॥

ऊर्वशीति। ऊर्वशी कथयति। हे सखि - सहचरि, मे - मम, स सखी-जनः - सहवर्तिप्रियसहचरीवर्गः, कुत्र नु भवेत् - कस्मिन्वा स्थले तिष्ठेत्।

चित्रलेखेति। चित्रलेखा वदति। अभयदायी - रक्षणादभयप्रदाता, महाराजः - पुरूरवाः, जानाति - बुध्यति।

राजेत्यादि। राजा - पुरूरवाः, ऊर्वशीम् अवलोकयन् - पश्यन्, महति-अधिके, विषादे - खेदे, वर्तते - तिष्ठति, सखीजन इत्यनुषज्यते, भवती - त्वमित्यर्थः, पश्यतु - अवलोकयतु, तमित्यध्याहारः, हे सुन्दरि - लावण्यवति, त्वं, यदृच्छया - अनिश्चितकारणेन, सकृत् - एकवारमपि, अवन्ध्ययोः - सफलयोः त्वद्दर्शनेनेति भावः, यस्य - पुरुषस्य, नेत्रयोः - लोचनयोः, पथि-वर्त्मनि, स्थिता - भवसि, सोऽपि - पुमान्, त्वया विना - भवत्या विरहितः, समुत्सुकः - पुनस्त्वद्दर्शनेच्छया उत्कण्ठितः, भवेत् - स्यात्, आर्द्रसौहृदः - निरूढप्रेमयुक्तः, ते - तव, सखीजनः - सहचरीगणः, किमुत - समुत्सुको भवेदिति किं वक्तव्यम्।

In Public domain. Digitized by Muthulakshmi Research Academy

ऊर्वशी - (अपवार्य) अहिजादं खुसेव अणं - अधवाचंदादो अमिअंतिकिं एत्थ अच्चरिणं (प्रकाशम्) अदोज्ञेव्व सहिअणं पेक्खिदुं तुवरदिमेही अअं **(अभिजातं खल्वस्य वचनम् - अथवा चन्द्रादमृतमिति किमत्राश्चर्यम् (प्रकाशम्) अत एव सखीजनं प्रेक्षितुं त्वरते मे हृदयम्)।**

राजा - (अङ्गुल्या निर्दिशन्) -

एतास्सुतनु मुखं ते सख्यः पश्यन्ति हेमकूटगताः।
प्रत्यागतप्रसादं चन्द्रमिवोपप्लवान्मुक्तम् ।। 11 ।।

चित्रलेखा - हळाकिंणपेक्खसि **(सखि, किं न पश्यसि)।**

ऊर्वशीति। ऊर्वशी। अपवार्य - त्रिपताकहस्तेन मुखमावृत्य सखीमात्रावगतं यथा तथा कथयति, अस्य - राज्ञः, वचनम् - उक्तिः, अभिजातंसङ्गतार्थं खलु, अथवा - पक्षान्तरे, चन्द्रात् - सुधांशोः, अमृतं - पीयूषं भवतीति, अत्र - अस्मिन्विषये, किमाश्चर्यम् - किञ्चित्रम्, प्रकाशम् - सर्वजनगोचरं यथा तथा वदति। **किमिति।** अतएव - सखीजनस्योत्कण्ठितत्वादेव, सखीजनं - प्रियसहचरीगणम्, प्रेक्षितुं - द्रष्टुम्, मे - मम, हृदयं - चेतः, त्वरते - सम्भ्रमति, नि ।। "सम्भ्रमस्त्वरे"त्यमरः ।

राजेति। राजा अङ्गुल्या - करशाखया, निर्दिशन् - प्रदर्शयन्, प्राह। एता इति। हे सुतनु - सुन्दराङ्गि, उपप्लवात् - राहुग्रासात्, मुक्तम् - त्यक्तम्, अतएव प्रत्यागतप्रसादं - पुनः प्रसन्नतां प्राप्तं, चन्द्रम् - इन्दुमिव, हेमकूटगताः- हेमकूटाख्याद्रिस्थिताः, एताः - इमाः, सख्यः - सहचर्यः, ते - तव, मुखम् - आननम्, पश्यन्ति - आलोकयन्ति ।

चित्रलेखेति। चित्रलेखा वदति। हे सखि - ऊर्वशि, न पश्यसि किं - न विलोकयसि किम् ।

In Public domain. Digitization Muthulakshmi Research Academy

ऊर्वशी - (राजानं साभिलाषं पश्यन्ती) अइको? **(अयि कः)** ।

चित्रलेखा - सहिअणो **(सखीजनः)** ।

रम्भा - (सहर्षम्) एसोचित्तळेहादुदि अंउव्वसिंगेण्हि अविसाहा समीपं गदोवि अभअवंचन्दो उअट्ठिदोराएसी **(एष चित्रलेखा द्वितीयामूर्वशीं गृहीत्वा विशाखासमीपं गत इव भगवान् चन्द्र उपस्थितो राजर्षिः)** ।

मेनका - (निर्वर्ण्य) दुवेणोपि आइउ अणदा इजंइ अंपच्चाणी दापिअसही। अअंअअपरिक्खदोमहारा ओत्ति **(द्वे नः प्रिये उपनते, यदियं प्रत्यानीता प्रियसखी अयं चापरिक्षतो महाराज इति)** ।

ऊर्वशीति । ऊर्वशी कथयति । अयि - सखि, कः - कुत्र स्थित इत्यर्थः। इत्युक्त्वा राजानं साभिलाषं - सकामं, पश्यन्ती - स्थिता ।

चित्रलेखेति । चित्रलेखा प्राह । सखीजनः - प्रियसहचरीवर्गः ।

रम्भेति । रम्भा - तन्नामाप्सराः, सहर्षं - ससन्तोषम्, वदति। किमिति। एष राजर्षिः - अयं राजश्रेष्ठः पुरूरवाः, चित्रलेखाद्वितीयां - तन्नामकसखीमात्र-सहायाम्, ऊर्वशीं, गृहीत्वा - स्वीकृत्य, विशाखासमीपं गतः - तन्नामकनक्षत्र समीपस्थितः, भगवान् - षड्गुणैश्वर्यसम्पन्नः, चन्द्रः - कलानिधिरिव, उपस्थितः - समागतः ।

मेनकेति । मेनका वदति । किमिति । नः - अस्माकम्, द्वे - उभे, प्रिये - हृद्ये, नि।। ''अभीष्टेऽभीप्सितं हृद्यं दयितं वल्लभं प्रियमि''त्यमरः, सू।। ''इगुपधेति कप्रत्ययः'', उपनते - लब्धे, इयम् - पुरोवर्तिनी, प्रियसखी - इष्टसहचरी, प्रत्यानीता - पुनरानीतेति यत्, अयं - पुरोवर्ती, महाराजः - पुरूरवाश्च, अपरिक्षतः - अजित इति, यत् - एते द्वे इति पूर्वेणान्वयः ।

In Public domain. Digitization Muthulakshmi Research Academy

रम्भा - सहिसुट्ठुभणसि अपरिक्खदोत्तिदुज्ज आक्खुदाणवा (**सखि सुष्ठु भणसि अपरिक्षत इति दुर्जयाः खलु दानवाः**)।

राजा - **सूत इदं तच्छैलशिखरमवतार्यतां रथः।**

सूतः - **यदाज्ञापयत्यायुष्मान्** (इति यथोक्तं करोति)।

राजा - (चक्रोत्खातं रूपयित्वात्मगतम्) **हन्त दत्तफलो मे स्वविषयावतारः-**

यदयं रथसंक्षोभादांसेनांसो निपीडितः।
एकः कृतीशरीरेऽस्मिन् शेषमङ्गं भुवो भरः ॥ 12 ॥

~~~~~~

रम्भेति। रम्भा कथयति। हे सखि - प्रिये मेनके, अपरिक्षतः - अजितो महाराज इति, सुष्ठु - अतीव सम्यक्, फणसि - वदसि, कुत इति चेत्, दानवाः - राक्षसाः, दुर्जयाः खलु - जेतुमशक्या हि ।

राजेति। राजा प्राह। हे सूत - सारथे, तत् - पूर्वनिर्दिष्टं, शैलशिखरं - हेमकूटशृङ्गम्, इदं - पुरो वर्तते, रथः - स्यन्दनः, अवतार्यताम् - अवरोप्यताम्।

सूत इति। सूतः। विज्ञापयति। किमिति। आयुष्मान् - दीर्घायुर्विशिष्टो महाराजः, यदाज्ञापयति - नियोजयति, तत्करोमीति वाक्यशेषः, इति - एवमुक्त्वा, यथोक्तं - यथाज्ञप्तं, करोति - रथमवतारयतीत्यर्थः ।

अस्माभिश्श्लोकद्वयमपि व्याख्यायते। **राजेति**। राजा - पुरूरवाः, चक्रोत्खातं - चक्राणां, रथाङ्गानां - उत्खातं - निम्नोन्नतप्रदेशगमनवशात्संक्षोभं, रूपयित्वा - अभिनीय, आत्मगतं - स्वगतं, मे - मम, स्वविषयावतारः - आत्मीय-देशावरोहणं, दत्तफलः - कृतार्थः, हन्तेति हर्षे, नि।। ''हन्तहर्षेनुकम्पायां वाक्यारम्भविषादयोरि''त्यमरः, हर्षहेतुमाह। **यदिति**। **रथसंक्षोभात्** - स्यन्दन-सङ्घट्टनात्, आंसेन - ऊर्वशीसम्बन्धिबाहुशिखरेण, अंसः - स्वबाहुशिखरं, निपीडितः
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

तद्यथा -

यदिदं रथसंक्षोभादङ्गेनाङ्गं ममायतेक्षणया।
स्पृष्टं सरोमकण्टकमङ्कुरितं मनसिजेनेव ॥ 13॥

ऊर्वशी - (सव्रीडम्) हळा किंचिपुरदोओसरा **(सखि किञ्चित् पुरतोऽपसर)।**

चित्रलेखा - (सस्मितम्) णहिमेरोअदि **(नहि मे रोचते)।**

रम्भा - हला इदो सम्भावेमोराएसिं **(सखि इतस्सम्भावयामो राजर्षिम्)।** (सर्वा उपसर्पन्ति)।

- सङ्घटनात्सङ्घट्टित इति यत्, अस्मिन् - मदीये, शरीरे - अङ्गे, अयम् - एषः, एकः - केवलः, कृती - कृतकृत्यः, शेषम् - अवशिष्टं, अङ्गं - शरीरं, भुवः- भूमेः, भरः - भारभूतं, व्यर्थमिति यावत्। यदिति। रथसंक्षोभात् - शताङ्ग-सङ्घट्टनात्, इदम् - एतत्, मम अङ्गम् - शरीरम्, आयतेक्षणया - विशालाक्ष्या ऊर्वश्या, अङ्गेन - शरीरेण, स्पृष्टं - सङ्घटितं सत्, सरोमकण्टकं - पुलकितं मच्छरीरं, मनसिजेन - मन्मथेन, अङ्कुरितं - सञ्जाताङ्कुरमिवस्थितमिति शेषः।

ऊर्वशीति। ऊर्वशी सव्रीडं - सलज्जं यथा तथा प्राह। हे सखि - चित्रलेखे, किञ्चित् - ईषत्, पुरतः - अग्रे, अपसर - अपगच्छ।

चित्रलेखेति। चित्रलेखा सस्मितं - समन्दहासं ब्रूते। किमिति। मे - मह्यं, सू॥ "रुच्यर्थानां प्रीयमाण" इति चतुर्थी, न रोचते हि - नेष्यते खल्वित्यर्थः।

रम्भेति। रम्भा वदति। हे सखि - सहचरि, इतः - इमं देशं प्रति आगच्छेति शेषः, सू॥ "सार्वविभक्तिकन्तनीः", राजर्षिं - पुरूरवसं, सम्भावयामः - प्रत्युत्थानसम्भाषणादिना सत्कुर्मः, इत्युक्त्वा, सर्वा - समस्ता अप्सरसः, उपसर्पन्ति - राजानमनुसरन्तीत्यर्थः।

In Public domain. Digitization Muthulakshmi Research Academy

राजा - सूत ! स्थापय तावद्रथम् -

यावत्पुनरियं सुभ्रूरुत्सकाभिस्समुत्सुका ।
सखीभिर्यातिसम्पर्कं लताभिश्श्रीरिवार्तवी ।। 14 ।।

सूतः - यदाज्ञापयत्यायुष्मान् (इति यथोक्तं करोति)।

अप्सरसः - दिट्ठिआ विअएण वड्ढदि महाराओ (**दिष्ट्या विजयेन वर्धते महाराजः**)।

राजा - भवत्यश्च सखीसङ्गमेन ।

राजेति। राजा प्राह। किमिति। हे सूत - सारथे, तावदिदानीम्, रथं-स्यन्दनम्, स्थापय - स्थितं कुरु। यावदिति। समुत्सुका - उत्कण्ठिता, नि॥ "इष्टार्थोद्युक्त उत्सुक" इत्यमरः, इयं - पुरस्थिता, सुभ्रूः - सुन्दरी, उत्सुकाभिः-सोत्कण्ठाभिः, सखीभिः - सहचरीभिः, यावत्पुनः - यावत्कालेन तु, आर्तवी - ऋतुसम्बन्धिनी, श्रीः - लक्ष्मीः, लताभिः - वल्लीभिरिव, सम्पर्कं - सम्मेलनम्, याति - प्राप्नोति, तावद्रथम् - स्थापयेति पूर्वेणान्वयः ।

सूत इति। सूतः प्राह। आयुष्मान् - दीर्घायुष्यवान् राजा, यदाज्ञापयति-यन्नियोजयति, तत्करोमीति वाक्यशेषः, इति - एवमुक्त्वा, यथोक्तं - यथाज्ञप्तं, करोति - रथं स्थापयतीत्यर्थः।

अप्सरस इति। अप्सरसः - ऊर्वशीप्रभृतयः कथयन्ति। किमिति। महाराजः - पुरूरवाः, दिष्ट्या - अस्मद्भागधेयेन, विजयेन - राक्षसपरिभवेन, वर्धते - प्रवर्धते।

राजेति। राजा वक्ति। हे अप्सरसः, भवत्यश्च - यूयमपि, सखीसङ्गमेन-सहचरीसमागमेन, दिष्ट्यावर्धन्त इति वाक्यशेषः।

In Public domain. Digitization Muthulakshmi Research Academy

ऊर्वशी - (चित्रलेखावलम्बितहस्तारथादवतीर्य) हळा इदोपीडिदं मंपरिस्सजध - णहिमे आसीआसंसाभूओविसही अणं पेक्खिस्सन्ति **(सख्य इतः पीडितां मां परिष्वजत - नहि मे आसीदाशंसा भूयोपि सखी जनं द्रक्ष्यामीति)।**

(सर्वास्सत्वरं परिष्वजन्ते)

रम्भा - (साशंसम्) सव्वधामहारा ओकप्पसदाणिवुढविंपाळ अंतोभोदु **(सर्वधा महाराजः कल्पशतानि पृथिवीं पालयन् भवतु)।**

सूतः - आयुष्मन् पूर्वस्यां दिशि महता रथवेगेन श्रूयते शब्दः।

ऊर्वशीति। ऊर्वशी। चित्रलेखावलम्बितहस्ता - चित्रलेखया - तन्नाम्न्या सख्या, अवलम्बितः - उपष्टम्भीकृतः, हस्तः - करोयस्यास्सा तथोक्ता, रथात्- स्यन्दनात्, अवतीर्य - आवरुह्य वक्ति, हे सख्यः - सहचर्यः, इतः - इमं देशं मत्समीपमित्यर्थः, आगत्येति शेषः, पीडितां - राक्षसैर्बाधितां, मां परिष्वजत - परिरम्भणं कुरुत, भूयः - पुनरपि, सखीजनं - प्रियसहचरीवर्गं, द्रक्ष्यामि - अवलोकयिष्यामि, इति - एवम्भूता, आशंसा - आशयोपि, मे - मम, नासीद्धि- नाभूत्खलु।

सर्वा इति। सर्वा अप्सरसः, सत्वरं - अविलम्बितं, परिष्वजन्ते - परिरभन्ते।

रम्भेति। रम्भा। साशंसं - साभिलाषं, प्राह, किमिति। महाराजः, कल्पशतानि - शतसंख्याकाङ्कल्पान्, पृथिवीं - भूमिं, सर्वधा - सर्वप्रकारैः, पालयन् - रक्षन्, भवतु - तिष्ठतु।

सूत इति। सूतः प्राह। हे आयुष्मन् - दीर्घायुर्विशिष्टराजन्, पूर्वस्यां दिशि - प्राग्दिशि, महता - अधिकेन, रथवेगेन - स्यन्दनरयेण, शब्दः -

In Public domain. Digitization Muthulakshmi Research Academy

अयञ्च गगनात्कोऽपि तप्तचामीकराङ्गदः।
अवरोहति शैलाग्रात्तटित्वानिव तोयदः॥ 15॥

(सर्वे पश्यन्ति)

अप्सरसः - अम्हो चित्तरहो **(अहो चित्ररथः)**। (ततः प्रविशति चित्ररथः)

चित्ररथः - (राजाभिमुखं स्थित्वा सबहुमानम्) **दिष्ट्या महेन्द्रोपकार-पर्याप्तेन विक्रममहिम्ना वर्धते भवान्।**

राजा - **स्वागतं प्रियसुहृदे** (परस्परं हस्तौ स्पृशतः)।

~~~~~~

निनादः, श्रूयते - आकर्ण्यते। अयमिति। गगनात् - अन्तरिक्षात्, तप्तचामीकराङ्गदः - शोधितस्वर्णकेयूरः, कोऽपि - कश्चित्, अयं - पुरुषश्च, शैलाग्रात्- नगशृङ्गात्, तटित्वान् - विद्युत्सहितः, तोयदः - जलद इव, अवरोहति - अवतरति।

तत्र स्थिता राजादयः, पश्यन्ति - अवलोकयन्ति।

अप्सरस इति। अप्सरस आहुः। चित्ररथः - चित्ररथो नाम गन्धर्वः, समागत इति शेषः, अहो इत्याश्चर्ये। आकस्मिकागमनादाश्चर्यम्। तत इति। ततोऽनन्तरं, चित्ररथः - तन्नामा गन्धर्वः, प्रविशति - रङ्गस्थलमधितिष्ठति।

चित्ररथ इति। चित्ररथः। राजाभिमुखं - राज्ञः पुरूरवसः प्रतिमुखं यथा तथा, स्थित्वा - वर्तित्वा, प्राह। किमिति। सबहुमानम् - सगौरवं, महेन्द्रोपकार-पर्याप्तेन - शक्रोपकृतिसमर्थेन, विक्रममहिम्ना - पराक्रमातिशयेन, भवान्, दिष्ट्या - भाग्येन, वर्धते - अभिवृद्धिं प्राप्नोति।

राजेति। राजा प्राह। प्रियसुहृदे - इष्टमित्राय, स्वागतम् - शुभागमनं कच्चित्, इत्युक्त्वा परस्परमन्योन्यं, हस्तौ - करौ, स्पृशतः - ग्राहयतः।
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

चित्ररथः - वयस्य केशिनाहृतामूर्वशीं नारदादुपलभ्य प्रत्याहरणार्थ-मस्याश्शतक्रतुना गान्धर्वसेना समादिष्टा - ततो वयमन्तरा-चारणेभ्यः स्वकीयं जयोदाहरणमुपलभ्य त्वामिहस्थं द्रष्टुमागताः - स भवानिमां पुरस्कृत्य सहास्माभिर्मघवन्तं द्रष्टुमर्हति - महत्खलु मघवतः प्रियमनुष्ठितम् ।

पुरा नारायणेनेयमतिसृष्टा मरुत्वते ।
दैत्यहस्तादवच्छिद्य सुहृदा सम्प्रति त्वया ।। 16 ।।

~~~~~~

चित्ररथ इति । चित्ररथः कथयति । किमिति । हे वयस्य - हित, नारदात् - ब्रह्मपुत्रात्मनेः, ऊर्वशीं, केशिना - तन्नामकराक्षसेन, हृतां - अपनीतां, उपलभ्य - ज्ञात्वा, अस्या - ऊर्वश्याः, प्रत्याहरणार्थं - प्रत्यानयनार्थं, शतक्रतुना-इन्द्रेण, गान्धर्वसेना - गन्धर्वसम्बन्धिनीचमूः, समादिष्टा - नियुक्ता, ततोऽनन्तरं, वयं, चारणेभ्यः - वार्तावहेभ्यः, अन्तरा - मार्गमध्ये, स्वकीयम् - आत्मीयम्, जयोदाहरणं - जयप्रतिपादकवाक्यजातं, उपलभ्य - आकर्ण्य, इहस्थम् - अस्मिन् हेमकूटे स्थितं, त्वाम् - भवन्तं, द्रष्टुं - प्रेक्षितुं, आगताः - प्राप्ताः, सः - राक्षस-जेता, भवान्, इमामूर्वशीं, पुरस्कृत्य - अग्रे निधाय, अस्माभिस्सह - अस्माभिस्साकं, मघवन्तम् - देवेन्द्रं, द्रष्टुं - वीक्षितुम्, अर्हति - उचितो भवति । कस्मादिति चेत्, मघवतः - पाकशासनस्य, महत् - अधिकं, प्रियं - इष्टम्, अनुष्ठितं खलु - विहितं हि, भवतेति शेषः ।

पुरेति । पुरा - पूर्वस्मिन्काले, नारायणेन - तदाख्यमुनिना, इयमूर्वशी, मरुत्वते - इन्द्राय, अतिसृष्टा - दत्ता, सम्प्रति - इदानीं, सुहृदा - मित्रेण, त्वया - भवता, दैत्यहस्तात् - दानवकरात्, अवच्छिद्य - आमोच्य, अतिसृष्टेति-पदमत्राप्यनुषञ्जनीयम् ।
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

राजा - मामैवम् ।

ननु वज्रिण एव वीर्यमेतद्विजयन्ते द्विषतो यदस्य पक्ष्याः ।
वसुधाधरकन्दराभिसर्पी प्रतिशब्दोऽपि हरेर्भिनत्ति नागान् ।। 17।।

चित्ररथः - युक्तमेतत्, अनुत्सेकः खलु विक्रमालङ्कारः ।

राजा - सखे ! नायमवसरश्शतक्रतुं द्रष्टुम् - त्वमेवात्र भवतीं प्रभोरन्तिकं प्रापय ।

चित्ररथः - यथा भवान् मन्यते - इत इतो भवत्यः (अप्सरसः प्रस्थिताः)।

राजेति । राजा प्राह । एवम् - अनेन प्रकारेण, मा - न वक्तव्यमित्यर्थः, भृशार्थे द्विरुक्तिः । नन्विति । ननु - भो, एतत् - इदं, वीर्यं - माहात्म्यम्, वज्रिणः - इन्द्रस्यैव, न तु ममेत्यवधारणार्थः, अस्य - इन्द्रस्य, पक्ष्याः - अनुचराः, सू ।। ''दिगादिभ्यो यदि''ति भवार्थे यत्प्रत्ययः, द्विषतः - शत्रून्, विजयन्ते - परिभवन्तीति यत्, एतदिति पूर्वेण सम्बन्धः, तथाहि, वसुधाधरकन्दराभिसर्पी - शैलगुहाव्यापी, हरेः - सिंहस्य, प्रतिशब्दः - प्रतिध्वनिरपि, नागान् - गजान्, नि ।। ''गजेऽपिनागमातङ्गावि''त्यमरः, भिनत्ति - विदारयति ।

चित्ररथ इति । चित्ररथो वदति । एतत् - इदं वचनं, युक्तम् - उचितम्, अनुत्सेकः - अनौद्धत्यं, प्रागल्भ्याभाव इति यावत्, विक्रमालङ्कारः खलु - पराक्रमाभरणं हि ।

राजेति । राजा प्राह । हे सखे - चित्ररथ, शतक्रतुमिन्द्रं द्रष्टुं - प्रेक्षितुम्, अयमवसरः - समयो न भवति, अत्र भवतीं - पूज्यामूर्वशीं, प्रभोः - ईश्वरस्य, अन्तिकं - समीपं, त्वमेव प्रापय - नय ।

चित्ररथ इति । चित्ररथो वक्ति । भवान्, यथा - येन प्रकारेण, मन्यते

In Public domain. Digitization Muthulakshmi Research Academy

ऊर्वशी - (जनान्तिकम्) हलाचित्तळेहे उअआरिणं राएसिंण सक्कुणोमि आमंतिदुं, तुमं मेमुहं होहि **(सखि, चित्रलेखे उपकारिणं राजर्षिं न शक्नोम्यामन्त्रयितुं त्वं मे मुखं भव)।**

चित्रलेखा - (राजानमुपेत्य) महाराअ! उव्वसीविण्णवेज, महारा एणअब्भणुण्णादा इच्छामि महारा अस्सकित्तिंपि असहिंवि अमहिंदलो अंणेदुं **(महाराज! ऊर्वशी विज्ञापयति, महाराजेनाभ्यनुज्ञाता इच्छामि महाराजस्य कीर्तिं प्रियसखीमिव महेन्द्रलोकं नेतुम्)।**

~~~~~~

- आलोचयति, तथा भवत्विति वाक्यशेषः, सू।। ''शेषे प्रथम'' इति प्रथमपुरुषः, भवच्छब्दोऽपि शेष एव - युष्मदस्मद्व्यतिरिक्तत्वात्, भवत्यः, इतइतः - अनेनानेन मार्गेण आगच्छन्त्विति शेषः। (अनन्तरम्, अप्सरसः - ऊर्वशीप्रमुखाः, प्रस्थिताः- प्रयाताः)।

ऊर्वशीति। ऊर्वशी। जनान्तिकम् मिथः कथयति। किमिति। हे सखि - सहचरि, चित्रलेखे, उपकारिणं - क्षेमकारिणम्, अस्माकमिति शेषः। राजर्षिं- पुरूरवसं, आमन्त्रयितुम् - अनुज्ञामधिगन्तुं, न शक्नोमि - समर्था न भवामि, तस्मात्, त्वं, मे - मम, मुखं - मुखस्थानीयं, भव - एधि, जनान्तिकं नाम। त्रिपताकाहस्तेन मुखमाच्छाद्य परस्परसम्भाषणम्। तल्लक्षणं यथा - ''त्रिपताका-करेणान्यानपवार्यान्तरा कथाम्। अन्योन्यामन्त्रणं यत्स्यात्तज्जनान्तिकमिष्यत इति।

चित्रलेखेति। चित्रलेखा। राजानं - नृपम्, उपेत्य - प्राप्य, प्राह, हे महाराज ऊर्वशी, विज्ञापयति - निवेदयति। किमिति। अहं, महाराजेन, अभ्यनुज्ञाता - आज्ञप्ता सती, महाराजस्य - प्रभोः, कीर्तिं - यशः, प्रियसखीं - इष्टसहचरीमिव, महेन्द्रलोकं - सुरलोकं प्रति, नेतुं - प्रापयितुम्, इच्छामि - अभिलषामीति पूर्वेणान्वयः।
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

राजा - गम्यतां पुनर्दर्शनाय। (सर्वास्सगन्धर्वा आकाशोत्पतनं रूपयन्ति)।

ऊर्वशी - (उत्पतनभङ्गं रूपयित्वा) अम्होळदाविडवेमेए आवळीळग्गा (परिवृत्य राजानं पश्यन्ती) चित्तळेहेमो एहिदावणं (**अहो लता विटपे मे एकावलीलग्ना। चित्रलेखे मोचय तावदेनाम्**)।

चित्रलेखा - (सस्मितम्) दिढंखुलग्गा, दुम्मो अणिज्ञा एव्ववडिभादि, भोदुजदिस्संदाव (**दृढं खलु लग्ना, दुर्मोचनीयैव प्रतिभाति, भवतु यतिष्ये तावत्**) ॥

ऊर्वशी - सहिणविसुमरेहि दावअत्तणोवअणं (**सखि न विस्मर तावदात्मनो वचनम्**)।

~~~~~~

राजेति। राजा वदति। पुनर्दर्शनाय - भूयः प्रेक्षणाय, गम्यतां - ईयतां, युष्माभिरित्यध्याहारः। अकर्मकत्वाद्भावे लोट्। अकर्मकत्वं चात्र प्रसिद्धेः। अनन्तरं, सगन्धर्वाः - गन्धर्वसहिताः, सर्वा अप्सरसः, आकाशोत्पतनम् - आकाशयानं, रूपयन्ति - नाटयन्ति।

ऊर्वशीति। ऊर्वशी। उत्पतनभङ्गं - आकाशयानप्रतिबन्धं, रूपयित्वा - अभिनीय, वक्ति। लताविटपे - वल्ल्युपशाखायां, मे - मम, एकावली - हारविशेषः, नि॥ ''एकावल्येकयष्टिके''त्यमरः, लग्ना - सक्ता, अहो - आश्चर्यम्, इत्युक्त्वा, परिवृत्य - पश्चान्मुखं प्रसार्य, राजानं - पुरूरवसं, पश्यन्ती - विलोकयन्ती सती प्राह, हे चित्रलेखे, त्वं - तावदिदानीम्, एनाम् - शाखालग्नां एकावलीं, मोचय - विस्रंसय।

चित्रलेखेति। चित्रलेखा वक्ति। दृढं - कठिनं यथा तथा, लग्ना खलु - सक्ता हि, अत एव, दुर्मोचनीया - मोचयितुमशक्यैव, प्रतिभाति - भासते, तथापि, भवतु - दुर्मोचनीयैवास्तु, यतिष्ये - यत्नं करिष्ये, तावत् - मोचयितुमिति भावः।
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

(चित्रलेखा नाट्येन मोचयति)

राजा - (स्वगतम्)

प्रियमाचरितं लते त्वया मे गमनेऽस्याः क्षणविघ्नमाचरन्त्या।
यदियं पुनरप्यरालनेत्रा परिवृत्तार्थमुखी मया हि दृष्टा ॥ 18 ॥

सूतः - आयुष्मन्,

अधस्सुरेन्द्रस्य कृतापराधान् प्रक्षिप्य दैत्यान् लवणाम्बुराशौ।
वायव्यमस्त्रं शरधिं पुनस्ते महोरगश्श्वभ्रमिव प्रविष्टम् ॥ 19 ॥

ऊर्वशीति। ऊर्वशी कथयति। किमिति। हे सखि - सहचरि, आत्मनः - स्वस्याः, वचनं - वाक्यं, सविस्मर - विस्मृतिं न प्राप्नुहि तावत्।

चित्रलेखेति। चित्रलेखा। नाट्येन मोचयति - एकावलीमोचनमभिनयतीत्यर्थः।

राजेति। राजा - पुरूरवाः, स्वगतम् - आत्मगतम्, प्रियमिति। हे लते - वल्लि, अस्याः - ऊर्वश्याः, गमने - याने, क्षणविघ्नं - क्षणकालं प्रतिबन्धम्, आचरन्त्या - कुर्वन्त्या, त्वया - भवत्या, मे - मह्यं, प्रियम् - इष्टम्, आचरितं-कृतम्, यत् - यस्मात्, मया अरालनेत्रा - वक्रनयना, नि॥ ‘‘अरालं वृजिनं जिह्ममि’’त्यमरः, इयं - ऊर्वशी, परिवृत्तार्धमुखी - पश्चात्प्रसारितमुखार्धभागा सती, पुनर्भूयोपि, दृष्टा - प्रेक्षिता हि।

सूत इति। सूतः प्राह। हे आयुष्मन् - दीर्घायुर्विशिष्टमहाराज। अथ इति। ते - तव, वायव्यं - वायुदेवताकम्, अस्त्रं - शस्त्रं, सुरेन्द्रस्य - देवेन्द्रस्य, कृतापराधान् - विहितागसः, दैत्यान् - राक्षसान्, लवणाम्बुराशौ - लवणवारिनिधौ, अधः - अधः प्रदेशे, प्रक्षिप्य - निपात्य, पुनः - भूयः, शरधिं - तूणीरं, महोरगः - महासर्पः, श्वभ्रं - बिलमिव, प्रविष्टं - प्राप्तम्।

In Public domain. Digitization Muthulakshmi Research Academy

राजा - तेन हि उपश्लेषय रथं तावदारोहामि (सूतस्तथा करोति, राजा नाट्येन रथमारूढः)।

ऊर्वशी - (राजानमवलोक्य सनिश्श्वासं सख्या सह प्रस्थिता, चित्ररथश्चेतरा अप्सरसश्च)

राजा - ऊर्वशी मार्गोन्मुखः अहो दुर्बलानुषङ्गी मे मनोरथः -

एषा मनो मे प्रसभं शरीरात्पितुः पदं मध्यममुत्पतन्ती।
सुराङ्गना कर्षति खण्डिताग्रात्सूत्रं मृणालादिव राजहंसी ॥20॥

(इति निष्क्रान्तास्सर्वे)

॥ इति प्रथमोऽङ्कः॥

राजेति। राजा प्राह। हे सूत, रथं - स्यन्दनं, तावत् - तावत्कालं, तेन-हेतुना, उपश्लेषय - संस्थापय हि, यावदारोहामि - अधिरोक्ष्यामि, अनन्तरं सूतः, तथा - तेन प्रकारेण, करोति - विदधाति, राजा, नाट्येन - अभिनयेन, रथं - स्यन्दनम्, आरूढः - अधिष्ठितः।

ऊर्वशीति। ऊर्वशी। राजानं - पुरूरवसम्, अवलोक्य - वीक्ष्य, सख्या सह - सहचर्यासाकम्, नि।। ''साकं सत्रा समं सहे''त्यमरः, प्रस्थिता - प्रयाता, कथं, सनिश्श्वासं - निश्श्वाससहितं यथा तथा, निश्श्वासकारणं तु - राज्ञा सह वियोगासहनमिति ज्ञेयम्, चित्ररथः - एतदानयनार्थमागतस्तन्नामको गन्धर्वश्च, इतराः - चित्रलेखोर्वशीव्यतिरिक्ताः, अप्सरसः - सुराङ्गनाश्च, प्रस्थिता इति बहुवचनविपरिणामे नानुषङ्गः।

राजेति। अनन्तरं, राजा - ऊर्वशीमार्गोन्मुखः - ऊर्वशीवर्त्माभिमुखस्सन् कथयति। किमिति। मे - मम, मनोरथः - वाञ्छा, दुर्बलानुषङ्गी - दुर्लभविषयः,

In Public domain. Digitization Muthulakshmi Research Academy

अहो - आश्चर्यम्, मनुष्यस्य सुराङ्गना प्रार्थनाया असुलभत्वादिति भावः। एषेति। मध्यमं - मध्ये भवं, पितुर्नारायणमुनेः, पदं - स्थानम्, आकाशं प्रतीत्यर्थः, उत्पतन्ती - उत्प्लुत्य गच्छन्ती, एषा - पुरस्थिता, सुराङ्गना - ऊर्वशी, प्रसभं - बलेन, नि।। ''प्रसभस्तु बलात्कार'' इत्यमरः, मे - मम, शरीरात् - देहात्, मनः - चित्तं, राजहंसी - राजहंसाङ्गना, खण्डिताग्रात्- त्रुटितमुखात्, मृणालात् - बिसात्, सूत्रं - तन्तुमिव, कर्षति - आहरति।

इतीति। इति - एवमुक्त्वा, सर्वे - राजादयः, निष्कान्ताः - निर्गताः।

।। इति श्रीमन्मृत्युञ्जयनिश्शङ्कक्षितिपालविरचिते
विक्रमोर्वशीयव्याख्याने रत्नदीपिका समाख्याने प्रथमोऽङ्कः ।।

In Public domain. Digitization Muthulakshmi Research Academy

॥ द्वितीयाङ्कः ॥

(ततः प्रविशति विदूषकः)

***विदूषकः - हिहीभोणिमंतणेक्क परवसोबम्हणो विअराअरहस्सेण उग्घाडिअमाणो णसक्कुणोमि आकिण्णे अत्तणोजीहंरक्खिदुं - ताजाव तत्थभवं वअंसोकज्ञासणगदोचिट्ठदिदाव अस्सिं विरळजणसंपादे विमाणपडि च्छंदपरिसरे चिट्ठिस्सं** (ही ही भोः निमन्त्रणैकपरवशो ब्राह्मण इव राजरहस्येनोद्धाट्यमानो न शक्नोम्याकीर्णे आत्मनो जिह्वां रक्षितुं तद्यावत्तत्र भवान् वयस्यः कार्यासनगतस्तिष्ठति तावदस्मिन् विरलजनसम्पाते विमानप्रतिच्छन्दपरिसरे स्थास्यामि - परिक्रम्योपविश्य बाहुभ्यां मुखं पिधाय स्थितः)।

(ततः प्रविशति चेटी)

चेटी - आणत्तम्हि देवीए कासिराअदुहिदाए जधा - हञ्जे णिउणिए जदोपहुदि भअवदो सुज्ञस्स उवट्ठाणं कदुअ पडिणिवुतो महाराओ तदोपहुदि सुण्णहिअओ विअ लक्खीअदि। ता मुमं विदाव अज्ञमाणवआदो जाणाहि से उक्कंठाकारणं ति। ता कहं सो बम्हबंधू अदिसंघादव्वो। अहवा तणग्गलग्गं विअ ओसाअसलिलं ण तस्सिं राअरहस्सं चिरं चिट्ठदि त्ति तक्केमि। ता जाव णं अण्णेसामि (परिक्रम्यावलोक्य च) अम्मो, आलेक्खवाणरो विअ किं पि मंतअंतो णिहुदो अज्ञमाणवओ चिट्ठदि ता जाव णं उवसप्पामि। (उपसृत्य) अज्ञ वंदामि **(आज्ञप्ताऽस्मि देव्या काशिराजदुहित्रा यथा हञ्जे निपुणिके, यतःप्रभृति भगवतः सूर्यस्योपस्थानं कृत्वा प्रतिनिवृत्तो महाराज-**

---

* विदूषकः, चेटी - पात्रद्वयस्य व्याख्या नोपलभ्यते।

In Public domain. Digitization Muthulakshmi Research Academy

स्ततःप्रभृति शून्यहृदय इव लक्ष्यते। तत् त्वमपि तावदार्यमाणवकाज्ज्ञानीह्यस्योत्कण्ठाकारणमिति। तत् कथं स ब्रह्मबन्धुरतिसन्धातव्यः। अथवा तृणाग्रलग्नमिवावश्यायसलिलं न तस्मिन् राजरहस्यं चिरं तिष्ठतीति तर्कयामि। तद् यावदेनमन्वेषयामि। अहो, आलेख्यवानर इव किमपि मन्त्रयन्निभृत आर्यमाणवकस्तिष्ठति। तद् यावदेनमुपसर्पामि। आर्य, वन्दे)।

विदूषकः - सोत्थिभोदीए (स्वगतम्) इमंदुट्ठचेडिअंपेक्खि अअंतरारा अरहस्संहि अअंभिंदि अणिक्कामदि (प्रकाशम्) णिउणिए संगीदवावारं उज्झिअकहिंपत्थिदासि (**स्वस्ति भवत्यै ... इमां दुष्टचेटीं दृष्ट्वा अन्तरा राजरहस्यं हृदयं भित्वा निष्क्रामति ... निपुणिके सङ्गीतव्यापारमुज्झित्वा कुत्र प्रस्थितासि**)।

निपुणिका - देवी एवअणेणअय्यं एव्वपेक्खिदुं (**देव्यावचनेनार्यमेव प्रेक्षितुम्**)।

विदूषकः - किंतत्थभोदी आणवेदि (**किं तत्र भवत्याज्ञापयति**)।

विदूषक इति। विदूषको ब्रवीति। किमिति। भवत्यै - तुभ्यं, स्वस्ति - शुभं भवत्विति शेषः, सू।। ''नमस्स्वस्ती''त्यादिना चतुर्थी, स्वगतम् - आत्मगतम्, इमां - पुरस्थितां, दुष्टचेटीं - परिचारिकाम्, दृष्ट्वा - वीक्ष्य, राजरहस्यं - राजोक्तं मर्म, अन्तरा - अन्तःकरणे, हृदयं - मानसं, भित्त्वा - विदार्य, निष्क्रामति - निर्गच्छति, प्रकाशम् - सर्वश्राव्यं यथा तथा, हे निपुणिके सङ्गीतव्यापारं - गानप्रचारम्, उज्झित्वा - त्यक्त्वा, कुत्र प्रस्थितासि - क्व गच्छसि ।

निपुणिकेति। निपुणिका वक्ति। देव्याः - महिष्याः, वचनेन - निदेशेन, आर्यं - पूज्यं, त्वामेव, प्रेक्षितुम् - अवलोकयितुं, प्रस्थितास्मीति सम्बन्धः।

विदूषक इति। विदूषको ब्रूते। तत्र भवती - पूज्या देवी, किमाज्ञापयति-नियोजयति, वदेति शेषः।

In Public domain. Digitization Muthulakshmi Research Academy

निपुणिका - देवी भणदिसदाविअय्योमइपक्खवादी, णकदाविमं अणुभूदवे अणंदुक्खिदं ओळोअदित्ति (**देवी भणति सदाप्यार्यो मयि पक्षपाती न कदापि मामनुभूतवेदनां दुःखितामवलोकत इति**)।

विदूषकः - किंवावअंसेण तत्थभोदी एपडिऊलंआअरिदं (**किं वा वयस्येन तत्रभवत्यै प्रतिकूलमाचरितम्**)।

निपुणिका - अय्यजण्णिमित्तं उणभत्ता उक्कंठिदोताए इत्थिआ एणामग्गहणेण भत्तुणादेवी आळविदा (**आर्य! यन्निमित्तेन भर्ता उत्कण्ठितस्तस्यास्स्त्रिया नामग्रहणेन भर्त्रा देव्यालपिता**)।

विदूषकः - (स्वगतम्) कधं सअंएव्वतत्थ भवदारहस्सणिब्भेदो कदो,

निपुणिकेति। निपुणिका वदति। देवी भणति - ब्रवीति, सदा - सर्वदापि, मयि विषये, पक्षपाती - दयालुः, आर्यः - राजा, अनुभूतवेदनां - प्राप्तविरहपीडां, दुःखितां - व्यथितां, मां, कदा - कस्मिन्नपि काले, नावलोकते - न पश्यतीति पूर्वेणान्वयः।

विदूषक इति। विदूषक आह। वयस्येन - स्निग्धेन राज्ञा, तत्रभवत्यै-देव्यै, किं वा प्रतिकूलमप्रियम्, आचरितं - कृतम्।

निपुणिकेति। निपुणिका वदति। हे आर्य - पूज्य, भर्ता - राजा, यन्निमित्तेन - येन कारणेन, उत्कण्ठितः - उत्कण्ठां प्राप्तः, उत्कण्ठानाम -

श्लो॥ रागेत्वलभ्यविषये वेदना महती तु या।
संशोषणीतु गात्राणां तामुत्कण्ठां विदुर्बुधाः॥

इत्युक्तलक्षणा, तस्याः स्त्रियाः - योषितः, नामग्रहणेन - नामधेयोच्चारणेन, भर्त्रा - पत्या, देवी - पट्टमहिषी, आलपिता - आहूता।

विदूषक इति। विदूषकः। स्वगतम् - आत्मगतम्, तत्र भवता - पूज्येन

In Public domain. Digitization Muthulakshmi Research Academy

किंदाणिं अहंजिहाजंतणेणदुक्खं अणुभोमि (प्रकाशम्) आमंतिदा किंतत्थभोदी उव्वसित्ति (**कथं स्वयमेव तत्र भवता रहस्यनिर्भेदः कृतः, किमिदानीमहं जिह्वायन्त्रणेन दुःखमनुभवामि ..... आमन्त्रिता किं तत्र भवत्यूर्वशीति**)।

निपुणिका - अधकिं (**अथ किम्**)।

विदूषकः - अच्छराएदंसणेण तत्थभवं उम्मादिओणकेवलं तत्थ भोदिं, मंविपि अंहित्ताविणोविमुहोदिढं पीडेदि (**अप्सरसो दर्शनेन तत्र भवानुन्मादितो न केवलं तत्रभवतीं मामपि प्रियं हित्वा विनोद-विमुखो दृढं पीडयति**)।

निपुणिका - (आत्मगतम्) किदंम एजोएणभे अणंभत्तुणोरहस्सदुग्गस्स

राज्ञा, स्वयं - स्वेनैव, रहस्यनिर्भेदः - गोप्यच्छेदनं, कथं - केन वा हेतुना, कृतः - विहितः, अहं, इदानीम् - अद्य, जिह्वायन्त्रणेन - रसनानियमनेन, दुःखं - व्यथां, किं - केन हेतुना, अनुभवामि - लभेय, प्रकाशम् - प्रकटं यथा तथा प्राह, तत्र भवती - राज्ञी, ऊर्वशीति आमन्त्रिता - आकारिता किम् ।

निपुणिकेति। निपुणिका कथयति। अथ किम् - तथैवेत्यर्थः ।

विदूषक इति। विदूषको ब्रवीति। किमिति। तत्र भवान् - पूज्यो राजा, अप्सरसः - ऊर्वश्याः, दर्शनिन - विलोकनेन, उन्मादितः - चित्तविभ्रमं प्रापितस्सन्, तत्रभवतीं केवलं - पूज्यां देवीमेव, न पीडयति - न क्लेशयति, किन्तु, विनोद-विमुखः - विनोदेषु - सम्यक्तोषकारणेषु, विमुखः - पराङ्मुखस्सन्, प्रियं - दयितं, मामपि, हित्वा - त्यक्त्वा, दृढं - भृशं, पीडयति - व्यथयति।

निपुणिकेति। निपुणिका - तन्नाम्नी चेटी, आत्मगतम् - स्वगतम्, मया, भर्तुः - स्वामिनः, रहस्यदुर्गस्य - गोप्यदुर्गमस्थानस्य, सू।। "अत्र रोरीति

In Public domain. Digitization Muthulakshmi Research Academy

(प्रकाशम्) किंदावदेवीएणिवेदेमि (**कृतं मया योगेन भेदनं भर्तुरहस्य दुर्गस्य ... किं तावद्देव्यै निवेदयामि**)।

विदूषकः - णिउणिए! विण्णवेहितत्थहोदीए जदिस्संदावमि अतिण्हि आदोणि वत्तेदुंवअंसंति, तदोदेविं पेक्खिस्संति (**निपुणिके ! विज्ञापय तत्रभवत्यै यतिष्ये तावन्मृगतृष्णिकातो निवर्तयितुं वयस्यमिति - ततो देवीं द्रक्ष्यामीति**)।

निपुणिका - **जंअय्योआणवेदि** (यदार्य आज्ञापयतीति निष्क्रान्ता)।

(नेपथ्ये वैतालिकौ) **विजयतां देवः** -

आलोकान्तात्प्रतिहततमो वृत्तिरासां प्रजानां
तुल्योद्योगस्तवदिनकृतश्चाधिकारो मतो नः।

रेफलोपे द्र्लोपे पूर्वस्य दीर्घोऽण इति दीर्घः'', भेदनं - विच्छेदनं, योगेन - उपायेन, कृतं - ज्ञातमित्यर्थः, प्रकाशम् - सर्वश्राव्यं यथा तथा आहेति शेषः, तावदिदानीम्, देव्यै - पट्टमहिष्यै, किं - कथं, निवेदयामि - विज्ञापयामि, सू।। ''क्रियाग्रहणमपि कर्तव्यमिति सम्प्रदानत्वाच्चतुर्थी''।

विदूषक इति। विदूषको वदति। हे निपुणिके - त्वं, तत्रभवत्यै - देव्यै, विज्ञापय - निवेदय, किमिति, अहं तावदिदानीम्, वयस्यं - राजानं, मृगतृष्णिकातः - मरुमरीचिकायाः, सू।। ''पञ्चम्यास्तसिल्'', तत्प्रायायास्सुराङ्गनाया इति भावः, निवर्तयितुम् - अपसारयितुं, यतिष्ये - यत्नं करिष्यामीति, ततोऽनन्तरं, देवीं, द्रक्ष्यामि - अवलोकयिष्यामीति च विज्ञापयेति पूर्वेणान्वयः।

निपुणिकेति। निपुणिका। आर्यः - मान्यः, यदाज्ञापयति - यन्नियोजयति, तत्करोमीति वाक्यशेषः, इत्युक्त्वा, निष्क्रान्ता - प्रयाता।

नेपथ्य इत्यादि। नेपथ्ये - यवनिकाभ्यन्तरे, वैतालिकौ - प्रबोधकरौ नटविशेषौ, नि।। ''वैतालिकाबोधकरावन्दिन स्तुतिपाठका'' इत्यमरः, पठत

In Public domain. Digitization Muthulakshmi Research Academy

तिष्ठत्येकं क्षणमधिपतिर्ज्योतिषां व्योममध्ये
षष्ठे भागे त्वमपि दिवसस्यात्मनश्छन्दवर्ती ॥1॥

विदूषकः - (कर्णं दत्वा) एसोकज्जासणादो उट्ठिदोपि अवअंसो इदोएव्व आअच्छदि, जावसेपासपरिवट्टीभोमि (**एष कार्यासनादुत्थितः प्रियवयस्य इत एवागच्छति, यावदस्य पार्श्वपरिवर्ती भवामि**)।

(इति निष्क्रान्तः)

इति प्रवेशकः

इति शेषः, विजयतां देवः - राजा जयतु, सू।। ''विपराभ्यां जेरि''त्यात्मनेपदम्, आलोकान्तात् - भुवनान्तपर्यन्तं, आसां - भुवनस्थितानां, प्रजानां - जनानां, नि ।। ''प्रजास्यात्सन्ततौ'' इत्यमरः, प्रतिहततमोवृत्तिः - निरस्तान्धकारव्यापारः, राजपक्षे तावत्, आलोकान्तात् - दर्शनमात्रात्, प्रतिहततमोवृत्तिः - विच्छिन्नतमोगुण प्रचारः, तस्मात्, दिक्पतस्सूर्यस्य, तव च, अधिकारः - आधिपत्यं, तुल्योद्योगः - समानव्यापारः, इति नोऽस्माकं, मतः - अभिमतः, ज्योतिषामधिपतिः - सूर्यः, व्योम मध्ये - आकाशमध्यभागे, एकं क्षणं - कालविशेषं, तिष्ठति - आस्ते, त्वमपि, दिवसस्य - दिनस्य, षष्ठे भागे - अंशे, आत्मनः - स्वस्य, छन्दवर्ती - अभिप्रायानुसारी सन्, तिष्ठसीति पुरुषविपर्यासेन सम्बन्धः।

विदूषक इति। विदूषकः। कर्ण दत्वा - श्रोत्रं प्रसार्य, वदति एष पुरोवर्ती, प्रियवयस्यः - इष्टसखो राजा, कार्यासनात् - धर्मासनतः, उत्थितः- उच्चलितस्सन्, इतः - इमं प्रदेशमेव, आगच्छति - आयाति, अस्य - राज्ञः, पार्श्वपरिवर्ती - समीपचारी, यावद्भवामि - भविष्यामीत्यर्थः। इत्युक्त्वा, निष्क्रान्तः - निर्गतः।

इतीति। प्रवेशकः। इति - समाप्तः, प्रवेशलक्षणं तु प्रागेवोक्तम्।

In Public domain. Digitization Muthulakshmi Research Academy

(ततः प्रविशत्युत्कण्ठितो राजा विदूषकश्च)

राजा -

आदर्शनात्प्रविष्टा सा मे सुरलोकसुन्दरीहृदयम्।
बाणेन मकरकेतोः कृतमार्गमवन्ध्यपातेन ॥ 2॥

विदूषकः - हद्धीसंपीडाक्खुजादातवस्सिणी एकासीराअपुत्तीए **(हा धिक् सम्पीडा खलु जाता तपस्विन्याः काशीराजपुत्र्याः)।**

राजा - अपि रक्षितो भवता रहस्य निक्षेपः।

विदूषकः - (आत्मगतम्, सविषादम्) हद्धीहद्धी अदिसंधिदोम्हि दासी

तत इति। ततः - अनन्तरं, उत्कण्ठितः - पर्युत्सुकः, राजा - पुरूरवाः, विदूषकः - माणवकाख्यश्च, प्रविशति - रङ्गस्थलं प्राप्नोतीति प्रत्येकं सम्बन्धः।

राजेति। राजा प्राह। किमिति। सा - प्रसिद्धा, सुरलोकसन्दरी - ऊर्वशी, आदर्शनात् - दर्शनादारभ्य, अवन्ध्यपातेन - अमोघप्रसारेण, मकरकेतोः - मन्मथस्य, बाणेनशरेण, कृतमार्गं - विरचितपथं, मे - मम, हृदयं - चित्तं, प्रविष्टा - प्राप्ता।

विदूषक इति। विदूषकः कथयति। हा धिक् - हेति निषादे धिगिति निन्दायां, नि॥ ''हाविषादशुगार्तिषु। धिङ्निर्भर्त्सननिन्दयो''रिति चामरः, तपस्विन्याः - राजानादराद्दीनायाः, काशीराजपुत्र्याः - देव्याः, सम्पीडा - व्यथा, जाता खलु - उत्पन्ना हि ।

राजेति। राजा प्राह। हे विदूषक, भवता - त्वया, रहस्यनिक्षेपः - रहस्यं - गोप्यं, तदेव निक्षेपः - निधिविशेषः, रक्षितः - बहिरप्रकटितोऽसि, अत्रापि शब्दः प्रश्ने।

विदूषक इति। विदूषकः, आत्मगतं - स्वगतं, सविषादं - सव्यथं,

In Public domain. Digitization Muthulakshmi Research Academy

एपुत्तिआए, अण्णहवअंसो एवंणमंपुच्छदि (**हा धिक् हा धिक् अति संहितोऽस्मि - दास्याः पुत्र्या, अन्यथा वयस्य एवं न मा पृच्छति)।**

राजा - (साशङ्कम्) **किं भवान् तूष्णीमास्ते।**

विदूषकः - एवंमएणि अंतिदाजीहा, जहावअंसस्सविसहसापडि वअणं णदेमि (**एवं मया नियन्त्रिता जिह्वा, यथा वयस्यस्यापि सहसा प्रतिवचनं न ददामि)।**

राजा - युक्तम् - अथ क्वेदानीं समुन्मनसमात्मानं विनोदयेयम्।

विदूषकः - महाणसंगच्छामो (**महानसं गच्छावः)।**

~~~~~~

हाधिक् हाधिक् - अर्थःपूर्ववत्, वीप्सायां द्विरुक्तिः, दास्याः पुत्र्या - चेटिकाया-स्सुतया, सू।। "षष्ठ्या आक्रोश" इत्यलुक्, अतिसंहितः - वञ्चितोऽस्मि, अन्यथा - तथानोचेत्, वयस्यः - राजा, एवमित्थं, मां, न पृच्छति - प्रश्नं न करोति।

राजेति। राजा पृच्छति। भवान्, किं - कुतः, तूष्णीमास्ते - जोषं तिष्ठति। प्रतिवचनं किं न ददासीति भावः।

विदूषक इति। विदूषकः प्रतिवक्ति। मया, एवमनेन प्रकारेण, जिह्वा-रसना, नियन्त्रिता - नियमिता, यथा - येन प्रकारेण, सहसा - शीघ्रं, वयस्यस्य - सुहृदन्तवापि, प्रतिवचनं - प्रतिवाक्यं, न ददामि - न वच्मि।

राजेति। राजा वदति। किमिति। युक्तम् - समीचीनं मदुक्तरहस्या प्रकाशनमिति शेषः। अथ - इतःपरं, क्व - कुत्रप्रदेशे, इदानीम् - अद्य, समुन्मनसं - सम्यगुत्कण्ठितम्, आत्मानं - स्वं, विनोदयेयं - हर्षयेयमिति सम्प्रश्ने लिङ्।
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

राजा - किं तत्र।

विदूषकः - तहिंपंचविहस्स अब्बवहारस्स उअणदसंभारस्सभा अणाइं पेक्खमाणे हिंसक्का उक्कंठाविणोदेदुं (तत्र पञ्चविधस्याभ्यवहारस्योपनतसम्भारस्य भाजनानि प्रेक्षमाणाभ्यां शक्योत्कण्ठा विनोदयितुम्)।

राजा - (सस्मितम्) तत्रेप्सितसन्निधानाद्भवान् रंस्यते, मया खलु दुर्लभप्रार्थनः कथमात्मा विनोदयितव्यः।

विदूषकः - णंभवतंतत्थहोदीए ऊव्वसी एदं सणपधंगदो? (ननु भवान् तत्रभवत्या ऊर्वश्या दर्शनपथं गतः?)।

विदूषक इति। विदूषको वदति। आवां - महानसं - पाकस्थानं प्रति, गच्छावः - प्रयावः।

राजेति। राजा वक्ति। तत्र - पाकशालायां, किं - किं वा विनोदकरं न वस्त्वस्ति।

विदूषक इति। विदूषकः प्राह। किमिति। तत्र - महानसे, उपनतसम्भारस्य - सिद्धपरिकरस्य, पञ्चविधस्य - भक्ष्यभोज्यलेह्यचोष्यपानीयभेदभिन्नस्य, अभ्यवहारस्य - भोजनसाधनस्य, भाजनानि - पात्राणि, नि।। ''पात्रामत्रे च भाजनमि''त्यमरः, प्रेक्षमाणाभ्यां - विलोकमानाभ्याम् आवाभ्यामिति शेषः, उत्कण्ठा - औत्सुक्यं, विनोदयितुं - नाशयितुं, शक्या - साध्या।

राजेति। राजा प्राह। कथम्। सस्मितं - समन्दहासं, किमिति, तत्र - महानसे, भवान्, ईप्सितसन्निधानात् - अभीष्टवस्तुसमीपावस्थानात्, रंस्यते - क्रीडिष्यते, मया, दुर्लभप्रार्थनः - आशक्येप्सितः, सुराङ्गनाविषयकत्वादितिभावः, आत्मा - स्वं, कथं खलु - केन वा उपायेन, विनोदयितव्यः - प्रमोदयितव्यः।

विदूषक इति। विदूषको वदति। भवान्। तत्रभवत्याः - मान्यायाः,

In Public domain. Digitization Muthulakshmi Research Academy

राजा - ततः किम्?।

विदूषकः - णक्खुसादुल्लहत्तितक्केमि (न खलु सा दुर्लभेति तर्कयामि)।

राजा - पक्षपाताद्दते तत्तावदवधार्यताम्।

विदूषकः - एवंमंतअं तेणभवदावड्ढिदं मेकुदूहलं, किंवा तत्थ भोदी उव्वसी अदुदी आरूवेण अहंवि अविरूवदाए? **(एवं मन्त्रयता भवता वर्धितं मे कुतूहलम् किं वा तत्र भवत्यूर्वशी अद्वितीयारूपेण अहमिव विरूपतया?)।**

राजा - माणवक! प्रत्यवयवमशक्यवर्णनां तामाकृतिमवेहि, समासतश्श्रूयताम्।

ऊर्वश्याः - तन्नामिकायास्सुरकान्तायाः, दर्शनपथं - दृष्टिमार्गं, गतो ननु - प्राप्तः किम्।

राजेति। राजा प्राह। ततः - तर्हि, किं - किं वा भवतीत्यर्थः।

विदूषक इति। विदूषको वक्ति। सा - ऊर्वशी, दुर्लभा - दुष्प्रापेति। न तर्कयामि - ऊहां न करोमि खलु।

राजेति। राजा ब्रवीति। पक्षपाताद्दते - पक्षपातं विना, सू॥ "अन्यारादितरर्त इति पञ्चमी", तत् - ऊर्वशीरूपं, तावदिदानीं, अवधार्यताम् - असाधारणत्वेन निश्चीयताम् त्वयेति शेषः।

विदूषक इति। विदूषको वदति। किमिति। एवं - पूर्वोक्तप्रकारेण, मन्त्रयता - रहसि वदता, भवता - त्वया, मे - मम, कुतूहलं - कौतुकं, वर्धितं - समेधितम्, तत्र भवती - पूज्या, ऊर्वशी, विरूपतया - रूपविहीनसत्वेन, अहमिव, रूपेण - सौन्दर्येण, अद्वितीया - समानद्वितीयवस्तुरहिता वा किम्।

In Public domain. Digitization Muthulakshmi Research Academy

विदूषकः - अवहिदोम्हि (अवहितोऽस्मि)।

राजा -

आभरणस्याभरणं प्रसाधनविधेः प्रसाधनविशेषः।
उपमानस्यापि सखे प्रत्युपमानं वपुस्तस्याः॥ 3॥

विदूषकः - अदोक्खुदिव्वरसाहिळासिणातु एचादअव्वदं पडि गहिदं - कहिन्दाणिं पत्थिदोसि? (अतःखलु दिव्यरसाभिलाषिणा त्वया चातकव्रतं प्रतिगृहीतम् - कुत्रेदानीं प्रस्थितोऽसि?)।

राजेति। राजा प्राह। हे माणवक - तन्नामकविदूषक, तां - प्रनीद्धाम्, आकृतिम् - ऊर्वशीसौन्दर्यं, प्रत्यवयवं - प्रत्यङ्गम्, अशक्यवर्णनां - वर्णयितुमशक्याम्, अवेहि - जानीहि तस्मात्, समासतः - संक्षेपेण, श्रूयताम् - आकर्ण्यतां त्वयेति शेषः। कर्मणि विध्यर्थे लोट्।

विदूषक इति। विदूषक आह। अवहितः - अप्रमत्तः, अस्मि - भवामि, वदेति शेषः।

राजेति। राजा प्रवदति। आभरणस्येति। तस्याः - ऊर्वश्याः, वपुः - शरीरं, हे सखे - मित्रमाणवक, आभरणस्य - प्रकाशकत्वेन प्रसिद्धस्त मुक्ता-हारादेः, आभरणम् - अलङ्कारः, प्रसाधननिधेः - अलङ्कारविधानस्य, प्रसाधन-विशेषः - अलङ्करणातिशयः, उपमानस्य - अधिकगुणस्य चन्द्रारविन्दादेरपि, प्रत्युपमानम् - अधिकगुणयोगात् प्रतिनिधिभूतं, सर्वातिशायिसौन्दर्यमस्या इति भावः।

विदूषक इति। विदूषकः प्राह। किमिति। हे राजन्, दिव्यरसाभिलाषिणा- दिव्यः - अप्सरस्सम्बन्धी यो रसः, शृङ्गारः तदभिलाषिणा तल्लोलुपेन, त्वया- भवता, चातकव्रतं - चातकपक्षिनियमः, नि॥ ''नियमो व्रतमस्त्री तच्चोपवासादि

In Public domain. Digitization Muthulakshmi Research Academy

राजा - वयस्य विविक्तादृतेनान्यदुत्सुकस्य मनसश्शरणमस्ति, तद्भवान् प्रमदवनमार्गं दर्शयतु।

विदूषकः - (आत्मगतम्) कागदी (प्रकाशम्) इदो इदो भवं (इति परिक्रामतः) **(का गतिः... इतो इतो भवान्)।**

विदूषकः - एदेणपमदवणचोदिदेण पच्चुग्गदोविअभवं अअंतु ओदक्खिणमारुदेण **(एतेन प्रमदवनचोदितेन प्रत्युद्गत इव भवानागन्तुको दक्षिणमारुतेन)।**

~~~~~~

पुण्यकमि''त्यमरः, अतः - अस्माद्धेतोः, प्रतिगृहीतं - स्वीकृतं खलु, चातकपक्षे दिव्यरसाभिलाषित्वं मेघोदकपानेच्छैव, इदानीमद्य, कुत्र प्रस्थितोऽसि - क्व प्रयातोऽसि ।

राजेति। राजा प्राह। किमिति। हे वयस्य - सखे, उत्सुकस्य - उत्कण्ठितस्य, मनसः - चित्तस्य, विविक्तादृते - विजनप्रदेशं विना (नि।। पृथग्विनान्तरेणर्त इत्यमरः), अन्यत् - अतिरिक्तं, शरणं - रक्षकम्, उत्कण्ठानिरासकमिति यावत्, नास्ति - न विद्यते, तत्तस्मात्, भवान्, प्रमदवनमार्गं - अन्तःपुरोचितोद्यानपथं, दर्शयतु - आलोकयतु ।

विदूषक इति। विदूषको वदति। आत्मगतं - स्वगतम्, का गतिः - को वा मार्गः, एतन्मनोनिवर्तन इति शेषः। प्रकाशम् - सर्वश्राव्यं, भवान्, इतः इतः - अनेनानेन मार्गेणेत्यर्थः, आगच्छत्विति शेषः, इत्युक्त्वा, परिक्रामतः- गच्छतः, प्रमदवनमिति शेषः ।

विदूषक इति। विदूषकः कथयति। हे राजन् - भवान्, प्रमदवन- चोदितेन - उद्यानप्रयुक्तेन, एतेन - पुरोवर्तिना, दक्षिणमारुतेन - दक्षिणदिग्भव- मलयमारुतेन, आगन्तुकः - कश्चिदतिथिरिव, प्रत्युद्गतः - प्रत्युद्यातः।
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

राजा - (विलोक्य) **उपपन्नं विशेषणमस्य वायोः - अयं हि-**

निषिञ्चन्माधवीमेतां कौन्दीं शोभां च वर्धयन्।
स्नेहदाक्षिण्ययोर्योगात्कामीव प्रतिभाति मे ।। 4 ।।

विदूषकः - ईदिसोज्ञेव्वते अभिणिवेसोभोदु (परिक्रम्य) इदं पमदवणदुवारं, पविसदुभवं **(ईदृश एव तेऽभिनिवेशो भवतु ..... इदं प्रमदवन-द्वारं, प्रविशतु भवान्)।**

राजा - प्रविशाग्रतः। (उभौ प्रविशतः)

राजेति। राजा - पुरूरवाः, विलोक्य - प्रेक्ष्य, प्राह, किमिति, अस्य - पुरोवर्तिनः, वायोः - पवनस्य, विशेषणं - दक्षिणेत्याकारकम्, उपपन्नं - युक्तं, हि - यस्मात्कारणात्, अयं - वायुः, एतां - पुरतो दृश्यमानां, माधवीं - वसन्त-शोभां, निषिञ्चन् - आर्द्रीकुर्वन्, जलशीकरैरितिशेषः, अन्यत्र एकया कान्तया सङ्गच्छन्, कौन्दीं - कुन्दसम्बन्धिनीं, शोभां - लक्ष्मीं च, वर्धयन् - पोषयन्, एकत्र पुष्पनिकासादिना, अन्यत्र हास्यकौतुकादिना उल्लासयन्, स्नेहदाक्षिण्ययोः - एकत्र सेचनदक्षिणदिग्भवत्वयोः, अन्यत्र प्रेमानुकूलत्वयोः, योगात् - सम्बन्धात्, कामी - कामुक इव, मे - मम, प्रतिभाति - भासते।

विदूषक इति। विदूषकः कथयति। हे राजन्, ते - तव, अभिनिवेशः-अभिप्रायः, ईदृशः - एतादृश एव, भवतु - स्यादिति सम्भावनायां लोट्, इत्युक्त्वा, परिक्रम्य - किञ्चिद्गत्वा वदति, किमिति, इदं - पुरस्थितं, प्रमदवन-द्वारम् - उद्यानवनप्रतीहारः, भवान्, प्रविशतु - प्राप्नोतु, उद्यानमिति शेषः।

राजेति। राजा ब्रवीति। हे माणवक त्वम्, अग्रतः - पुरतः, प्रविश - प्राप्नुहि, पश्चादहं प्रवेक्ष्यामीति वाक्यशेषः इत्युक्त्वा, उभौ - द्वौ राजविदूषकौ, प्रविशतः - उद्यानं प्रविष्टा।

In Public domain. Digitization Muthulakshmi Research Academy

राजा - (अग्रतोऽवलोक्य) **न मया समर्थितमापत्प्रतीकारः किल प्रमदोद्यानप्रवेशः -**

विविक्षुर्यदहं तूर्णमुद्यानं तन्न शान्तये।
स्रोतसेवोह्यमानस्य प्रतीपतरणं महत्॥ 5 ॥

विदूषकः - कधंविअ **(कथमिव)।**

राजा -

इदमसुलभवस्तुप्रार्थनादुर्निवारं
प्रथममपि मनो मे पञ्चबाणः क्षिणोति।

राजेति। राजा। अग्रतोऽवलोक्य - पुरतो दृष्ट्वा, वक्ति। किमिति। प्रमदोद्यानप्रवेशः - अन्तःपुरोचितोद्यानप्राप्तिः, आपत्प्रतीकारः - अनङ्गवेदनानिवारकः किल, किलेत्यलीके, नि॥ ''वार्तासम्भाव्ययोः किले''त्यमरः, एतत् मया न समर्थितं - न निर्धारितम्, तथाहि। विविक्षुरिति। अहं, यत् उद्यानं तूर्णं - त्वरितं, विविक्षुः - प्रेप्सुः, अस्मीति शेषः, तदुद्यानं, शान्तये - चित्तक्लेशशमनाय, न - न भवति, यथा, स्रोतसा - प्रवाहेन, उह्यमानस्य - धार्यमाणस्य, महत् - दूरं, प्रतीपतरणं - प्रतिकूलप्लवनमिव, तथेति पूर्वेणान्वयः।

विदूषक इति। विदूषको वदति। कथमिव - केन वा प्रकारेण शान्तये न भवतीति पूर्ववाक्यानुषङ्गः।

राजेति। राजा प्राह। किमिति। इदमिति। पञ्चबाणः - कुसुमशरः, प्रथमम् - उद्यानप्रवेशात्पूर्वमपि, असुलभवस्तुप्रार्थनादुर्निवारम् - असुलभवस्तुप्रार्थनायां - दुष्प्रापोर्वशीरूपवस्त्वभिलाषे, दुर्निवारं - निवर्तयितुमशक्यं, मे-मम, इदं मनः - चित्तं, क्षिणोति - क्षीणयति, अद्य तु, मलयवातोन्मूलिता-

In Public domain. Digitization Muthulakshmi Research Academy

किमुत मलयवातोन्मूलितापाण्डुपत्रै-
रुपवनसहकारैर्दर्शितेष्वङ्कुरेषु ॥ 6 ॥

विदूषकः - अलंपरिदेविदेण, अइरेण ते इच्छासम्पादइत्तओ अणंगो छव्व-सुहदोभविस्सदि (**अलं परिदेवि तेन, अचिरेण ते इच्छासम्पाद-यितृकोऽनङ्ग एव सुखदो भविष्यति**)।

राजा - परिगृहीतं ब्राह्मणवचनम् (इति परिक्रामतः)।

विदूषकः - पेक्खदुभवं वसंतावदारसूअअं अहिरामत्तणं पमदवणस्स (**पश्यतु भवान् वसन्तावतारसूचकमभिरामत्वं प्रमदवनस्य**)।

पाण्डुपत्रैः, मलयवातेन - दक्षिणमारुतेन, उन्मूलितानि - परिपतितानि, आपूण्डूनि-समन्ताद्धरिणवर्णानि, पत्राणि - पर्णानि येषां तैः, उपवनसहकारैः - उद्यान-चूतविशेषैः, अङ्कुरेषु - किसलयेषु, दर्शितेषु - नयनपथगतेषु सत्सु, किमुत-क्लेशयतीति किमु वक्तव्यम् ।

विदूषक इति। विदूषको वदति। हे राजन्, परिदेवितेन - ऊर्वशीं प्रति विलापेन, अलं - मास्तु, ते - तव, इच्छासम्पादयितृकः - मनोरथपरिपूरकः, अनङ्गः - मन्मथ एव, अचिरेण - चिरंविना, सुखदः - शर्मदायी, भविष्यति - सम्पत्स्यते ।

राजेति। राजा वक्ति। ब्राह्मणवचनं - विप्रभाषणम्, परिगृहीतं - स्वीकृतम्, इत्युक्त्वा, परिक्रामतः - उद्याने सञ्चरतः।

विदूषक इति। विदूषको वदति। भवान्। वसन्तावतारसूचकं - पुष्प-समयाविर्भावबोधकं, प्रमदवनस्य - उद्यानवनस्य, अभिरामत्वं - रामणीयकं, पश्यतु - विलोकयतु ।

In Public domain. Digitization Muthulakshmi Research Academy

राजा - ननु प्रतिपादपमवलोकयामि, अत्र हि -

अग्रे स्त्री नखपाटलं कुरवकं श्यामं द्वयोर्भागयो
रक्ताशोकमुपोढरागसुभगं भेदोन्मुखं तिष्ठति।
ईषद्बद्धरजः कणाग्रकपिशा चूतेन वा मञ्जरी
मुग्धत्वस्य च यौवनस्य च सखे मध्ये मधुश्रीस्स्थिता ॥ 7 ॥

विदूषकः - एसोमणिसिलापट्टअ सणाहो अदिमुंत अलदामंडवो भमरसंघट्टण पडिदेहिं कुसुमेहिं पच्छादिओस अंविअकदोवहारो भवंतं पडिच्छदि, ता अणुगेण्हि अदुदाव एसो (**एष मणिशिलापट्टकसनाथोऽतिमुक्त-**

राजेति। राजा प्रवक्ति। ननु - माणवक, प्रतिपादपं - प्रतिवृक्षम्, अवलोकयामि - पश्यामि, अत्र - उद्याने हि, अग्र इति, हे सखे - प्रियविदूषक, मधुश्रीः - वसन्तलक्ष्मीः, मुग्धत्वस्य - यौवनोदयस्य च, यौवनस्य च - निरूढ-यौवनदशायाश्च, मध्ये - अन्तरे, स्थिता - तिष्ठति स्म। नातिव्यक्ता नाप्यव्यक्तेति भावः। कथमिति चेत्। अग्रे - पुरोभागे, कुरवकं - तदाख्यं पुष्पं, स्त्रीनखपाटलं-युवतीकररुहसदृशपाटलवर्णयुक्तं, द्वयोर्भागयोः - उभयोः पार्श्वयोः, श्यामं - मेचकवर्णं सत्, दृश्यत इति शेषः, रक्ताशोकं - तदाख्यं पुष्पम्, उपोढरागसुभगं-उपोढेन - उदितेन, रागेण - महिम्ना, सुभगं - सुन्दरं, भेदोन्मुखं - विकासा-भिमुखंसत्, तिष्ठति - वर्तते, चूते - चूतवृक्षे, नवा - नूतना, मञ्जरी - पुष्प-गुच्छः, ईषद्बद्धरजःकणाग्रकपिशा - ईषद्बद्धैः - किञ्चिदुद्धूतैः, रजःकणैः - पराग-लेशैः, अग्रकपिशा - अग्रे कपिशवर्णा च, कृष्णलोहितवर्णेति भावः।

विदूषक इति। विदूषको वदति। हे राजन्। मणिशिलापट्टकसनाथः - माणिक्योपलफलकसहितः, एष पुरोवर्ती, अतिमुक्तलतामण्डपः - माधवीनिकुञ्जः, भ्रमरसंघट्टनपतितैः - षट्पदसङ्घर्षणच्युतैः, कुसुमैः - पुष्पैः, प्रच्छादितः -

In Public domain. Digitization Muthulakshmi Research Academy

लतामण्डपो भ्रमरसङ्घट्टनपतितैः कुसुमैः प्रच्छादितस्स्वयमिव कृतोपहारो भवन्तं प्रतीक्षते, तस्मादनुगृह्यतां तावदेषः)।

राजा - यथा भवते रोचते (परिक्रम्योपविशतः)।

विदूषकः - इध भवं सुहासीणोललिदलदाविलोहिअमाण णअणो उव्वसीगदं उक्कंठं विणोदेदु **(इह भवान् सुखासीनो ललितलताविलोभ्यमाननयन ऊर्वशीगतामुत्कण्ठां विनोदयतु)।**

राजा - (निश्श्वस्य)

आच्छादितः, अतएव, स्वयं - स्वेन, कृतोपहारः - विहितोपायन इव, नि॥ ''उपायनमुपग्राह्यमुपहारन्तथोपदा'' इत्यमरः, भवन्तं - त्वां, प्रतीक्षते - निरीक्षते, तस्मात्कारणात्, एषः - लतामण्डपः, तावदिदानीम्, अनुगृह्यताम् - अभ्युपपद्यताम्, भवतेति शेषः, नि॥ ''अभ्युपपत्तिरनुग्रह'' इत्यमरः।

राजेति। राजा वक्ति। भवते - तुभ्यं, यथा - येन प्रकारेण, रोचते - मनोरथो वर्तते (सू॥ रुच्यर्थानां प्रीयमाण इति सम्प्रदानत्वाच्चतुर्थी) तथा करोमीति वाक्यशेषः, इत्युक्त्वा, परिक्रम्य - किञ्चिद्गत्वा, उपविशतः - संविष्टा।

विदूषक इति। विदूषको वदति। हे राजन्, भवान्, इह - मणिशिलापट्टे, सुखासीनः - सुखेनोपविष्टस्सन्, ललितलताविलोभ्यमाननयनः - ललिताभिः - विलसिताभिः, लताभिर्वल्लीभिः, विलोभ्यमाने - आकृष्यमाणे, नयने - लोचने, यस्य स तथोक्तः, ऊर्वशीगताम् - ऊर्वशीसक्ताम्, उत्कण्ठाम् - औत्सुक्यं, विनोदयतु - अद्य विमुञ्चतु।

राजेत्यादि। राजा। निश्श्वस्य - निश्श्वासं कृत्वा। प्राह। किमिति। हे सखे - प्रिय, तद्रूपालोकदुर्ललितं - तस्या ऊर्वश्यारूपालोकेन - स्वरूपसन्दर्शनेन,

In Public domain. Digitization Muthulakshmi Research Academy

मम कुसुमितास्वपि सखे नोपवनलतासुरम्यविटपासु।
चक्षुर्बध्नातिधृतिं तद्रूपालोकदुर्ललितम् ।। 8 ।।

तदुपायश्चिन्त्यताम्, यथा सफलप्रार्थनो भवेयम् ।

विदूषकः - (विहस्य) अहल्लाकामु अस्समहिंदस्स वेज्जोजीवो, उव्वसी कामु अस्सभवदो अहंविदुवे एव्व उम्मत्तआ (**अहल्याकामुकस्य महेन्द्रस्य वैद्यो जीवः, ऊर्वशीकामुकस्य भवतोऽहमपि द्वावेवोन्मत्तौ**)।

राजा - अयि स्नेहः खलु कार्यदर्शी ।

विदूषकः - एसोचिंतेमि माउणपरिदेविदेणमे समाधिंभिंधि (इति चिन्तां

दुर्ललितम् - अस्वास्थ्ययुक्तं, मम, चक्षुः - नेत्रेन्द्रियं, कुसुमितासु - पुष्पितासु, अत एव, रम्यविटपासु - कमनीयविस्तारासु, उपवनलतासु - उद्यानस्थवृक्ष-शाखास्वपि, धृतिं - स्थैर्यं, न बध्नाति - न प्राप्नोति, तत्तस्मात्, अहं, यथा-येन प्रकारेण, सफलप्रार्थनः - फलितमनोरथः, भवेयम् - स्याम्, तथा, उपायः-साधनं, चिन्त्यताम् - आलोच्यताम् ।

विदूषक इति। विदूषकः। विहस्य - हासं कृत्वा, प्राह, अहल्या-कामुकस्य - अहल्याख्या मुनिपत्नीकामिनः, महेन्द्रस्य - देवेन्द्रस्य, वैद्यः-विद्वान्, जीवो गुरुः, यद्यपि वैद्यशब्दो भिषक्परत्वेन अमरकोशादिषु व्यवह्रियते, तथाप्यस्माभिः सामान्यतः पण्डितपरत्वेन व्याख्यातः, ऊर्वशीकामुकस्य - ऊर्वश्याख्य सुराङ्गनाकमनस्य, भवतन्तव, अहमपि - अहंचेति, द्वौ - उभावेव, उन्मत्तौ - एतत्कार्यज्ञानाभावाज्जडौ ।

राजेति। राजा वक्ति। अयि - विदूषक, स्नेहः - प्रेमैव, कार्यदर्शी खलु-कार्यज्ञानप्रदर्शको हि ।

In Public domain. Digitization Muthulakshmi Research Academy

नाटयति) (एष चिन्तयामि मा पुनः परिदेवि तेन मे समाधिं भिन्धि)।

राजा - (निमित्तं सूचयित्वात्मगतम्) -

न सुलभा सकलेन्दुमुखी च सा किमपि चेदमनङ्गविचेष्टितम्।
अभिमुखीष्विव कांक्षितसिद्धिषु व्रजति निर्वृतिमेकपदे मनः॥ 9॥

(जाताशस्तिष्ठति)

(ततः प्रविशति चित्रलेखया सार्थमाकाशगमनेनोर्वशी)

विदूषक इति। विदूषको वदति। एषः - अयमहं, चिन्तयामि - आलोचयामि, परिदेवि तेन पुनः - विलापेन तु, समाधिं - मे चित्तैकाग्रत्वं, मा भिन्धि - न विघटय, इत्युक्त्वा, चिन्तां - ऊर्वशीसङ्घटनरूपकार्यालोचनं, नाटयति- अभिनयति।

राजेति। राजा - पुरूरवाः, निमित्तं - भाविशुभलक्षणं, सूचयित्वा - ज्ञात्वा, आत्मगतं - स्वगतम्, नेति, सा - प्रसिद्धा, सकलेन्दुमुखी - पूर्णचन्द्रानना ऊर्वशी च, न सुलभा - अत्यन्तदुर्लभा, इदम्, अनङ्गविचेष्टितं - मदनविलासश्च, किमपि - केन वा हेतुना, भवतीत्यध्याहारः, मनः - चेतः, कांक्षितसिद्धिषु - वाञ्छितमनोरथप्राप्तिषु, अभिमुखीषु - सफलीभूतास्विव, एकपदे - निस्संशयं यथातथा, निर्वृतिम् - आनन्दं, व्रजति - याति, इत्यालोचयन् जाताशः - सम्भूतेप्सितस्सन्, तिष्ठति - वर्तते।

तत इत्यादि। ततोऽनन्तरम्। ऊर्वशी। चित्रलेखया सार्थं - तन्नाम्न्या सख्या सह, आकाशगमनेन - अन्तरिक्षयानेन, प्रविशति - प्राप्नोति, रङ्गस्थल- मिति शेषः, तयोर्मध्ये चित्रलेखा वदति। किमिति। हे सखि, इदानीमद्य, अनिर्दिष्टकारणम् - अनिर्धारितहेतुकं यथा यथा, कुत्र गम्यते - क्व गच्छसीत्यर्थः।

In Public domain. Digitization Muthulakshmi Research Academy

चित्रलेखा - हलादाणिं कहिं अणिद्दिट्ठकालणं गच्छीअदि? (सखीदानीं कुत्रानिर्दिष्टकारणं गम्यते?)।

ऊर्वशी - सहि तदाहेमऊडसिहरे लदाविडवेमे एआवलीलग्गामो एहित्ति भणिदासअंभणसदिढं खुलग्गाणसक्कि अदिमोचिदुंति, एवं मंतिदा उवहसिअदाणिं पुच्छसि कहिं दाणिं अणिद्दिट्ठकालणं गच्छी अदित्ति **(सखी तदा हेमकूटशिखरे लताविटपे मे एकावलीलग्ना मोचयेति भणिता स्वयं भणसि दृढं खलु लग्ना न शक्यते मोचयितुमिति, एवं मन्त्रिता उपहस्येदानीं पृच्छसि कुत्रेदानीमनिर्दिष्टकारणं गम्यत इति)।**

चित्रलेखा - किंराएसिणो पुरूरवस्ससआसंपत्थिदासि? **(किं राजर्षेः पुरूरवसस्सकाशं प्रस्थितासि?)।**

~~~~~~

ऊर्वशीति। ऊर्वशी ब्रवीति। हे सखि - प्रिये, तदा - तस्मिन्काले, हेमकूटशिखरे - हेमकूटाख्यपर्वतशृङ्गे, लताविटपे - वल्लीशाखायां, मे - मम, एकावली - हारविशेषः, लग्ना - सक्ता, तस्मात्ताम्मोचय - विघटयेति, भणिता- मया उक्ता सती, स्वयम् - आत्मना, त्वं भणसि - वदसि। किमिति। एकावली। दृढं - दार्ढ्येन, लग्ना - संसक्ता खलु, मोचयितुं - विश्लेषयितुं, न शक्यते - साध्यं न भवतीति, एवमनेन प्रकारेण, मन्त्रिता - रहसि वदन्ती, उपहस्य - परिहासं कृत्वा, इदानीमद्य, कुत्रेदानीमनिर्दिष्टकारणं गम्यत इति पृच्छसि - प्रश्नं करोषि, न जानासि किमिति योजना।

चित्रलेखेति। चित्रलेखा वक्ति। हे ऊर्वशि। राजर्षेः - राजोत्तमस्य, पुरूरवसः - तन्नाम्नो महाराजस्य, सकाशं - सन्निधिं, प्रस्थितासि - प्रयाता भवसि किम्।
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

ऊर्वशी - अम्हो! अअंमे ओहत्थिदलज्ञोववसाओ (**अहो! अयं मे अपहस्तितलज्ञो व्यवसायः**)।

चित्रलेखा - कोउणसही एतहिं पुढमं पेसिदो? (**कः पुनस्सख्या तत्र प्रथमं प्रेषितः**)।

ऊर्वशी - सहि हिअअं (**सखि हृदयम्**)।

चित्रलेखा - साहुसमवहारि अदुदावकोतुमंणिओजेदि (**साधु समवधार्यतां तावत् कस्त्वां नियोजयति**)।

ऊर्वशी - मअणोक्खुमंणिओजेइ, ताकिं एत्थसंपधारिअदि (**मदनः खलु मां नियोजयति, तत्किमत्र सम्प्रधार्यते**)।

ऊर्वशीति। ऊर्वशी ब्रूते। मे - मम, अयं व्यवसायः - राजसम्मुखगमनोद्योगः, अपहस्तितलज्ञः - हस्तावलम्बनरहितत्रपः, अगणितलज्ञ इति यावत्, अहो - आश्चर्यम्।

चित्रलेखेति। चित्रलेखा वदति। सख्या - प्रियया त्वयेति शेषः, कः पुनः - को वा, प्रथमं - पूर्वं, तत्र - राज्ञस्समीपं, प्रेषितः - प्रस्थापितः, सन्देश प्रापणार्थमिति शेषः।

ऊर्वशीति। ऊर्वशी वक्ति। हे सखि - प्रिये चित्रलेखे, हृदयं - मनः, प्रेषितमित्यनुषज्यते।

चित्रलेखेति। चित्रलेखा कथयति। किमिति। हे सखि। साधु - युक्तम्, कः। त्वाम्। नियोजयति - प्रेरयति, तस्मात्, तावदिदानीं, समवधार्यताम् - स्वास्थ्यं प्राप्यताम्, चित्तमिति शेषः, प्रियप्रार्थनां विना स्त्रीणां स्वयमभिसरणस्यानुचितत्वादित्याशयः।

ऊर्वशीति। ऊर्वशी ब्रवीति। मदनो मन्मथः। मां, नियोजयति -

In Public domain. Digitization Muthulakshmi Research Academy

चित्रलेखा - अदो अवरिणत्थिमे उत्तरं **(अत उपरि नास्ति मे उत्तरम्)।**

ऊर्वशी - तेणहि अदिसमग्गं, जेण तहिंगच्छंतीए अंतराओ णभवे **(तेन ह्यादिशमार्गं, येन तत्र गच्छन्त्या अन्तरायो न भवेत्)।**

चित्रलेखा - सहीवीसद्धा होहि, णंभअवदादेवदागुरुणा अवरा इदंणाम सिहाबंधणविज्ञं उअदिसंतेणतिदसपडि पक्खस्सअलंघणिज्ञा कदम्ह (सखि विस्रब्धा भव, ननु भगवता देवता गुरुणा अपराजितां नाम शिखाबन्धनविद्यामुपदिशता त्रिदशप्रतिपक्षस्य अलङ्घनीये कृते स्वः)।

~~~~~~

प्रेरयति खलु, तत्तस्मात्, अत्र विषये, किं - कथं, सम्प्रधार्यते - स्वास्थ्यं प्राप्यते।

चित्रलेखेति। चित्रलेखा वदति। अत उपरि - अस्मात्परं, मे - मम, उत्तरं - प्रतिवाक्यं, नास्ति - न विद्यते।

ऊर्वशीति। ऊर्वशी प्राह। हे चित्रलेखे। तेन हेतुना। मार्गं - पुरूरवसः पुरमार्गम्, आदिश - दर्शय हि, येन - पथा, गच्छन्त्याः - व्रजन्त्याः, ममेति शेषः, तत्र - मार्गमध्ये, अन्तरायः - रक्षोऽवरोधादिर्विघ्नः, न भवेत् - न स्यात्।

चित्रलेखेति। चित्रलेखा वदति। हे सखि - ऊर्वशि, त्वं, विस्रब्धा - विश्वासयुक्ता, भव - एधि, कस्मादिति चेत्, अपराजितां नाम - एतदाह्वयां, शिखाबन्धनविद्यां - मन्त्रोच्चारणपूर्वकचूडाबन्धनविद्याम्, उपदिशता - ग्राहयता, भगवता - त्रिकालवेदिना, देवतागुरुणा - सुराचार्येण, त्रिदशप्रतिपक्षस्य - राक्षसस्य, जातावेकवचनम्, सू।। ''कृत्यानां कर्तरि वे''ति षष्ठी, अलङ्घनीये - अनतिक्रमणीये, कृते - रचिते, स्वः - जाते ननु।
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

ऊर्वशी - (सलज्ञम्) सहि हिअअंसव्वं विसुमरेदि (**सखि हृदयं सर्वं विस्मरति**)।

(सिद्धमार्गमासाद्य)

चित्रलेखा - एदंभअवदीएभा ईरहीएजमुणसंगमपावणेसुं सलि लेसुं अत्ताणं ओलो अंतस्सविअपरिट्ठाणस्ससिहामंडणभूदं राएसिणो भवणं उअग दम्ह (**एतद्भगवत्या भागीरथ्या यमुनासङ्गमपावनेषु सलिलेष्वात्मानमवलोकयत इव प्रतिष्ठानस्य शिखामण्डनभूतं राजर्षेर्भवनमुपगते स्वः**)।

ऊर्वशी - (विलोक्य) णंवत्तव्वंठाणं तरगदोसग्गोत्ति (विचार्य) हलाकहिंणुखुसो आवण्णाणुकंपीभवे (**ननु वक्तव्यं स्थानान्तरगतस्स्वर्ग इति... सखि कुत्र नु खलु स आपन्नानुकम्पी भवेत्**)।

~~~~~~

ऊर्वशीति। ऊर्वशी। सलज्ञं - सव्रीडं प्राह, हे सखि - सहचरि, हृदयं - चित्तं, सर्वं - गुरूपदेशं, विस्मरति - विस्मृतिं गच्छति।

चित्रलेखेति। चित्रलेखा। सिद्धमार्गं - सिद्धानां - देवयोनिविशेषाणां, मार्गं - पन्थानम्, आसाद्य - प्राप्य, ऊर्वशीं प्रति कथयति, किमिति, भगवत्याः - पूज्यायाः, भागीरथ्याः - गङ्गानद्याः, यमुनासङ्गमपावनेषु - यमुनासङ्गमेन - कालिन्दीसम्पर्केण, पावनेषु - पवित्रेषु, सलिलेषु - जलेषु, आत्मानं - निज-स्वरूपम्, अवलोकयतः - पश्यत इव स्थितस्य, प्रतिष्ठानस्य - तन्नामकनगरस्य, शिखामण्डनभूतं - चूडामणितुल्यं, राजर्षेः - पुरूरवसः, एतत् - परिदृश्यमानं, भवनं - गृहम्, उपगते - प्राप्ते, स्वः - भवावः।

ऊर्वशीति। ऊर्वशी। विलोक्य - वीक्ष्य, प्राह। किमिति। ननु - सखि, एतद्राजभवनं, स्थानान्तरगतः - अन्यस्थानस्थितः, स्वर्गः - सुरलोक इति, वक्तव्यं - वक्तुं योग्यं, विचार्य - आलोच्य, पुनःप्राह, हे सखि - प्रिये, आपन्नानुकम्पी - विपन्नरक्षणशीलः, स राजा, कुत्र नु - क्व वा प्रदेशे, भवेत्तिष्ठेत्।
~~~~~~

In Public domain. Digitization by Lakshmi Research Academy

चित्रलेखा - एदस्सिं उणणंदणेक्कदेसेवि अपमदवणेओदरि अजाणिस्सामो **(एतस्मिन् पुनर्नन्दनैकदेश इव प्रमदवनेऽवतीर्य ज्ञास्यावः)।**

(उभे अवतरतः)

चित्रलेखा - (राजानं दृष्ट्वा सहर्षम्) हला एसोपुढमोदि ओवि अचंदोको मुदीएविअतुए विरहिदो पेक्खिअदि **(सखि एष प्रथमोदित इव चन्द्रः कौमुद्येव त्वया विरहितः प्रेक्ष्यते)।**

ऊर्वशी - (दृष्ट्वा) हळादाणिंपुढमदंसणादोसविसेसं पिअदंसणो मे पडिभादि महाराओ **(सखि इदानीं प्रथमदर्शनात्सविशेषं प्रियदर्शनो मे प्रतिभाति महाराजः)।**

~~~~~~

चित्रलेखेति। चित्रलेखा वक्ति। नन्दनैकदेशे - नन्दनोद्यानवन इव स्थिते, एतस्मिन् - अग्रवर्तिनि, प्रमदवने - उद्याने पुनः, अवतीर्य - अवरुह्य, ज्ञास्यावः - वेत्स्यावः।

उभे - ऊर्वशी चित्रलेखे, अवतरतः - सिद्धमार्गादवरोहणं नाटयतः।

चित्रलेखेति। चित्रलेखा। राजानं - पुरूरवसं, दृष्ट्वा - वीक्ष्य, सहर्षं - ससन्तोषं यथा तथा वदति, हे सखि - ऊर्वशि, एष राजा, त्वया - भवत्या, विरहितः - विप्रयुक्तस्सन्, प्रथमोदितः - प्रतिपदुदितः अत एव, कौमुद्या - चन्द्रिकया - विहीनः, चन्द्रः - इन्दुरिव, प्रेक्ष्यते - दृश्यते।

ऊर्वशीति। ऊर्वशी। दृष्ट्वा - विलोक्य वक्ति, हे सखि - चित्रलेखे, महाराजः - पुरूरवाः, प्रथमदर्शनात् - पूर्वप्रेक्षणात्, इदानीमद्य, सविशेषं - सातिशयं यथा तथा, प्रियदर्शनः - मनोहरालोकार्हः, मे - मम, प्रतिभाति - प्रकाशते।
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

चित्रलेखा - जुज्जदि, ताएहिउअसप्पा **(युज्यते, तदेह्युपसर्पावः)।**

ऊर्वशी - तिरक्खरिणीपडिच्छण्णा पासगदासेभविअसुणिस्संदाव, पासपरिवट्टिणाव अंसेणसहविअणे किंविमंत अंतोचिट्ठदि **(तिरस्करिणी प्रतिच्छन्ना पार्श्वगतास्य भूत्वा श्रोष्यामि तावत्, पार्श्वपरिवर्तिना वयस्येन सह विजने किमपि मन्त्रयमाणस्तिष्ठति)।**

चित्रलेखा - जंदेरो अदि **(यत्ते रोचते)।**

(उभे यथोक्तमनुतिष्ठतः)

विदूषकः - भोपि अवअंस चिंतिदोमए दुळ्ळहप्पणइणी समा गमोवाओ **(भो प्रियवयस्य चिन्तितो मया दुर्लभप्रणयिनी समागमोपायः)।**

चित्रलेखेति। चित्रलेखा ब्रूते। किमिति। युज्यते - प्रियदर्शनत्वं युक्तम्, तत्तस्मात्, एहि - आगच्छ, उपसर्पावः - एनमनुसरावः।

ऊर्वशीति। ऊर्वशी वदति। हे सखि। तिरस्करिणी प्रतिच्छन्ना - तदाख्य विद्यानिगूढस्वरूपा, अस्य - राज्ञः, पार्श्वगता - समीपवर्तिनी सती, अहम्, पार्श्वपरिवर्तिना - समीपस्थितेन, वयस्येन सह - मित्रेण साकं, विजने-जनरहिते प्रदेशे, भूत्वा - स्थित्वा, किमपि - किंवा, मन्त्रयमाणः - आलोचयन्, तिष्ठति - वर्तते, तावदिदानीं, श्रोष्यामि - आकर्णयिष्यामि।

चित्रलेखेति। चित्रलेखा वक्ति। ते - तुभ्यं, यद्रोचते - यदभिमतं भवति, तत्कर्तव्यं त्वयेति वाक्याध्याहारः।

उभे - द्वे, यथोक्तं - यथा भाषितम्, अनुतिष्ठतः - राजसमीपं प्रविशतः।

विदूषक इति। विदूषको वदति। किमिति। भो प्रियवयस्य - इष्टसख, मया, दुर्लभप्रणयिनीसमागमोपायः - अलभ्यप्रियासमावेशोपायः, चिन्तितः - विचारितः।

In Public domain. Digitization Muthulakshmi Research Academy

(राजा तूष्णीमास्ते)

ऊर्वशी - (सेर्ष्याकूतम्) काउणएसा इत्थिआ इमिणा पत्थि अमाणा अत्ताणं विकत्थेदि **(का पुनरेषा स्त्री अनेन प्रार्थ्यमाना आत्मानं विकत्थयति)।**

चित्रलेखा - किंउणमाणुस्सअं ओळंबिअदि **(किं पुनर्मानुष्यकमवलम्ब्यते)।**

ऊर्वशी - णंपहवामि सहसापहावादो परिण्णादुम् **(ननु प्रभवामि सहसा प्रभावात् परिज्ञातुम्)।**

विदूषकः - णंभणामि, चिन्तिदो मएसमाअमोवा ओत्ति **(ननु भणामि चिन्तितो मया समागमोपाय इति)।**

राजा - तेन हि कथ्यताम् ।

राजा - पुरूरवाः, तूष्णीमास्ते - अवचनस्तिष्ठति।

ऊर्वशीति। ऊर्वशी। सेर्ष्याकूतम् - अक्षमाभिप्राययुक्तं वदति, एषा स्त्री - एवंविधाकान्ता, का पुनः - का वा भवेत्, या कान्ता, अनेन - राज्ञा, प्रार्थ्यमाना - अभिलष्यमाणापि, आत्मानं - स्वं, विकथ्ययति - श्लाघयति ।

चित्रलेखेति। चित्रलेखा ब्रवीति। मानुष्यकं पुनः - मनुष्यभावस्तु, किं - किमर्थम्, अवलम्ब्यते - परिगृह्यते, त्वयेति शेषः ।

ऊर्वशीति। ऊर्वशी वदति। प्रभावात् - देवतासामर्थ्यात्, सहसा-शीघ्रं, परिज्ञातुं - तदभिप्रायं वेदितुं, प्रभवामि - शक्नोमि ननु।

विदूषक इति। विदूषको वदति। किमिति। मया, समागमोपायः - प्रियासमावेशोपायः, चिन्तितः - विचारित इति, भणामि - कथयामिननु ।

राजेति। राजा प्राह। हे वयस्य, तेन हेतुना, कथ्यतां हि - उच्यतामेव, तत्प्रकारो भवतेति च पदद्वयाध्याहारः।

In Public domain. Digitization Muthulakshmi Research Academy

विदूषकः - सुणादु, सिविणअ समाअम अरिणिंणिद्धं सेवदु भवं, अधवा तत्थभोदीएउव्वसी एपडिकिदिंलिहिअ ओळो अंतोतिट्ठ (**शृणोतु, स्वप्नसमागमकारिणीं निद्रां सेवतां भवान्, अथवा तत्र भवत्या ऊर्वश्याः प्रतिकृतिं लिखित्वा अवलोकयन् तिष्ठ**)।

ऊर्वशी - (सहर्षम्) हीणसत्त हि अअ समस्सस समस्सस (**हीनसत्त्वहृदय! समाश्वस समाश्वस**)।

राजा - उभयमप्यनुपपन्नम् -

हृदयमिषुभिः कामस्यान्तस्सशल्यमदिं सदा
कथमुपलभे निद्रां स्वप्ने समागमकारिणीम्।
न च सुवदनामा लेख्येऽपि प्रियामसमाप्यतां
मम नयनयोरुद्बाष्पत्वं सखे न भविष्यति।। 10 ।।

विदूषक इति। विदूषकः कथयति। हे राजन् - भवान्, शृणोतु - आकर्णयतु, स्वप्नसमागमकारिणीं - स्वप्ने - स्वापसमये, समागमकारिणीं - प्रियासङ्घटनकारिणीं, निद्रां - शयनं, सेवतां - भजताम्, अथवा - तथा नोचेत्, तत्र भवत्याः - पूज्यायाः, ऊर्वश्याः, प्रतिकृतिम् - आकृतिं, लिखित्वा - चित्रफलके विन्यस्य, अवलोकयन् - पश्यन्, तिष्ठ - वर्तस्व।

ऊर्वशीति। ऊर्वशी। सहर्षम् - सतोषं वक्ति, हे हीनसत्त्वहृदय - दुर्बलचित्त, समाश्वस - प्रसन्नं भव, आदरादिद्वरुक्तिः।

राजेति। राजा कथयति। किमिति। हे सखे, उभयं - त्वदुपन्यस्तद्वयमपि, अनुपपन्नं - न सङ्घटितम्, कस्मादित्यत्राह। **हृदयमिति**। कामस्य - मन्मथस्य, इषुभिः - बाणैः, सदा - सर्वदा, इदं - मदीयं, हृदयं - चित्तम्, अन्तः - अभ्यन्तरे, सशल्यं - सकण्टकं, तस्मात्, स्वप्ने, समागमकारिणीं - प्रेयसी-

In Public domain. Digitization Muthulakshmi Research Academy

चित्रलेखा - सुदंतुए (**श्रुतं त्वया**)।

ऊर्वशी - सुदं, णउणपज्जत्तं हिणअस्स (**श्रुतं न पुनः पर्याप्तं हृदयस्य**)।

विदूषकः - एत्तिओमे बुद्धिविहवो (**एतावान्मे बुद्धिविभवः**)।

राजा - (सनिश्श्वासम्) -

नितान्तकठिनां रुजं मम न वेदयो मानसीं
प्रभावविदितानुरागमवमन्यते वापि माम्।
अलब्धफलनीरसान्ममविधाय तस्मिन्जने
समागममनोरथान् भवतु पञ्चबाणस्सुखी ॥ 11 ॥

सङ्घटनकरीं निद्रां, कथं केन वा प्रकारेण, उपलभे - प्राप्नोमि, किञ्च, सुवदनां-सुन्दराननां, प्रियाम् - प्रेयसीं, तामूर्वशीम्, अलेख्ये - चित्रफलकेपि, असमाप्य-अविलिख्यैव, मम नयनयोर्नेत्रयोः, उद्बाष्पत्वम् - आविर्भूतनेत्रजलत्वं, न भविष्यतीति च न, किन्तु - भविष्यत्येव, तेन चित्रलेखनमपि न सम्भवतीति भावः।

चित्रलेखेति। चित्रलेखा वक्ति। त्वया - भवत्या, श्रुतं - राज्ञा यदुक्तं तदाकर्णितं किमिति काकुः।

ऊर्वशीति। ऊर्वशी वदति। किमिति। श्रुतं - मया एतद्वचनमाकर्णितं, हृदयस्य पुनः - मनसस्तु, न पर्याप्तम् - नालम्।

विदूषक इति। विदूषकः कथयति। मे - मम, बुद्धिविभवः - मनीषा वैभवम्, एतावान् - एतत्परिणामकः।

राजेत्यादि। राजा। सनिश्श्वासम् - निश्श्वाससहितं यथातथा प्राहः, यः - जनः, नितान्तकठिनाम् - अत्यन्तकठोरां, मम, मानसीं - मनस्सम्बन्धवतीं, रुजं - परितापं, न वेद - न जानाति, अथवा, प्रभावविदितानुरागं - प्रभावेन-

 In Public domain. Digitization Muthulakshmi Research Academy

चित्रलेखा - सुदं तुए? (**श्रुतं त्वया?**)।

ऊर्वशी - हद्धीहद्धीमं एवं अवगच्छदि, असमत्थाम्हि अग्गदोसे भविअ पडिवअणस्स, तापहावणिम्मिदेण भुअपत्तलेहेण संपादिदुत्तरासे भोदुं इच्छामि (**हाधिक् हाधिक्। मामेवमवगच्छति, असमर्थास्मि अग्रतोऽस्य भूत्वा प्रतिवचनस्य तत्प्रभावनिर्मितेन भूर्जपत्रलेखेन सम्पादितोत्तरास्य भवितुमिच्छामि**)।

चित्रलेखा - अणुमदं मे (**अनुमतं मे**)।

~~~~~~

ध्यानबलेन, विदितानुरागं - ज्ञातप्रेमासङ्गमपि, माम्, अवमन्यते - नाद्रियते, पञ्चबाणः - मन्मथः, मम, तस्मिन् - तादृशे, जने - ऊर्वशीरूपे विषये, अलब्धफलनीरसान् - अलब्धफलाः - अप्राप्तसुखाः, अतएव, नीरसा रसविहीनाः, तान् - समागममनोरथान् - सम्प्राप्तिवाञ्छाः, विधाय - कृत्वा, सुखी - प्राप्तसुखः, भवतु - अस्तु।

चित्रलेखेति। चित्रलेखा ब्रवीति। हे सखि, त्वया - भवत्या, श्रुतम् - आकर्णितं किम्।

ऊर्वशीति। ऊर्वशी वदति। किमिति। महाराजः, माम्, एवम् - इत्थं भूतां, स्वस्मिन् प्रेमरहितामित्यर्थः, अवगच्छति - जानाति, हाधिक् - हेति विषादे, धिगिति निन्दायां भृशार्थे द्विरुक्तिः, अस्य - राज्ञः, अग्रतः - पुरतः, भूत्वा - स्थित्वापि, प्रतिवचनस्य - प्रत्युत्तरदानस्य, असमर्था - सामर्थ्यरहिता, अस्मि - भवामि, तत्तस्मात्, प्रभावनिर्मितेन - सामर्थ्यपरिकल्पितेन, भूर्जपत्रलेखेन - भुजपत्रत्वक्प्रत्रिकया, अस्य - राज्ञः, सम्पादितोत्तरा - दत्तप्रतिवचना, भवितुम्, इच्छामि - अभिलषामि।

चित्रलेखेति। चित्रलेखा वक्ति। मे - मम, अनुमतं - सम्मतम्।
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

(ऊर्वशी सविभ्रमं गृहीत्वा यथोक्तं करोति)

विदूषकः - (दृष्ट्वा ससम्भ्रमम्) अविद अविद, भोकिंणुक्खु एदं सप्पणिम्मो ओविअसम्मुहंणोणिवडदि **(भो किन्नु खल्वेतत्सर्पनिर्मोक इव सम्मुखमावयोर्निपतति)।**

राजा - (विभाव्य, विहस्य) **सखे! भूर्जपत्रगतोऽयमक्षरविन्यासः।**

विदूषकः - णक्खुअदिट्ठाए एव्वतत्थभोदीएउव्वसीए भवदोपरि देवणं सुणिअसमाणुराअसू अ आ इ ए ई इ अक्खरा इविसज्जि आ इ भोन्ति **(न खल्वदृष्टयैव तत्र भवत्या ऊर्वश्याः भवतः परिदेवनं श्रुत्वा समानुरागसूचकान्येतान्यक्षराणि विसर्जितानि भवन्ति)।**

ऊर्वशी, सविभ्रमं - सविलासं, गृहीत्वा - भूर्जपत्रं स्वीकृत्य, यथोक्तं- यथाभिहितं, करोति - विदधाति ॥

विदूषक इति। विदूषकः। दृष्ट्वा - निपतन्तं भूर्जपत्रलेखं विलोक्यं, ससंभ्रमं - सभयं प्राह। भो राजन्, सर्पनिर्मोकः - भुजगकञ्चुक इव, आवयोः, सम्मुखमभिमुखं, निपतति - भ्रंशति, एतत् - इदं वस्तु, सू॥ ''सामान्ये नपुंसकम्'', किन्नु खलु - किं वा स्यात्, अविदेति विषादे, सम्भ्रमाद्द्विरुक्तिः।

राजेति। राजा वदति। किं कृत्वा, विभाव्य - सम्यग्ज्ञात्वा, विहस्य - हासं कृत्वा च, हे सखे! अयं - दृश्यमानः, भूर्जपत्रगतः - भुजपत्रस्थितः, अक्षरविन्यासः - वर्णस्थापनम्।

विदूषक इति। विदूषकः प्राह। अदृष्टया - अनवलोकितयैव, तत्र भवत्या - पूज्यया, ऊर्वश्या, भवतः - तव, परिदेवनं - विलापं, श्रुत्वा - आकर्ण्य, समानुरागसूचकानि - अन्योन्यं तुल्यप्रेमबोधकानि, एतानि - भुजपत्रस्थितानि, अक्षराणि - वर्णानि, विसर्जितानि - सम्प्रेषितानि, न भवन्ति खलु- नस्युः किमिति काकुः।

In Public domain. Digitization Muthulakshmi Research Academy

राजा - **नास्त्यगतिर्मनोरथानाम्** (इति गृहीत्वानुवाच्य सहर्षं) **सखे! प्रसन्नस्ते वितर्कः।**

विदूषकः - भवंदाणिंपसीददु, एत्थलिहिदं सुणिदुं इच्छामि (**भवानिदानीं प्रसीदतु, अत्र लिखितं श्रोतुमिच्छामि**)।

ऊर्वशी - साहुसाहु अय्यणाअरिओसि (**साधु साधु आर्य! नागरिकोऽसि**)।

राजा - **श्रूयताम्** (वाचयति)

सामिअ संभाविअ जह अहंतुए अमुणि आ
तहाअअणुरत्तस्स जइणामतुहअवरिणमे।

~~~~~~

राजेति। राजाप्राह। मनोरथानाम् - अभिलाषाणाम्, अगतिः - अविषयः, अप्राप्य इति यावत्, नास्ति - न विद्यते, इत्युक्त्वा, गृहीत्वा - भुजपत्रलेखं स्वीकृत्य, अनुवाच्य - तत्र लिखितं पठित्वा, सहर्षं - ससन्तोषं यथा तथा पुनराह, हे सखे - वयस्य, ते - तव, वितर्कः - ऊहः, प्रसन्नः - प्रसादयुक्तः फलित इत्यर्थः।

विदूषक इति। विदूषको वदति। हे राजन् - भवान्, इदानीमद्य, प्रसीदतु - प्रसन्नो भवतु, अत्र - भुजपत्रलेखे, लिखितं - विन्यस्ताक्षरजातं, श्रोतुम् - आकर्णयितुम्, इच्छामि - स्पृहयामि, गूढार्थप्रश्नेन न कोपितव्यमिति भावः।

ऊर्वशीति। ऊर्वशी वदति। हे आर्य - माणवक, त्वं, नागरिकः - चतुरः, असि - भवसि, साधुसाधु - अतीवसमीचीनम्।

राजेत्यादि। राजा कथयति। किमिति। हे माणवक, श्रूयताम् - आकर्ण्यताम्, त्वयालेखार्थ इति पदद्वयमध्याहार्यम्, इत्युक्त्वा, वाचयति-वदति, हे स्वामिन् - महाराज, त्वया - भवता, अज्ञाता - अविवेचितस्वभावा, अहं,
~~~~~~

In Public domain. Digitization Mithilakshmi Research Academy

महळळिअपारि आअसअणिज्ज अम्मिहोंतिकिं
णन्दणवणवाआवि अच्चुण्हआसरीरए ।। 12।।

**(स्वामिन् सम्भाविता यथाहं त्वया अज्ञाता
तथा च अनुरक्तस्य यदिनामतवोपरिनमे ।
मम ललितपारिजातशयनीयके भवन्ति किं
नन्दनवनवाता अपि अत्युष्णाश्शरीरके) ।। 12।।**

ऊर्वशी - किंणक्खुसंपदं भणदि? **(किन्नु खलु साम्प्रतं भणति)।**

चित्रलेखा - णंभणिदं एव्वतेणकमळणाळाअमाणेहिं अंगेहिं **(ननु भणितमेव तेन कमलनालायमानैरङ्गैः)।**

विदूषकः - दिट्ठिआक्खुमएविअबुभुक्खि देणसोत्थिवाअणं उवळत्थं भवदाइमं

~~~~~~

यथा - येन प्रकारेण, सम्भाविता - अननुरक्तत्वेन अभ्यूहिता, तथा च - तथैव, मे - मम, अनुरक्तस्य - प्रेमयुक्तस्य, तव - भवत उपरि, न यदि नाम - अनुरागो न भवेच्छेतू, ललितपारिजातशयनीयके - अतिमृदुलपारिजातप्रसूनशय्यायां, स्थिताया इति शेषः, मम, शरीरके - कृशे देहे, नन्दनवनवाताः - इन्द्रोद्यान-प्रसृतवायवोऽपि, अत्युष्णा - अतीवतापकारिणः, भवन्तिं किं - भवेयुः किम्।

ऊर्वशीति। ऊर्वशी कथयति। साम्प्रतम् - इदानीं, किन्नु खलु भणति - किं वा वदिष्यति, राजेति शेषः।

चित्रलेखेति। चित्रलेखा वदति। ननु - ऊर्वशि, कमलनालायमानैः - पद्मकाण्डसदृशैः, म्लानत्वादिति भावः, अङ्गैः - अवयवैः, तेन - राज्ञा, भणितं-कथितमेव।

विदूषक इति। विदूषको ब्रवीति। किमिति। हे राजन्, दिष्ट्या - दैव-
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

समप्साणं (दिष्ट्या खलु मयेव बुभुक्षितेन स्वस्तिवाचनमुपलब्धं भवता इदं समाश्वासनम्)।

राजा - समाश्वासनमिति किमुच्यते -

तुल्यानुरागपिशुनं ललितार्थबन्धं
पत्रे निवेशितमुदाहरणं प्रियायाः।
उत्पक्ष्मलं मम सखे मदिरेक्षणेन
तस्यास्समागतमिवाननमाननेन।। 13 ।।

ऊर्वशी - एत्थणोसमविभाआपीदी (अत्र नौ समविभागाप्रीतिः)।

राजा - अङ्गुलीस्वेदेन दूष्येरन्नक्षराणि धार्यतामयं वयस्य प्रियाया-स्स्नेहस्वहस्तलिखितस्सन्देशः।

~~~~~~

वशेन, बुभुक्षितेन - क्षुधातुरेण, मया, स्वस्तिवाचनं - तत्सम्बन्धिभक्ष्यजातमिव, भवता - त्वया, इदं - पत्रिकाप्रेषणरूपं, समाश्वासनं - विश्रमः, उपलब्धम् - सम्प्राप्तम्।

राजेति। राजा ब्रवीति। हे माणवक, समाश्वासनं - विश्राममात्रमिति, किमुच्यते - किमर्थमुच्यते, त्वयेति शेषः, परन्तु, तुल्येति। हे सखे - माणवक, तुल्यानुरागपिशुनं - परस्परसमानप्रेमसूचकं, ललितार्थबन्धं - सुन्दरार्थप्रकाशकं, पत्रे - भूर्जपत्रे, निवेशितं - विन्यस्तं, प्रियायाः - ऊर्वश्याः, उदाहरणं - वृत्तान्तः, तस्याः - ऊर्वश्याः, उत्पक्ष्मलम् - उन्नमितललितपक्ष्मयुक्तम्, आननं - वदनमिव, मदिरेक्षणेन - मदाघूर्णितनयनेन, मम आननेन - मुखेन, समागतं - सम्बद्धम्।

ऊर्वशीति। ऊर्वशी वक्ति। अत्र - विषये, नौ - आवयोः, प्रीतिः - प्रेम, समविभागा - तुल्यांशा।

राजेति। राजा प्राह। हे वयस्य - सखे, अङ्गुलीस्वेदेन - करशाखाघर्म-
~~~~~~

In Public domain. Digitization: Mahalakshmi Research Academy

विदूषकः - (गृहीत्वा) किंदाणिंतत्थभोदी उव्वसी भवदो मणो रहाणं कुसुमाइं दंसिअ फळेविळंबेदि **(किमिदानीं तत्र भवती ऊर्वशी भवतो मनोरथानां कुसुमानि दर्शयित्वा फले विलम्बते)।**

ऊर्वशी - हळा जावउवगमकादरं हिअअंपय्यवत्थावेमि, दावतुमं सेअत्ताणं दंसिअजं मेखमंतं भणाहि **(सखि! यावदुपगमकातरं हृदयं पर्यवस्थापयामि, तावत्त्वमस्यात्मानं दर्शयित्वा यन्मेक्षमं तद्भण)।**

चित्रलेखा - तहा (इति तिरस्करिणीमपनीयराजानमुपेत्य) जेदुजेदु महाराओ **(तथा जयतु जयतु महाराजः)।**

जलेन, अक्षराणि - वर्णानि, दूष्येरन् - भ्रष्टानि भवेयुः, अतः, स्नेहस्वहस्तलिखितः - स्नेहेन - प्रेम्णा, स्वहस्तेन - आत्मकरेण, लिखितः - विन्यस्ताक्षरः, अयं - पुरोवर्ती, प्रियायाः - ऊर्वश्याः, सन्देशः - वाचिकपत्रिका, धार्यताम् - ध्रियतां, त्वयेति शेषः।

विदूषक इति। विदूषकः। गृहीत्वा - पत्रिकां स्वीकृत्य, प्राह, किमिति। तत्र भवती - पूज्या ऊर्वशी, भवतस्तव, मनोरथानाम् - अभिलाषाणां, कुसुमानि-पुष्पाणि, दर्शयित्वा - प्रकाश्य, इदानीमद्य, फले, विलम्बते - आलस्यं करोति किम्, पत्रिकां सम्प्रेष्य, आत्मदर्शने विलम्बं करोतीत्यर्थः।

ऊर्वशीति। ऊर्वशी वाचयति। हे सखि, उपगमकातरं - समीपगमनभयशीलं, हृदयं - चित्तं, यावत् - यावताकालेन, पर्यवस्थापयामि - स्वास्थ्यं प्रापयिष्यामि, तावत् - तावताकालेन, त्वं, अस्य - एतस्य राज्ञः, आत्मानं - स्वं, दर्शयित्वा - प्रत्यक्षीकृत्य, यन्मे क्षेमं - यन्मह्यं हितं भवति, तत् - वाक्यं, भण - वद।

चित्रलेखेति। चित्रलेखा वक्ति। तथा - तेन प्रकारेण, करोमीति शेषः,

 In Public domain. Digitized by Muthulakshmi Research Academy

राजा - स्वागतं भवत्यै?

न तथा नन्दयसि मां सख्या विरहितातया।
सङ्गमे पूर्वदृष्टेव यमुना गङ्गया विना।। 14।।

चित्रलेखा - पुढमं मेहराईदीसदि, पच्छाविज्जुल्ळदा **(प्रथमं मेघराजिर्दृश्यते, पश्चाद्विद्युल्लता)।**

विदूषकः - (अपवार्य) कथंणएसा उव्वसी, तत्थभोदीएअहि मदा सहअरी इअं? **(कथं नैषोर्वशी, तत्र भवत्या अभिमता सहचरी इयम्?)।**

~~~~~~

इत्युक्त्वा, तिरस्करिणीं - यवनिकाम्, अपनीय - अपसार्य, राजानं - पुरूरवसम्, उपेत्य - प्राप्य, वदति, महाराजः - सार्वभौमः, जयतु - सर्वोत्कर्षेण वर्तताम्, आदरादि्द्वरुक्तिः ।

राजेति। राजा प्राह। हे चित्रलेखे, भवत्यै - तुभ्यं, स्वागतं - शुभागमनं खलु, नेति। तया - प्रसिद्धया, सख्या - ऊर्वश्या, विरहिता - विप्रयुक्ता, त्वमिति शेषः, तथा - तेन प्रकारेण, मां ननन्दयसि - न तोषयसि, सङ्गमे - गङ्गायमुना-समावेशे, गङ्गया विना - भागीरथ्या विना भूता, पूर्वदृष्टा - तत्पूर्वमवलोकिता, यमुना - कालिन्दीव, ननन्दयसीति पूर्वेणान्वयः ।। १४।।

चित्रलेखेति। चित्रलेखा वदति। मेघराजिः - कादम्बिनी, प्रथमं - पूर्वं, दृश्यते - प्रेक्ष्यते, पश्चादनन्तरं, विद्युल्लता - तटिद्वल्ली, दृश्यत इति सम्बन्धः।।१५।।

विदूषक इति। विदूषकः। अपवार्य - त्रिपताकहस्तेनाच्छाद्य राजानं प्रत्याह। किमिति। तत्र भवत्या ऊर्वश्याः, अभिमता - इष्टा, सहचरी - सखी, इयम् - चित्रलेखा, कथं - केन प्रकारेण, एषा - भवदीप्सिता, ऊर्वशी, न - न भवतीति काकुः ।
~~~~~~

In Public domain. Digitization: Mahalakshmi Research Academy

चित्रलेखा - उव्वसीमहाराअंपणमि असिरसाविण्णावेदि **(ऊर्वशी महाराजं प्रणम्य शिरसा विज्ञापयति)।**

राजा - किमाज्ञापयति।

चित्रलेखा - महअसुरसंभवेदुज्ञादे महाराओएव्वसरणंअसी, साअहंतु हदंसण समुद्धेण मअणेणबळिअंबाहिज्ञमाणा भूओवि महाराएण अणुकं पणिज्ञात्ति **(ममासुरसम्भवेदुर्जाते महाराज एव शरणमासीत्, साहं तव दर्शनसमुत्थेन मदनेन बलवद्बाध्यमानाभूयोपि महाराजेनानुकम्पनीयेति)।**

राजा - भद्रमुखि -

पर्युत्सुकां कथयसि प्रियदर्शनां ता-
मार्तिं न पश्यसि पुरूरवसस्तदर्थाम्।

चित्रलेखेति। चित्रलेखा वक्ति। किमिति। ऊर्वशी - अस्मत्सखी, महाराजं - महाप्रभुं, भवन्तमिति शेषः, शिरसा - मूर्ध्ना, प्रणम्य - नमस्कृत्य, विज्ञापयति - विशदीकरोति।

राजेति। राजा प्राह। ऊर्वशी, किं - किं वा, आज्ञापयति - नियोजयति।

चित्रलेखेति। चित्रलेखा वदति। आसुरसम्भवे - राक्षसजनिते, दुर्जाति-उपद्रवे, महाराज एव, मम, शरणं - रक्षकः, आसीत् - अभूत्, इदानीं तु, साहं-एवं विधाहं, तव, दर्शनसमुत्थेन - वीक्षणसञ्जातेन, मदनेन - मन्मथेन, बलवत्-अतीव, बाध्यमाना - पीड्यमानासती, भूयः - पुनरपि, महाराजेन, अनुकम्पनीया-दयनीया, इत्येवंप्रकारेण, विज्ञापयतीति पूर्वेणानुषङ्गः।

राजेति। राजा प्राह। हे भद्रमुखि - शुभानने, त्वं, तां - प्रसिद्धां, प्रिय-दर्शनां - मनोज्ञदर्शनामूर्वशीं, पर्युत्सुकाम् - अतीवोत्कण्ठितां, कथयसि - वदसि,

In Public domain. Digitization Muthulakshmi Research Academy

साधारणोयमुभयोः प्रणयस्स्मरस्य
तप्तेन तप्तमिव सङ्घटनाययोक्तुः ॥ 15 ॥

चित्रलेखा - हळा! तुवत्तोविणिद्द अदरंमअणं पेक्खिअ इमस्सदूदिआम्हि संपुत्ता **(सखि त्वत्तोऽपि निर्दयतरं मदनं प्रेक्ष्य अस्य दूतिकास्मि संवृत्ता)।**

ऊर्वशी - (तिरस्करिणीमपनीय) अम्हो चित्तळेहे अणवेक्खिदा एतुएळहु-उज्यिदम्हि **(अहो चित्रलेखे! अनवेक्षितया त्वया लघूज्झितास्मि)।**

चित्रलेखा - (सस्मितम्) अदोमुहुत्तादोजाणिस्सं, काकंपरित्त जिप्पदित्ति, आआरंदावपडिवज्ज **(अतो मुहूर्तात् ज्ञास्यामि, काकां परित्यक्ष्यतीति, आचारं तावत्प्रतिपद्यस्व)।**

~~~~~~

तदर्थाम् - ऊर्वशीनिमित्तां, पुरूरवसः, आर्तिं - पीडां, न पश्यसि - नावलोकयसि, उभयोः - द्वयोः, साधारणः - अन्योन्यस्मिन् समानः, अयम् - एषः, प्रणयः- प्रेमा, योक्तुः - घटकस्य, स्मरस्य - मदनस्य, तप्तं - तापयुक्तंवस्तु, तप्तेन - तापयुक्तेन वस्तुना सह, सङ्घटनाय - योजनायेव, आसीदिति शेषः।

चित्रलेखेति। चित्रलेखा वक्ति। हे सखि - प्रिये ऊर्वशि, त्वत्तो - भवत्या अपि, मदनं - मन्मथं, निर्दयतरम् - अतिनिष्करुणं, प्रेक्ष्य - आलोक्य, अस्य - राज्ञः, दूतिका - सन्देशहारिणी, संवृत्ता - जातास्मि।

ऊर्वशीति। ऊर्वशी। तिरस्करिणीं - प्रतिसीराम्, अपनीय - अपसार्य, वदति, हे चित्रलेखे, अनवेक्षितया - अनवलोकितया, त्वया - भवत्या, लघु- क्षिप्रम्, उज्झिता - त्यक्तास्मि, अहो - आश्चर्यम्।

चित्रलेखेति। चित्रलेखा। सस्मितम् - समन्दहासं, वक्ति, हे सखि, अतो मुहूर्तात् - अस्माद्घटिकाद्वयात्, का - स्त्री, कां - स्त्रियं, परित्यक्ष्यति -
~~~~~~

In Public domain. Digitization: Muthulakshmi Research Academy

ऊर्वशी - (सव्रीडम्) जेदुमहाराओ **(जयतु महाराजः)।**

राजा - सुन्दरि -

मया नाम जितं यस्मात्त्वयायं समुदीर्यते।
जयशब्दसहस्राक्षान्नागतः पुरुषान्तरम्।। 16।।

(हस्ते गृहीत्वैनामुपवेशयति)

विदूषकः - रण्णो पिअवअंसोबम्हणो किं णवंदिअदि? **(राज्ञः प्रियवयस्यो ब्राह्मणः किं न वन्द्यते?)।**

(ऊर्वशी, सस्मितम् प्रणमति)

विसृज्य गमिष्यतीति, ज्ञास्यामि - अवगमिष्यामि, तावदिदानीम्, आचारं - समयोचितव्यवहारं, प्रतिपद्यस्व - जानीहि।

ऊर्वशीति। ऊर्वशी। सव्रीडं - सलज्जं यथातथा, वदति, महाराजः - अधिराजः पुरूरवाः, जयतु - सर्वोत्कर्षेण वर्तताम्।

राजेत्यादि। राजा सहर्षं प्राह। हे सुन्दरि - लावण्यवति, सहस्राक्षात् - अखण्डलात्, पुरुषान्तरं - अन्यपुरुषं, नागतः - न प्राप्तः, अयं जयशब्दः - जयत्विति शब्दः, यस्मात् - यस्मात्कारणात्, त्वया - भवत्या, समुदीर्यते - समीचीनतया प्रयुज्यते, तस्मात्, मया नाम - मयैव, जितं - जयः, सू।। ''नपुंसके भावेक्तः'' इत्युक्त्वा, हस्ते गृहीत्वा - पाणिं स्वीकृत्येत्यर्थः। कर्मणोऽधिकरणत्व विवक्षया सप्तमी। उपवेशयति - आसने एनामूर्वशीं स्थापयति।

विदूषक इति। विदूषको ब्रूते। राज्ञः - पुरूरवसः, प्रियवयस्यः - इष्टसखः, ब्राह्मणः - भूसुरोऽपि, किं - केन हेतुना, न वन्द्यते - नाभिवाद्यते।

ऊर्वशीति। ऊर्वशी। सस्मितं - समन्दहासं, प्रणमति - नमस्करोति, विदूषकमिति शेषः।

In Public domain. Digitization Muthulakshmi Research Academy

विदूषकः - सोत्थिभोदीए (**स्वस्ति भवत्यै**)।

(नेपथ्ये देवदूतः) **चित्रलेखे त्वरय त्वरयोर्वशीम्।**

मुनिना भरतेन यः प्रयोगो
भवतीष्वष्टरसाश्रयोनियुक्तः।
ललिताभिनयं तमन्यभर्तामरुतां
द्रष्टुमनास्सलोकपालः ॥ 17 ॥

(सर्वे समाकर्णयन्ति, ऊर्वशी - विषादं रूपयति)

चित्रलेखा - सुदं पिअसहीएदेव दूदस्सवअणं? अणुमण्णदु महाराओ (**श्रुतं प्रियसख्या देवदूतस्य वचनम्? अनुमन्यतां महाराजः**)।

विदूषक इति। विदूषकः प्राह। किमिति। हे ऊर्वशि, भवत्यै - तुभ्यं, स्वस्ति - भद्रं, भवत्विति शेषः।

नेपथ्य इति। देवदूतः - सुरभटः, नेपथ्ये - यवनिकाभ्यन्तरे, प्राह। किमिति। हे चित्रलेखे, त्वम्, ऊर्वशीं, त्वरय - इन्द्रनगरगमनाय त्वरां कुरु। किमर्थमिति चेत्तत्राह। मुनिनेति। भरतेन मुनिना - भरताभिख्यमहर्षिणा, अष्टरसाश्रयः - शृङ्गारादिरसाष्टकप्रतिपादकः, यः प्रयोगः - दृश्यप्रबन्धः, भवतीषु- युष्मासु, नियुक्तः - अभिनयशिक्षार्थमाज्ञप्तः, ललिताभिनयं - सम्यक्परिचित-सुन्दराभिनयं, तं - प्रयोगं, मरुतां - देवानां, भर्ता - प्रभुरिन्द्रः, सलोकपालः - दिक्पालकसहितस्सन्, अद्य - इदानीं, द्रष्टुमनाः - आलोकितुकामः, अभूदित्यध्याहारः। अतस्त्वरयेति पूर्वेणानुषङ्गः।

सर्व इति। सर्वे - तत्रस्था राजादयः, समाकर्णयन्ति - तद्वाक्यं शृण्वन्ति, ऊर्वशी, विषादं - मनःक्लेशं, रूपयति - अभिनयति।

चित्रलेखेति। चित्रलेखा वक्ति। प्रियसख्या - इष्टसहचर्या ऊर्वश्या,

In Public domain. Digitization by Mahalakshmi Research Academy

ऊर्वशी - (निश्वस्य) णत्थिमेवाआ, महाराअ! परवसो अअंजणो महाराएण अब्भणुण्णादा इच्छदिदेवेनु अणवरत्थं अत्ताणं कादुं **(नास्ति मे वाक्, महाराज ! परवशोऽयं जनः महाराजेनाभ्यनुज्ञाता इच्छामि देवेष्वनपराद्धमात्मानं कर्तुम्)।**

राजा - (कथञ्चिद्व्यवस्थाप्य वाचम्) **नास्मि भवत्योरीश्वरनियोग प्रत्यर्थी, स्मर्तव्योऽयं जनः।**

(ऊर्वशी विश्लेषदुःखं रूपयन्ती सख्या सह निष्क्रान्ता)

राजा - (सनिश्श्वासम्) **सखे ! वैधुर्यमिव चक्षुषस्सम्प्रति।**

देवदूतस्य - सुरभृत्यस्य, वचनं - भाषणं, श्रुतम् - आकर्णितं किं, महाराजः - सम्राट्, अनुमन्यतां - गमनाय अनुमतिं करोतु।

ऊर्वशीति। ऊर्वशी। निश्वस्य - चिन्तया निश्वासं कृत्वा, वदति, हे महाराज, मे - मम, वाक् - वाग्व्यापारः, नास्ति - न विद्यते, वक्तुं न शक्नोमीति भावः, अयं जनः - स्वयमित्यर्थः, परवशः - पराधीनः, तस्मात्, महाराजेन - श्रीमता भवता, अभ्यनुज्ञाता - अनुमतासती, आत्मानं - स्वं, देवेषु - अमरेषु, अनपराद्धम् - आज्ञोल्लङ्घनरूपापराधरहितं, कर्तुं - विधातुम्, इच्छामि - अभिवाञ्छामि।

राजेति। राजा। वाचं - वाणीं, कथञ्चित् - कृच्छ्रेण, व्यवस्थाप्य - संस्थाप्य, प्राह, अहं, भवत्योः - युवयोः, ईश्वरनियोगप्रत्यर्थी - प्रभुशासनविघातुकः, नास्मि - न भवामि, किञ्च, अयं जनः - एष जनः, स्मर्तव्यः त्वया स्मरणार्हः।

ऊर्वशीति। ऊर्वशी। विश्लेषदुःखं - वियोगव्यथां, रूपयन्ती - अभिनयन्ती सती, सख्या सह - प्रियया चित्रलेखया साकं, निष्क्रान्ता - निर्गता।

In Public domain. Digitized by Muthulakshmi Research Academy

विदूषकः - (पत्रं दर्शयितुकामः) **णं** (इत्यर्थोक्ति आत्मगतम्) **हद्धीहद्धी उव्वसीदं सणविम्हिदेणमए पब्भट्टं अग्गहत्थादो भुअवपत्तं पमादेण, णविण्णादम्** (ननु .... हाधिक् हाधिक् ऊर्वशीदर्शनविस्मितेन मया प्रभ्रष्टमग्रहस्ताद्भूर्जपत्रं प्रमादेन, न विज्ञातम्)।

राजा - किमसि वक्तुकामः?।

विदूषकः - एववत्तुकामोम्हि, माभवं अंसूणिमुंचदु, दधंखुतुइ बद्धभावा उव्वसी, णसा इदोगदं अणुबंधं सढिळइस्सदित्ति **(एवंवक्तु-कामोऽस्मि, मा भवानश्रूणि मुञ्चतु, दृढं खलु त्वयि बद्धभावा ऊर्वशी, न सा इतोगतमनुबन्धं शिथिलयिष्यतीति)।**

राजेति। राजा - पुरूरवाः, सनिश्श्वासं - निश्श्वाससहितं यथातथा, प्राह, हे सखे - माणवक, चक्षुषः - नेत्रेन्द्रियस्य, सम्प्रति - इदानीं, वैधुर्यं - वैयर्थ्यमिव, अभूदिति शेषः।

विदूषक इति। विदूषकः। पत्रं - ऊर्वशीप्रेषितभुजपत्रं, दर्शयितुकामः - विलोकयितुमनाः, सू।। "तुंकाममनसोरपि इति मकारलोपः", ननु - राजन्, इति - एवम्, अर्थोक्ते - अर्थवाक्ये उच्चारिते सत्येव, आत्मगतं - स्वगतं ब्रवीति, किमिति। ऊर्वशीदर्शनविस्मितेन - ऊर्वश्याः दर्शनेन - विलोकनेन, विस्मतेन - अद्भुतं प्राप्तेन, मया, अग्रहस्तात् - कराग्रभागात्, प्रभ्रष्टं - गलितं, भूर्जपत्रं- भुजपत्रलेखः, प्रमादेन - अनवधानेन, न विज्ञातं - न विदितम्, हाधिक् - हेति विषादे धिगिति निर्भर्त्सने, सम्भ्रमाद्द्विरुक्तिः।

राजेति। राजा प्राह। हे माणवक - त्वं, किं - वचनं, वक्तुकामः - विवक्षुः, असि - भवसि।

विदूषक इति। विदूषको ब्रूते। हे राजन्, अहम्, एवमित्थं, वक्तुकामः

In Public domain. Digitization Mahalakshmi Research Academy

राजा - ममाप्येतदाशङ्कते मनः, तया खलु प्रस्थाने -

अनीशया शरीरस्य हृदयं विवशं मयि।
स्तनकम्पक्रियालक्ष्यैर्न्यस्तं निश्वसितैरिव॥ 18॥

विदूषकः - (स्वगतम्) वेवदि मेहिअअं तत्थभवदा वअंसेण भुअपत्तस्सणा मगण्हिदव्वं भविस्सदित्ति **(वेपते मे हृदयं तत्र भवता वयस्येन भूर्जपत्रस्य नाम ग्रहीतव्यं भविष्यतीति)।**

राजा - केनेदानीं दृष्टिं विलोभयामि (विचिन्त्य) **माणवकानय भूर्जपत्रम्।**

- विवक्षुः, अस्मि - भवामि, भवान्, अश्रूणि - नेत्रजलानि, मामुञ्चतु - न विसर्जयेत्यर्थः, कुतः, ऊर्वशी, त्वयिविषये, दृढं - गाढं, बद्धभावा - सक्ताभिप्राया खलु, अतः, सा ऊर्वशी, इतोगतम् - इमं जनं प्राप्तम्, अनुबन्धम् - आसक्तिं, न शिथिलयिष्यति - न क्षीणयिष्यतीति।

राजेत्यादि। राजा प्राह। किमिति। मम, मनो हि चित्तञ्च, एतत् - भवदुक्तम्, आशङ्कते - तर्कयति खलु, तथाहि, प्रस्थाने - प्रयाणकाले, शरीरस्य- स्वदेहस्य, अनीकया - पराधीनतया अन्यत्र स्थातुमशक्तया, तया - ऊर्वश्या, स्तनकम्पक्रियालक्ष्यैः - स्तनयोः - पयोधरयोः, कम्पः - उच्छ्वासैश्चलनं, स एव क्रिया तया लक्ष्यैस्सूचितैः, निश्वसितैः - निश्वासमारुतैः, विवशं - इतःपूर्व- मन्याधीनं, हृदयं - चित्तं, मयि, न्यस्तं - समर्पितमिव, स्थितमितिशेषः॥११६॥

विदूषक इति। विदूषकः। स्वगतम् - आत्ममात्रावगतं यथातथा, ब्रूते, तत्र भवता - पूज्येन, वयस्येन - स्निग्धेन राज्ञा, नि॥ "स्निग्धो वयस्यस्सवया" इत्यमरः, भूर्जपत्रस्य - भुजपत्रलेखस्य, नाम - नामधेयं, ग्रहीतव्यं - ग्रहणयोग्यं, भविष्यतीति हेतोः, मे - मम, हृदयं - चित्तं, वेवते - कम्पते, किं करोमीति वाक्यशेषः।

In Public domain. Digitization Muthulakshmi Research Academy

विदूषकः - (विषादं नाटयित्वा) णक्खुदीसदि, गदं एव्व उव्वसीमग्गेण **(न खलु दृश्यते, गतमेनोर्वशीमार्गेण)।**

राजा - सर्वत्र प्रमादीवैधेयः, ननु विचिनोतु भवान्।

विदूषकः - इदोइदो भवे **(इतइतो भवेत्)** (इति विचिनोति नाट्येन)।

(ततः प्रविशति काशीराजपुत्री सपरिवारा देवी)

देवी - हंजेणि उणिए अविसच्चं तुएभणिदं, इदं ळदाघरअं पविसंतो अय्यमाणवअसहिदो अय्यउत्तो दिट्ठोत्ति? **(हञ्जे निपुणिके अपि**

राजेति। राजा प्राह। इदानीम् - अद्य, केन - साधनेन, दृष्टिं - चक्षुः, विलोभयामि - विनोदयामि, इति, विचिन्त्य - विचार्य, पुनःप्राह, किमिति, हे माणवक - विदूषक, भूर्जपत्रं - भुजपत्रलेखम्, आनय - आहर।

विदूषक इति। विदूषकः। विषादं - मनोव्यथाम्, नाटयित्वा - अभिनीय, वक्ति, न दृश्यते खलु - न विलोक्यते हि, भूर्जपत्रमित्यनुषज्यते, परन्तु, ऊर्वशी मार्गेण - ऊर्वशीवर्त्मना, गतं - यातमेव।

राजेति। राजा प्राह। वैधेयः - मूढो जनः, सर्वत्र - सर्वेष्वपि कार्येषु, प्रमादी - अनवहितः, ननु - माणवक, भवान्, विचिनोतु - अन्विष्यतु, लेखमिति शेषः।

विदूषक इति। विदूषकः प्राह। इतः - अत्रदेशे, भवेत् - भुजपत्रं स्यादिति सम्भावनायां लिङ्, वीप्सायां द्विरुक्तिः, इत्युक्त्वा, नाट्येन विचिनोति-अन्वेषणमभिनयति।

तत इति। ततोऽनन्तरं, काशीराजपुत्री - वाराणस्यधिपदुहिता, देवी - पट्टमहिषी, सपरिवारा - परिवारसहिता, प्रविशति - रङ्गस्थलं प्राप्नोति।

In Public domain. Digitization Muthulakshmi Research Academy

सत्यं त्वया भणितम्, इदं लतगृहं प्रविशन् आर्यमाणवकसहित आर्यपुत्रो दृष्ट इति)।

निपुणिका - अण्णहाभट्टिणीयमेविण्णविदपुव्वा (**अन्यथा भट्टिनी समया विज्ञापितपूर्वा**)।

देवी - तेणहिळदंतरिदाभविअ सुणिस्सं दावसेवीसद्धमंतिदाइं, जंतुए गदिदंतं सच्छंणवत्ति (**तेन हि लतान्तरिता भूत्वा श्रोष्यामि तावदस्य विस्रब्धमन्त्रितानि, यत्त्वया गदितं तत्सत्यं न वेति**)।

निपुणिका - जं भट्टिणीए रुच्चदि (**यद्भट्टिन्यै रोचते**)।

देवी - (परिक्रम्य) णिउणिए किंएदं पत्तोण्णा चीवरंविअ इदो मुहं

देवीति। देवी वदति। किमिति। हञ्जे निपुणिके - निपुणिकाख्ये चेटि, आर्यमाणवकसहितः - पूज्यमाणवकाख्यविदूषकयुतः, आर्यपुत्रः - भर्ता महाराजः, इदं - पुरोवर्ति, लतागृहं - निकुञ्जं, प्रविशन् - प्राप्नुवन्, दृष्टः - प्रेक्षित इति, त्वया - भवत्या, भणितम् - उक्तं, सत्यमपि - तथ्यमेव किम्।

निपुणिकेति। निपुणिका वक्ति। मया, भट्टिनी - देवी, अन्यथा - अन्यप्रकारेण, न विज्ञापितपूर्वा - पूर्वं न विज्ञापिता।

देवीति। देवी वदति। तेन हेतुना, अहं, लतान्तरिता - वल्लीभिराच्छादिता भूत्वा, अस्य - राज्ञः, विस्रब्धमन्त्रितानि - स्वेच्छाकृतरहस्यसम्भाषणानि, श्रोष्यामि - आकर्णयिष्यामि तावत्, त्वया - भवत्या, यद्गदितं - भाषितं, तत्सत्यं - यथार्थं वा, न वा - असत्यं वेति, परिशीलितुमिति शेषः।

निपुणिकेति। निपुणिका वक्ति। भट्टिन्यै - देव्यै, यद्रोचते - अभिमतं भवति, तथा कर्तव्यमिति वाक्याध्याहारः।

In Public domain. Digitization Muthulakshmi Research Academy

दक्खिण मारुदेण आणी अदि (**निपुणिके! किमेतत्पत्रोर्णाचीवरमिव इतो मुखं दक्षिणमारुतेनानीयते**)।

निपुणिका - (विभाव्य) भट्टिणि! परिवत्तण विभाविदक्खरं भुअपत्तंखु एदं, हंत भट्टिणीए णेउरकोडिएठग्गं (गृहीत्वा) कधं वाची अदु? (**भट्टिनि! परिवर्तनविभाविताक्षरं भूर्जपत्रं खल्वेतत्, हन्तभट्टिन्या नूपुरकोट्यां लग्नम् ... कथं वाच्यताम्**)।

देवी - अणुवाएहि दावणं, जइ अविरुद्धं तदोसुणिस्सं (**अनुवाचय तावदेतत्, यद्यविरुद्धं ततश्श्रोष्यामि**)।

निपुणिका - (तथा कृत्वा) तंएव्व कोळीणंवि अपडिभादि, भत्तारं उद्धिसिअ

~~~~~~

देवीति। देवी, परिक्रम्य - किञ्चिद्गत्वा, प्राह। हे निपुणिके, पत्रोर्णाचीवरमिव - पत्ररूपमेषलोमनिर्मितवस्त्रखण्डमिव, दक्षिणमारुतेन - तन्नामकदिक्प्रसृतवायुना, इतोमुखम् - एतद्दिगभिमुखम्, आनीयते - अगम्यते, एतत्किं किं वा भवेदित्यर्थः।

निपुणिकेति। निपुणिका। विभाव्य - सम्यक्परिशील्य, वदति, हे भट्टिनि - भर्त्री, एतत् - पुरोवर्ति, परिवर्तनविभाविताक्षरं - परिवर्तनेन - वायु चलनकृतपार्श्वपरिवर्तनं, तेन, विभावितानि - अभ्यूहितानि, अक्षराणि - वर्णानि यस्य तत्, भूर्जपत्रं - भुजपत्रंखलु, भट्टिन्याः - देव्याः, नूपुरकोट्यां - मञ्जीराग्रे, लग्नं - सक्तम्, गृहीत्वा - स्वयं धृत्वा, पुनराह, कथं - केन प्रकारेण, वाच्यतां- पठ्यताम्, त्वयेतिशेषः। हन्तेति हर्षे।

देवीति। देवी वक्ति। एतत् - भूर्जपत्रं, त्वमेव, अनुवाचय तावत् - साकल्येन पठ, यद्यविरुद्धं - समीचीनं चेत्, ततः - तदा, श्रोष्यामि - आकर्णयिष्यामि।
~~~~~~

In Public domain. Digitization: Muthulakshmi Research Academy

उव्वसीए कदोकव्वबंधोत्तितक्केमि, अय्यमाणव अपमा देणअम्हाणं हत्थगदोण (**तदेवकालीनमिति प्रतिभाति, भर्तारमुद्दिश्य ऊर्वश्याः कृतः काव्यबन्ध इति तर्कयामि, आर्य माणवक प्रमादेन आवयोर्हस्तगत इति**)।

देवी - तेणहिसे गहीडत्थाहोमि (**तेनह्यस्य गृहीतार्था भवामि**)।

(निपुणिका, तदेव राज्ञा पूर्ववाचितं वाचयति)

देवी - एहि इमिणा एव्व उ अअणेण अच्छराकामुअं अय्य उत्तं पेक्खामि (**एह्यनेनैवोपायेनाप्सरः कामुकमार्यपुत्रं पश्यामि**)।

निपुणिकेति। निपुणिका। तथा कृत्वा - अनुवाच्य, कथयति, कौलीनं - लोकप्रवाद इव, तदेव - राज्ञः प्रवर्तनमेव, प्रतिभाति - विजृम्भते, भर्तारं - प्रभुम्, उद्दिश्य - विषयीकृत्य, ऊर्वश्या - स्वर्वेश्यया, कृतः - रचितः, काव्यबन्धः - कवितानिर्माणमिति, किञ्च, आर्यमाणवकप्रमादेन, आर्यमाणवकस्य - पूज्यविदूषकस्य, प्रमादेन - अनवधानेन, आवयोः - तव मम च, हस्तगतः - करप्राप्त इति च, तर्कयामि - आलोचयामि।

देवीति। देवी - पट्टमहिषी, वदति, तेन हेतुना, अस्य - भूर्जपत्रलेखस्य, गृहीतार्था - ज्ञाताशया, भवामि, तस्मात्पठ्यतामिति शेषः ॥१३०॥

निपुणिकेति। निपुणिका - चेटी, राज्ञा - पुरूरवसा, पूर्ववाचितं - पूर्वपठितं, तदेव - ऊर्वशी लिखितमेव, वाचयति - पठति ॥

देवीति। देवी वक्ति। हे निपुणिके, एहि - आगच्छ, अनेन - लेखरूपेण, उपायनेन - उपहारेणैव, अप्सरः कामुकम् - ऊर्वशीकामयितारम्, आर्यपुत्रं - भर्तारं, पश्यामि - विलोकयामि।

In Public domain. Digitization Muthulakshmi Research Academy

निपुणिका - तह (तथा)।

(अभितो लतागृहं परिक्रामतः)

विदूषकः - (विलोक्य) भो वअंस! एवंपवणवसगामीपमदवण समीवग-देकेडा पव्वदग्गेदीसदि (**भो वयस्य! एवं पवनवशगामी प्रमदवन-समीपगते क्रीडापर्वताग्रे दृश्यते)।**

राजा - (उत्थाय) **भगवन् वसन्तप्रियसखे मन्मथबन्धो दक्षिणवायो?**

वासार्थं हरसम्भृतं सुरभिणा पौष्पं रजोवीरुधां
किं मिथ्या भवतो हृतेन दयिता स्नेहस्वहस्तेन मे।

निपुणिकेति। निपुणिका वक्ति। हे देवि - तथा तेन प्रकारेण, कर्तव्य-मिति शेषः।

देवी निपुणिक च, लतागृहमभितः - निकुञ्जसन्निकर्षं, परिक्रामतः - गच्छतः।

विदूषक इति। विदूषकः। विलोक्य - यत्किञ्चिद्वीक्ष्य ब्रूते, भो वयस्य-हे सखे, एवमनेन मार्गेण, पवनवशगामी - वायुवशेन गच्छन्, प्रमदवनसमीप-गते - उद्यानान्तिकस्थिते, क्रीडापर्वताग्रे - केलीनगोपरिभागे, दृश्यते - वीक्ष्यते, लेख इति शेषः।

राजेति। राजा। उत्थाय - उत्थितो भूत्वा, प्राह, हे भगवन् - पूजनीय, वसन्तप्रिय - मधुहित, सखे - मत्सख, मन्मथबन्धो - स्मरबान्धव, दक्षिणवायो-दक्षिणदिक्प्रसृतप्रसिद्धानिल।

वासार्थमिति। वासार्थं - सौरभ्यसम्पादनार्थं, सुरभिणा - ग्रीष्मेण, सम्भृतं - सञ्चितं, वीरुधां - लतानां, नि॥ ''लताप्रताननीवीरुद्गुल्मिन्युलप

In Public domain. Digitization Muthulakshmi Research Academy

जानीते हि मनोविनोदनफलैरेवं विधार्धारितं
कामार्तं जनमञ्जनां प्रतिभवानालक्षितप्रार्थनः ।। 19 ।।

निपुणिका - देवि तस्स एव्वभुअपत्तस्स अण्णेसणावट्टदि (**देवि! तस्यैव भूर्जपत्रस्यान्वेषणा वर्तते**)।

देवी - पेक्खामि (**पश्यामि**)।

विदूषकः - भो मिळाअमाणकेसरच्छविणा मोरपिंछेण विप्पळद्धाम्ह (**भो म्लायमान केसरच्छविना मयूरमपिञ्छेन विप्रलब्धौ स्वः**)।

~~~~~~

इत्यपि'' इत्यमरः, पौष्पं - पुष्पसम्बन्धि, रजः - परागं, हर - स्वीकुरु, मे - मम, दयितास्नेहस्वहस्तेन - दयितायाः - प्रियायाः, स्नेहस्य - प्रणयस्य, स्वहस्तेन - आत्महस्तलिखितप्रतिज्ञापत्रेण, मिथ्या - वृथा, हृतेन - आकृष्टेनसता, भवतस्तव, किं - किंवा प्रयोजनमस्ति, कुसुमपरागहरणेन सुगन्धलाभस्ते, लेखिकाहरणेन तु किञ्चिदपि फलं नास्तीति भावः, हि - यस्मात्कारणात्, एवं विधैः - लेखिकादिरूपैः, मनोविनोदनफलैः - मनसः कालयापनोपायैः, धारितं- गृहीतं - रक्षितमित्यर्थः, कामार्तं - कामपीडितं, जनं, अञ्जनां प्रति - अञ्जनाख्यां देवीमुद्दिश्य, अलक्षितप्रार्थनः - प्राप्तमनोरथः, भवान्, जानीते - वेत्ति, तस्मा- द्विरहिजनपीडनं नोचितमिति भावः ।

निपुणिकेति। निपुणिका वदति। हे देवि - भर्त्रि, तस्य - अस्मत्कर- गतस्य, भूर्जपत्रस्यैव, अन्वेषणा - विचयनं, वर्तते - भवतीत्यर्थः ।

देवीति। देवी वक्ति। पश्यामि - अहमपि विलोकयामि ।

विदूषक इति। विदूषको वदति। म्लायमानकेसरच्छविना - ग्लानवकुल- सच्छायेन, मयूरपिच्छेन - बर्हिबर्हेण, विप्रलब्धौ - वञ्चितौ, स्वः - भवावः, भूर्ज पत्रभ्रान्तिं गताविति भावः ।
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

राजा - सर्वथा हतोऽस्मि।

देवी - (उपेत्य) अळंआवेएण अय्य उत्त! इदं भुअपत्तं (**अलमावेगेन आर्यपुत्र! इदं भूर्जपत्रम्)।**

राजा - (ससम्भ्रमम्) **अये इयं देवी, स्वागतं देव्यै।**

विदूषकः - (अपवार्य) दुरागदं दाणिंसंवुत्तं (**दुरागतमिदानीं संवृत्तम्)।**

राजा - (जनान्तिकम्) **वयस्य! किमत्र प्रतिविधेयम्।**

विदूषकः - ळोद्धेण गहिदस्स कुंभीळअस्सविअ णत्थिवा आपडिवअणं (**लोप्त्रेण - आत्महतद्रव्येण सह गृहीतस्य कुम्भीलकस्येव नास्ति वाचा प्रतिवचनम्)।**

~~~~~~

राजेति। राजा प्राह। सर्वथा - सर्वप्रकारैः, हतः - विप्रलब्धोस्मि।

देवीति। देवी। उपेत्य - राजनिकटं प्राप्य, प्राह, भूर्जपत्रं - ऊर्वशीप्रेषित भुजपत्रं, इदम् - एतत्, आवेगेन - सम्भ्रमेण, अलं - मास्तु, आर्यपुत्रेति प्रिय-सम्बोधनम्।

राजेति। राजा। ससम्भ्रममं - सत्वरं, प्राह, अये इत्यात्मन्येव सम्बोधनम्, इयं - एषा, देवी - राज्ञी, समागतेति शेषः, प्रकाशं पुनराह, देव्यै - महिष्यै, स्वागतं - शुभागमनं खलु।

विदूषक इति। विदूषकः। अपवार्य - त्रिपताकहस्तेन समीपस्थजनं वञ्चयित्वा, प्राह, हे राजन्, इदानीमद्य, दुरागतं - दुष्प्रतिविधेयं, संवृत्तं - सञ्जातम्।

राजेति। राजा। जनान्तिकम् - त्रिपताककरेण मुखमाच्छाद्य परस्पर-सम्भाषणम्, हे वयस्य - सखे, अत्र - अस्मिन्कार्ये, प्रतिविधेयं - प्रतीकार्यं, किं - किं वा भवति।
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

राजा - देवि! नैतन्मया मृग्यते, न खलु तत्प्रापणाथोऽयमारम्भः।

देवि - जुज्जदि अत्तणोसोहग्गं णपच्छादेदुं (युज्यते आत्मनस्सौभाग्यं न प्रच्छादयितुम्)।

विदूषकः - भोदि! तुवरेहि भोअणं जंसे पित्तोवसमणं भोदि (भवति! त्वरय भोजनम्, यदस्य पित्तोपशमनं भवति)।

देवी - णिउणिए! सोहणं खुबम्हणेण समासासिदो वअंसो (निपुणिके! शोभनं खलु ब्राह्मणेन समाश्वासितो वयस्यः)।

~~~~~~

विदूषक इति। विदूषकः कथयति। लोप्त्रेण - आत्महृतद्रव्येण सह, गृहीतस्य - उपात्तस्य, कुम्भीलकस्य - चोरस्येव, वाचा - वचनेन, प्रतिवचनम्-उत्तरं, नास्ति - न विद्यते।

राजेति। राजा प्राह। हे देवि, मया, एतत् - त्वद्दत्तं भूर्जपत्रं, न मृग्यते-नान्विष्यते, अयं - क्रियमाणः, आरम्भः - प्रयत्नः, तत्प्रापण्थाः - भुजपत्र-प्राप्त्यर्थः, न खलु - न भवति हि।

देवीति। देवी वदति। किमिति। आत्मनः - स्वस्य, सौभाग्यं - देव-कान्ताविषयक कामम्, नि।। ''भगश्श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिष्वि''त्यमरः, प्रच्छादयितुं - निगूहितुं, न युज्यते - नार्हति, न सम्बध्यत इत्यर्थः।

विदूषक इति। विदूषकः कथयति। भवति - पूज्ये, त्वम् - अस्य, भोजनम् - अभ्यवहारं प्रति, त्वरय - त्वरां कुरु, यद्यस्मात्, अस्य - राज्ञः, पित्तोपशमनं - पैत्यशान्तिः, भवति।

देवीति। देवी वक्ति। हे निपुणिके, ब्राह्मणेन - विदूषकेन, वयस्यः - मित्र भूतो राजा, शोभनं - सम्यक्, समाश्वासितः - उज्जीवितः खल्विति साक्षे पोक्तिः।

विदूषक इति। विदूषकः प्राह। भवति - पूज्ये, ननु - देवि, पश्य -
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

विदूषकः - भोदि! णंपेक्ख आवेसिदो पिसाओ विभोअणेण उज्झदि, किं उण एदं (**भवति! ननु पश्य आवेशितः पिशाचोऽपि भोजने नोज्झति, किंपुनरेतत्**)।

राजा - मूर्ख! बलादपराधिनं मां प्रतिपादयसि।

देवी - णत्थिभवदोअवराहो, अहंजव्व एत्थअवरद्धा, जापडि ऊळदंसणा भविण अग्गदो चिट्ठामि, इदोहं गमिस्सं - णिउणिए! इदोदाव (**नास्ति भवतोऽपराधः, अहमेवात्रापराद्धा, या प्रतिकूलदर्शना-भूत्वाग्रतस्तिष्ठामि, इतोहं गमिष्यामि निपुणिके! इतस्तावत्**)।

राजा - (अनुसृत्य)

विलोकय, आवेशितः - यत्र कुत्रचिदाविष्टः, पिशाचः - भूतोऽपि, भोजनेन - आहारेण, उज्झति - त्यजति, एतत्पित्तं, किंपुनः - त्यजतीति किमुवक्तव्यम्।

राजेति। राजा प्राह। हे मूर्ख - मूढ, मां, बलात् - हठात्, अपराधिनम् - आगःकारिणं, प्रतिपादयसि - आरोपयसि।

देवीति। देवी कथयति। किमिति। भवतः - तव, अपराधः - आगः, नास्ति - न विद्यते, अत्र - अस्मिन्विषये, अहमेव, अपराद्धा - कृतापराधा, यतः, याहं, प्रतिकूलदर्शनाभूत्वा - अननुकूलदर्शनासती, अग्रतः - तव पुरतः, तिष्ठामि - वर्ते, अहम्, इतोऽस्मात्प्रदेशात्, गमिष्यामि - यास्यामि, हे निपुणिके, इतस्तावत् - इमं प्रदेशं प्रति, आगच्छेति शेषः, इत्युक्त्वा, कोपं - क्रोधं, नाटयित्वा - अभिनीय, प्रस्थिता - प्रयाता।

राजेत्यादि। राजा। अनुसृत्य - अनुसरणं कृत्वा, प्राह, हे रम्भोरु - रम्भास्तम्भसदृशोरुकाण्डे, अहम्, अपराधीनाम - आगः कार्येव, प्रसीद - प्रसन्ना भव, संरम्भात् - कोपात्, विरम - शाम्य, सू।। "व्याङ्परिभ्यो रम" इति परस्मैपदम्), सेव्यः - सेवनीयः, जनः - प्रभुरित्यर्थः, प्रकुपितः - क्रुद्धश्चेत्, दासः

In Public domain. Digitization Muthulakshmi Research Academy

अपराधीनामाहं प्रसीद रम्भोरुविरमसंरम्भात्।
सेव्यो जनः प्रकुपितः कथंनुदासो निरपराधः।। 20 ।।
(इति पादयोः पतति)

देवी - (आत्मगतम्) माक्खु अहंळहुहिअआ अणुणअंबहुमण्णे, किंतु अदक्खिण्णुकदस्सते पच्छादावस्सभाआमि (**माखल्वहं लघुहृदयानुनयं बहुमन्ये, किंत्वदाक्षिण्यकृतस्य ते पश्चात्तापस्य बिभेमि**)।
(राजानमपहाय सपरिवारा निष्क्रान्ता देवी)

विदूषकः - भो पावुण्णदीविअ अप्पसण्णागदादेवी, ताउट्ठेहि उट्ठेहि (भोः प्रावृण्णदीव अप्रसन्नागता देवी, तदुत्तिष्ठोत्तिष्ठ)।

राजा - (उत्थाय) **वयस्य**! **नेदमुपपन्नम्।**

~~~~~~

- भृत्यजनः, कथंनु - केन वा प्रकारेण, निरपराधः - अपराधशून्यो भवति, सापराध एवेति भावः, इत्युक्त्वा, पादयोः - देव्याश्चरणयोः, पतति - प्रणमति।

देवीति। देवी। आत्मगतम् - स्वगतम्, वदति, हे लघुहृदय - आगम्भीरस्वान्त, अहम्, अनुनयं - प्रार्थनां, मा बहुमन्ये - मान्यं न करोमि, किन्तु - परन्तु, अदाक्षिण्यकृतस्य - दाक्षिण्याभावविहितस्य, ते - तव, पश्चात्तापस्य, बिभेमि - भयं प्राप्नोमि खलु। इत्युक्त्वा, देवी - राज्ञी, राजानं - नृपम्, अपहाय - त्यक्त्वा, सपरिवारा - परिजनसहिता, निष्क्रान्ता - निर्गता।

विदूषक इति। विदूषको वदति। किमिति। भो - राजन्, देवी - राज्ञी, प्रावृणदी - वर्षासरिदिव, अप्रसन्ना - कलुषासती, गता - याता, तत्तस्मात्, उत्तिष्ठ - उद्गच्छ, सम्भ्रमाद्द्विरुक्तिः।

राजेति। राजा उत्थाय - उद्गम्य, प्राह, हे वयस्य - प्रिय, इदं - सकोपगमनं, नोपपन्नं - न युक्तं, देव्या इति शेषः। **प्रियेति**। प्रियवचनकृतः - प्रिय-
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

प्रियवचनकृतोऽपि योषितां दयितजनानुनयोरसादृते।
प्रविशति हृदयं न तद्विदां मणिरिव कृत्रिमरागयोजितः ॥ 21 ॥

विदूषकः - अणु ऊळं एव्वभवदो एदं, णहिअक्खिपुष्फिदो पमुहेदिवं सहदि **(अनुकूलमेव भवत एतत्, नह्याक्षिपुष्पितः प्रमुखे दीपं सहते)।**

राजा - मामैवम् - ऊर्वशीगतमनसोऽपि मे देव्यां स एव बहुमानः, किन्तु प्रणिपातलङ्घनादहमप्यस्यां धैर्यमवलम्बिष्ये।

विदूषकः - चिट्ठदुदावतेधीरदा, बुभुक्खदस्सबम्हणस्सजीविदं ओळं बेदुभवं, समओक्खुण्हाणभोअणं सेविदुं **(तिष्ठतु तावत्ते धीरता, बुभुक्षितस्य**

वचनैः - अपराधीनामाहमित्यादि चाटूक्तिभिः, कृतः - सम्पादितोऽसि, दयितजनानुनयः - प्रियजनप्रार्थना, रसादृते - अनुरागं विना, नि।। ''पृथग्विनान्तरेणर्ते'' इत्यमरः, सू।। ''अन्यारादित्या''दिना पञ्चमी, योषितां - स्त्रीणां, हृदयं - चित्तं, कृत्रिमरागयोजितः - कल्पितवर्णसंयुतः, मणिः - रत्नं, तद्विदां - मणिगुणदोषवेतॄणां, हृदयमिव, न प्रविशति - न प्राप्नोति, हृदयङ्गमो न भवतीत्यर्थः।

विदूषक इति। विदूषकः कथयति। एतत् - प्रियानिर्गमनं, भवतः - तव, अनुकूलं - समीचीनमेव, आक्षिपुष्पितः - चक्षूरोगग्रस्तः, प्रमुखे - सम्मुखे, दीपं - प्रदीपं, न सहते - न क्षमते हि।

राजेति। राजा प्राह। मामैवं - इत्थं न वक्तव्यम्, आदराद्द्विरुक्तिः, ऊर्वशीगतमनसः - ऊर्वश्यामत्यभिलाषयुक्तस्यापि, मे - मम, देव्यां - पट्टमहिष्यां, सः - पूर्वसदृश एव, बहुमानः - समादरः, किन्तु - परन्तु, अहमपि, प्रणिपातलङ्घनात् - प्रणतिनिराकरणात्, अस्यां - देव्यां विषये, धैर्यं - धीरताम्, अवलम्बिष्ये - धारयिष्ये।

विदूषक इति। विदूषको वदति। ते - तव, धीरता - धैर्यं, तावदिदानीं, तिष्ठतु - आस्तां, भवान्, बुभुक्षितस्य - क्षुधितस्य, ब्राह्मणस्य - भूसुरस्य,

In Public domain. Digitization Muthulakshmi Research Academy

ब्राह्मणस्य जीवितमवलम्बतां भवान्, समयः खलु स्नानभोजनं सेवितुम्)।

राजा - (ऊर्ध्वमवलोक्य) **गतमर्धं दिवसस्य, अतः खलु -**

उष्णालुश्शिशिरे निषीदति तरोर्मूलालवाले शिखी
निर्भिद्योपरिकर्णिकारमुकुलान्यालीयते षट्पदः।
तप्तं वारि विहाय तीरनलिनीं कारण्डवस्सेवते
क्रीडावेश्मनि चैष पञ्जरः शुकः क्लान्तोजलं याचते ॥ 22 ॥

(इति निष्क्रान्तास्सर्वे)

॥ द्वितीयोऽङ्कः॥

जीवितं - जीवनम्, अवलम्बतां - धारयतु, कुतः, स्नानभोजनम् - अभिषेकाभ्यवहारौ, सेवितुं - कर्तु, समयः - अवसरः खलु, इदानीमिति शेषः।

राजेत्यादि। राजा। ऊर्ध्वम् - उपरिभागम्, अवलोक्य - वीक्ष्य, प्राह, दिवसस्य - दिनस्य, अर्धम् - अर्धभागः, गतं - यातम्, अतःखलु - अतएव, शिखी - मयूरः, उष्णालुः - तापमसहमानस्सन्, शिशिरे - शीतले, तरोर्वृक्षस्य, मूलालवाले - मूलालवालप्रदेशे, निषीदति - तिष्ठति, षट्पदः - भ्रमरः, कर्णिकार मुकुलानि - कर्णिकारवृक्षकुट्मलानि, निर्भिद्य - विकास्य, उपरि - ऊर्ध्वभागे, आलीयते - आश्लिष्यति, कारण्डवः - पक्षिविशेषः, तप्तम् - उष्णं, वारि - जलं, विहाय - विसृज्य, तीरनलिनीं - तटपद्मिनीं, सेवते - आश्रयते, क्रीडावेश्मनि - केलिकागारे, एष पुरोवर्ती, पञ्जरशुकः - पञ्जरस्थितकीरश्च, क्लान्तः - श्रान्तस्सन्, जलमुदकं, याचते - अर्थयते।

इतीति। इत्येवमुक्त्वा, सर्वे - राजादयो, निष्क्रान्ता - निर्गताः।

॥ इति श्रीमन्मृत्युञ्जयनिश्शङ्कक्षितिपालविरचिते विक्रमोर्वशीयव्याख्याने रत्नदीपिका समाख्याने द्वितीयोऽङ्कः॥ श्रीरस्तु॥

In Public domain. Digitization Muthulakshmi Research Academy

॥ तृतीयोऽङ्कः ॥

(ततः प्रविशतो भरतशिष्यौ)

प्रथमः - **पैलव! महेन्द्रसदनं गच्छता भगवतोपाध्यायेन त्वमासनं प्रतिग्राहितः, अग्निशरणसंरक्षणाय स्थापितोऽहम्, अतः पृच्छामि, अपि गुरोः प्रयोगेण दिव्यापरिषदाराधिता।**

द्वितीयः - गाळव! णजाणे अहं आराहिआणवत्ति, तस्सिं उण सरस्सई किदकव्वबंधेळच्छी सअंवरेतेसु तेसुरसंतरट्ठाणेसु उव्वसीतम्म ईआसी

कविरिदानीमङ्कान्तरमुपक्रममाणो विष्कम्भं नामार्थोपक्षेपकं प्रस्तौति। **तत इत्यादि।** विष्कम्भलक्षणं तु -

श्लो ॥ वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः।
संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शित॥

इति दर्पणोक्तमनुसन्धेयम्। ततोऽनन्तरं, भरतशिष्यौ - भरताख्यमुनिच्छात्रौ, प्रविशतः - रङ्गस्थलं प्राप्नुतः।

प्रथम इति। प्रथमः - तयोराद्यो गालवः, प्राहेति शेषः, **किमिति।** हे पैलव। त्वं, महेन्द्रसदनम् - इन्द्रभवनं प्रति, गच्छता - व्रजता, भगवता - पूज्येन, उपाध्यायेन - अध्यापकेन, आसनं - पीठं चित्रास्तरणमित्यमरः, प्रतिग्राहितः - धारितोऽसि, अहं तु, अग्निशरणसंरक्षणाय - त्रेताग्न्यगारपरित्राणाय, स्थापितः - निवेशितः, अतोहेतोः, पृच्छामि - प्रश्नं करोमि, त्वामिति शेषः, गुरोः - अस्मदुपाध्यायस्य, प्रयोगेण - नाटकाभिनयेन, दिव्या - स्वर्गस्था, परिषत् - सभा, आराधितापि - आह्लादिता किम्।

द्वितीय इति। द्वितीयः - तयोर्मध्ये द्वितीयः पैलवः, कथयति। हे

(गालव! न जानेऽहमाराधिता नवेति, तस्मिन्पुनस्सरस्वतीकृत-काव्यबन्धे लक्ष्मीस्वयंवरे तेषु तेषु रसान्तरस्थानेषूर्वशी तन्मय्यासीत्)।

प्रथमः - किं सदोषावकाश इव ते वाक्यशेषः।

द्वितीयः - आं, तहिंउव्वसी एवअणं पमादक्खळिदंआसी **(आम्, तत्रोर्वश्या-वचनं प्रमादस्खलितमासीत्)।**

प्रथमः - कथमिव?।

द्वितीयः - लच्छीभूमि आएवट्टमाणा उव्वसी वारुणीभूमिआए मेणआए पुच्छिदा 'सहि! समाअदा इमे तेळ्ळोक्केसरासकेसवाळो अवाळा,

---

गालव, अहम्, आराधिता - आह्लादिता वा, न वा - मा वा, इत्येतत्, न जाने - न वेद्मि, दिव्यपरिषदित्यनुषज्यते, सरस्वतीकृतकाव्यबन्धे - वाणीविरचित-कवितागुम्भे, तस्मिन् - प्रसिद्धे, लक्ष्मीस्वयंवरे पुनः - तदाख्यदृश्यप्रबन्धप्रयोगे तु, ऊर्वशी, तेषु तेषु - तत्तत्कथोचितेषु, रसान्तरस्थानेषु - भिन्नभिन्नरसप्रसङ्गेषु, तन्मयी - तद्रूपा, आसीत् - अभवत्।

प्रथम इति। प्रथमः प्राह, हे पैलव, ते - तव, वाक्यशेषः - अवशिष्ट वाक्यं, सदोषावकाशः - दोषस्यावकाशेन सहित इव, स्थित इति शेषः।

द्वितीय इति। द्वितीयः प्राह। हे गालव, आम् - एवमेव, तत्र - लक्ष्मी स्वयंवरनाटकप्रयोगे, ऊर्वश्याः, वचनं - वाक्, प्रमादस्खलितं - प्रमादेन - अनवधानेन, स्खलितं - व्यत्यस्तम्, आसीत् - अभवत्।

प्रथम इति। प्रथमः प्राह। हे पैलव, कथमिव - केन वा प्रकारेण, वाक्यस्खलनं कथं जातमित्यर्थः।

द्वितीय इति। द्वितीयः कथयति। हे गालव, वारुणीभूमिकया - वारुण्याख्य

In Public domain. Digitization Muthulakshmi Research Academy

कदमस्सिंते भावाहिणिवे'सोत्ति (**लक्ष्मीभूमिकायां वर्तमानोर्वशी वारुणी भूमिकया मेनकया पृष्टा "सखि! समागता इमे त्रैलोक्येश्वरास्सकेशवालोकपालाः, कतमस्मिन् ते भावाभिनिवेश"** इति)।

प्रथमः - **ततस्ततः।**

द्वितीयः - तदोताए पुरुसुत्तमेत्ति भणिदव्वे पुरूरवसित्ति णिग्गदा वाणी **(ततस्तस्याः पुरुषोत्तम इति भणितव्ये पुरूरवसीति निर्गता वाणी)।**

प्रथमः - भवितव्यतानुविधायीनि बुद्धीन्द्रियाणि, न खलु तामभिक्रुद्धो गुरुः ? ।

देवकान्तावेषया, मेनकया, लक्ष्मीभूमिकायां - श्रीवेषे, वर्तमाना - विद्यमाना, ऊर्वशी, इमे - पुरोवर्तिनः, त्रैलोक्येश्वराः - त्रिलोकस्थिताताधिपतयः, सकेशवाः- विष्णुसहिताः, लोकपालाः - दिक्पालकाः, समागताः - समायाताः, तेषु, कतमस्मिन् - कस्मिन्वा पुरुषे, हे सखि - प्रिये, ते - तव, भावाभिनिवेशः - अभिप्रायप्रसारः, इति - इत्थं, पृष्टा - पृच्छ्यते स्म।

प्रथम इति। प्रथमः पृच्छति। हे पैलव, ततस्ततः - अनन्तरं, किमासीदिति वाक्यशेषः। आदराद्द्विरुक्तिः।

द्वितीय इति। द्वितीयः कथयति। हे गालव, ततोऽनन्तरं, तस्या ऊर्वश्याः, पुरुषोत्तम इति, भणितव्ये - वक्तव्ये सति, पुरूरवसीति, वाणी - वाक्, निर्गता - निस्सृता॥८॥

प्रथम इति। प्रथमः पृच्छति। हे पैलव, बुद्धीन्द्रियाणि - बुद्धिर्मतिः, इन्द्रियाणि - नेत्रादीनि च, भवितव्यतानुविधायीनि - भवितव्यतायाः - निश्चित-

द्वितीयः - सत्ताउआज्झाएण महिंदेण उणअणुगहीदा (**शप्तो-पाध्यायेन, महेन्द्रेण पुनरनुगृहीता**)।

प्रथमः - कथमिव?।

द्वितीयः - जेणमे उअदेसो तुएळं घिदोतेण तेदिव्वट्ठाणंण भविस्सदित्ति उआज्झाअस्ससावो, पुरंदरेण उणपेरणाव साणेळज्ञावणदमुहीभणिदा, जस्सिंबद्धभावासितस्समेरणसहाअस्स राएसिणो एव्वपि अंकरणिज्ञं, तातुमं पुरूरवं जहकामं उअचिट्ठ, जावसोदिट्ठ संताणो भविस्सदित्ति (**येन ममोपदेशस्त्वया लङ्घितस्तेन ते दिव्यस्थानं न भविष्यती-त्युपाध्यायस्य शापः, पुरन्दरेण पुनः प्रेरणावसाने लज्जावनतमुखी-**

फलावश्यंभावस्य, अनुविधायीनि - अनुसारीणि, गुरुः - उपाध्यायः, तामूर्वशीं, नाभिक्रुद्धः खलु - न कुपितः किम्।

द्वितीय इति। द्वितीयः कथयति। हे गालव, उपाध्यायेन - गुरुणा, शप्ता - उपालब्धा, महेन्द्रेण पुनः - देवेन्द्रेण तु, अनुगृहीता - अभ्युपपन्ना, नि।। "अभ्युपपत्तिरनुग्रह" इत्यमरः)।

प्रथम इति। प्रथमः पृच्छति। हे पैलव, कथमिव - केन वा प्रकारेण, शापानुग्रहौ जाताविति वाक्यशेषः।

द्वितीय इति। द्वितीयः कथयति। हे गालव, येन हेतुना, त्वया - भवत्या, ऊर्वश्येत्यर्थः, मम, उपदेशः - आदेशः, लङ्घितः - अतिक्रान्तः, तेन कारणेन, ते - तव, दिव्यस्थानं - स्वर्लोकनिवासः, न भविष्यति- न सम्पत्स्यते, इति - इत्थम्, उपाध्यायस्य - गुरोः, शापः - उपालम्भः, जात इति शेषः, अनन्तरं, पुरन्दरेण पुनः - इन्द्रेण तु, प्रेरणावसाने - प्रेषणान्ते, लज्जावनतमुखी - व्रीडानम्रवदना, ऊर्वशीत्यध्याहारः, भणिता - उक्ता, किमिति, हे ऊर्वशि, त्वं,

In Public domain. Digitization Muthulakshmi Research Academy

भणिता, यस्मिन् बद्धभावासितस्य मे रणसहायस्य राजर्षेरेव प्रियं करणीयम्, तस्मात्त्वं पुरूरवसं यथाकाममुपतिष्ठ, यावत्सदृष्ट-सन्तानो भविष्यतीति)।

प्रथमः - सदृशं पुरुषान्तरविदो महेन्द्रस्य।

द्वितीयः - (सूर्यमवलोक्य) कधावसंगेण उअरुद्धा अहिसेअवेळा अम्हो उआज्झाअस्स, एहि जावसेपासपरिवट्टिणो होम्म (**कथाप्रसङ्गे-नोपरुद्धाभिषेकवेला अहो उपाध्यायस्य, एहि यावदस्य पार्श्वपरि-वर्तिनौ भवावः**)।

(इति निष्क्रान्तौ)

।। मिश्रविष्कम्भः ।।

यस्मिन् पुरुषे, बद्धभावा - सक्तहृदया, असि - भवसि, मे - मम, रणसहायस्य - युद्धसहकारिणः, तस्य - राजर्षेः पुरुरवस एव, प्रियमिष्टं, करणीयं - कर्तव्यं, तस्माद्धेतोः, त्वं, पुरूरवसं नामराजानं, यथाकामं - यथेच्छम्, उपतिष्ठ - भज, स राजा, यावत् - यावताकालेन, दृष्टसन्तानः - लब्धसन्ततिः, भविष्यति - सम्पत्स्यते, इत्येवं भणितेति पूर्वेणान्वयः।

प्रथम इति। प्रथमः पृच्छति। हे पैलव, पुरुषान्तरविदः - अन्यपुरुषज्ञस्य, महेन्द्रस्य - सुरेश्वरस्य, सदृशमनुरूपम्, एतद्वचनमिति शेषः।

द्वितीय इति। द्वितीयः - पैलवः, सूर्यं - रविम्, अवलोक्य, प्राह, हे गालव, कथाप्रसङ्गेन - सम्भाषणप्रसक्त्या, उपाध्यायस्य - गुरोः, अभिषेकवेला-स्नानसमयः, उपरुद्धा - प्रतिबद्धा, अहो - आश्चर्यम्, अस्य - गुरोः, पार्श्व-परिवर्तिनौ - समीपस्थितौ, यावद्भवावः - भविष्यावः, एहि - आगच्छ।

इतीति। इत्युक्त्वा। निष्क्रान्तौ - निर्गतौ, गालवपैलवावित्यध्याहारः।

(ततः प्रविशति कञ्चुकी)

कञ्चुकी -

सर्वः कल्ये वयसि यतते भोक्तुमर्थान् कुटुम्बी
पश्चात्पुत्रैरपहृतभरः कल्पते विश्रमाय।
अस्माकं तु प्रतिदिनमियं सादयन्ती शरीरं
सेवाकारापरिणतिरहो स्त्रीषु कष्टोऽधिकारः।। 1।।

(परिक्रम्य) **आदिष्टोऽस्मि सनियमया काशीराजपुत्र्या, व्रतसम्पादनार्थं मया मानमुत्सृज्य निपुणिकामुखेन पूर्वं याचितो महाराजः, त्वमेवं मद्वचनाद्विज्ञापयेति। यावदिदानीमवसितसन्ध्याजपं महाराजं पश्यामि।** (परिक्रम्यावलोक्य च) **अहो ! रमणीयः खलु दिवसावसानवृत्तान्तो राजवेश्मनः। इह हि -**

ततोऽनन्तरम्। कञ्चुकी - सौविदल्लः, प्रविशति - रङ्गभूमिं प्राप्नोति।

अथ कञ्चुकिलक्षणम् -

अन्तःपुरचरो वृद्धो विप्रो गुणगणान्वितः।
सर्वकार्यार्थकुशलः कञ्चुकीत्यभिधीयते।।

कञ्चुकीत्यादि। कञ्चुकी प्राह। किमिति। कल्ये - कार्योपयोगिनि, वयसि - यौवने, सर्वःकुटुम्बी - दारपुत्रादिविशिष्टो गृहस्थः, अर्थान् - विषयान्, भोक्तुम् - अनुभवितुं, यतते - यत्नं करोति, पश्चादनन्तरं, पुत्रैः - सुतैः, अपहृतभरः - स्वीकृतकुटुम्बभारस्सन्, विश्रमाय - विश्रामसुखाय, कल्पते - भवतीत्यर्थः, अस्माकं तु, प्रतिदिनं - दिने दिने, शरीरं - देहं, सादयन्ती - कर्शयन्ती, सेवाकारा - भजनरूपा, इयं - वर्तमाना, परिणतिः - वयः परिणामः, अहो - आश्चर्यकरी भवतीति शेषः, स्त्रीषु विषये, अधिकारः - रक्षणकृत्यं, कष्टः -

In Public domain. Digitization Muthulakshmi Research Academy

उत्कीर्णा इव वासयष्टिषु निशा निद्रालसा बर्हिणो
धूपैर्जालविनिस्सृतैर्वलभयस्सन्दिग्धपारावताः।
आचारप्रयतस्सपुष्पबलिषु स्थानेषु चार्चिष्मती-
स्सन्ध्यामङ्गलवर्तिका विभजते शुद्धान्तवृद्धाजनः॥ 2॥

(दृष्ट्वा) अये इत एव प्रस्थितो देवः। इह हि -

परिजनवनिताकरार्पिताभिः
परिवृत एष विभाति दीपिकाभिः।
गिरिरिव गतिमानपक्षलोपा-
दनुतटपुष्पितकर्णिकारयष्टिः॥ 3॥

प्रयासकरः। परिक्रम्य - किञ्चिद्गत्वा, सनियमया - व्रतस्थया, काशीराजपुत्र्या - औशीनरात्मजया देव्या, आदिष्टः - आज्ञप्तोऽस्मि, किमिति, मया, मानम् - ईर्ष्याकृतकोपम्, उत्सृज्य - त्यक्त्वा, पूर्वं - प्राक्, निपुणिकामुखेन - एतन्नामक-चेटीद्वारा, व्रतसम्पादनार्थं - व्रतं सम्पादयितुं, महाराजः - पुरूरवाः, याचितः - प्रार्थितः, एवमनेन प्रकारेण, त्वम्, मद्वचनात् - मम वाक्यात्, विज्ञापय - निवेदयेति, तस्मादिदानीमद्य, अवसितसन्ध्याजपं - निर्वर्तितसायङ्कालजपं, महाराजं, यावत्पश्यामि - विलोकयिष्यामि, इत्युक्त्वा, परिक्रम्य - किञ्चिद्गत्वा, अवलोक्य - दृष्ट्वा च, पुनःप्राह, राजवेश्मनः - महाराजागारस्य, दिवसावसान-वृत्तान्तः - सायन्तनव्यापारः, रमणीयः खलु - अतिमनोहरः किल, अहो - आश्चर्यम्, हि - यस्मात्, इहात्र, निशानिद्रालसाः - निशायां - रात्रौ, निद्रया-शयनेन, अलसाः - मन्दतया निश्चलाः, बर्हिणो - मयूराः, वासयष्टिषु - निवास दण्डेषु, उत्कीर्णाः - चित्रिता इव स्थिताः, वलभयः - वलियाकनि, नि॥ "वलभिस्तु वलीकं स्यादिति विश्वः", जालविनिस्सृतैः - गवाक्षमार्गनिर्गतैः, धूपैः - चन्दनादिसुरभिद्रव्यधूपधूमैः, सन्दिग्धपारावताः - पारावतसन्देहजनकाः, भवन्ति,

In Public domain. Digitization Muthulakshmi Research Academy

यावदेनमवलोकनमार्गे स्थितः प्रतिपालयामि। (परिक्रम्य स्थितः)।

(ततः प्रविशति यथानिर्दिष्टपरिवारो राजा विदूषकश्च)

राजा - (आत्मगतम्) -

कार्यान्तरितोत्कण्ठं दिनं मयानीतमनतिकृच्छ्रेण।
अविनोददीर्घया मा कथं नु रात्रिर्गमयितव्या ॥ 4 ॥

आचारप्रयतः - गृहीततत्तत्कार्यनियमः, शुद्धान्तवृद्धाजनः - अन्तःपुरस्थितवृद्ध-नारीजनः, सपुष्पबलिषु - पुष्पोपहारसहितेषु, स्थानेषु - प्रदेशेषु, अर्चिष्मतीः - ज्वालायुक्ताः, सन्ध्यामङ्गलवर्तिकाः - सान्ध्यशुभप्रदवर्तीः, विभजते - विभज्य स्थापयति, दृष्ट्वा - अवलोक्य, वक्ति, अये इत्यात्मन्येव सम्बोधनम्, देवः - राजा, इतः - इमं प्रदेशमेव, प्रस्थितः - आयातः, इह हि - अत्र हि, एष राजा, परिजनवनिताकरार्पिताभिः - परिजनवनितानां - भृत्यस्त्रीणां, करैः - पाणिभिः, अर्पिताभिः - समर्पिताभिः, दीपिकाभिः - प्रदीपैः, परिवृतः - युतस्सन्, अनु-तटपुष्पितकर्णिकारयष्टिः, अनुतटं - प्रतितटं, पुष्पिताः - विकसिताः, कर्णि-काराणां - वृक्षविशेषाणां, यष्टयः - शाखाः यस्मिन् स तथोक्तः, आपक्षलोपात् - पक्षनाशाभावात्, गतिमान् - गमनविशिष्टः, गिरिः - पर्वत इव, विभाति - प्रकाशते, एनं - राजानम्, अवलोकनमार्गे - दृष्टिपथे, स्थितः - निविष्टस्सन्, यावत्प्रतिपालयामि - प्रतिपालयिष्यामि, इत्युक्त्वा, परिक्रम्य - किञ्चिद्गत्वा, स्थितः - वर्तते स्म।

तत इति। ततोऽनन्तरम्। यथानिर्दिष्टपरिवारः - यथोक्तपरिजनसहितः, राजा - पुरूरवाः, विदूषकः - माणवकश्च, प्रविशति - रङ्गस्थलं प्राप्नोतीति प्रत्येकान्वयः।

राजेत्यादि। राजा। आत्मगतं - स्वमात्रावगतं यथातथा प्राह, मया,

In Public domain. Digitization Muthulakshmi Research Academy

कञ्चुकी - (उपसृत्य) जयतु देवः। देवी विज्ञापयति, मणिहर्म्य पृष्ठे सुदर्शनश्चन्द्रः तत्र सन्निहितेन देवेन प्रतिपालयितव्या यावच्चन्द्रमसो रोहिणी संयोग इति।

राजा - आर्यसत्कीर्ते विज्ञाप्या देवी, यस्तेच्छन्द इति।

कञ्चुकी - यदाज्ञापयति देवः (इति निष्क्रान्तः)।

कार्यान्तरितोत्कण्ठं - कार्यैः - व्यवहारदर्शनादिप्रयोजनैः, अन्तरिता - आच्छादिता, उत्कण्ठा - ऊर्वशीसमागमचिन्ता यस्मिन् तत्, दिनं - वासरम्, अनतिकृच्छ्रेण- अनत्याभीलेन, नि॥ ''स्यात्कष्टं कृच्छ्रमाभीलं त्रिष्वेषां भेद्यगामियदि''त्यमरः, नीतं - यापितम्, अविनोददीर्घयामा - अविनोदेन - कालयापनोपायाभावेन, दीर्घाः - दीर्घत्वेन प्रतीयमानाः, यामाः - प्रहरायस्यास्सा, रात्रिः - निशा, कथं नु - केन वा प्रकारेण, गमयितव्या - नेतव्या।

कञ्चुकीति। कञ्चुकी। उपसृत्य - राजानमुपगम्य प्राह, जयतु देवः - राजा सर्वोत्कर्षेण वर्ततां, देवी - पट्टमहिषी, विज्ञापयति - विशदीकरोति, कथं, मणिहर्म्यपृष्ठे - रत्नमयप्रासादाग्रे, चन्द्रः - इन्दुः, सुदर्शनः - सुलभप्रेक्षणः, तत्र - तत्रप्रदेशे, सन्निहितेन - समीपस्थितेन, देवेन - राज्ञा, यावत् - यावताकालेन, चन्द्रमसः - हिमांशोः, रोहिणीसंयोगः - रोहिण्याख्यनक्षत्रसम्बन्धः भवति, तावत्, प्रतिपालयितव्या - प्रतीक्षणीया, इत्येवं विज्ञापयतीति पूर्वेणानुषङ्गः।

राजेति। राजा प्राह। हे आर्यसत्कीर्ते - तन्नामककञ्चुकिन्, ते - तव, छन्दः - अभिप्रायः, यः - यादृशः, तथा करोमीति वाक्यशेषः, इत्यनेन प्रकारेण, देवी, विज्ञाप्या - विज्ञापनीया।

कञ्चुकीति। कञ्चुकी वक्ति। देवः - महाराजः, यदाज्ञापयति - येन प्रकारेणानुशास्ति, तथा करोमीति वाक्यशेषः (इत्युक्त्वा) निष्क्रान्तः - निर्गतः।

In Public domain. Digitization Muthulakshmi Research Academy

राजा - वयस्य किं परमार्थत एव देव्या व्रतनिमित्तोऽयमारम्भस्स्यात् ?।

विदूषकः - भो तक्केमि जादपच्चादा वातत्थभोदी वदव्ववदेसेण भवदोपणिपादलं घणंपमज्जिदुकामात्ति **(भो तर्कयामि जातपश्चात्तापा तत्रभवती व्रतव्यपदेशेन भवतः प्रणिपातलङ्घनं प्रमार्जितुकामेति)।**

राजा - उपपन्नं भवानाह। तथा हि -

अवधूतप्रणिपाताः पश्चात्सन्तप्यमानमनसोऽपि।
निभृतैर्व्यपत्रपन्ते दयितानुनयैर्मनस्विन्यः ॥ 5॥

तदा दर्शय मणिहर्म्यस्य मार्गम् ।

राजेति। राजा प्राह। हे वयस्य - सखे, देव्याः - पट्टमहिष्याः, अयं - वर्तमानः, आरम्भः - कार्योपक्रमः, परमार्थतः - यथार्थतः, व्रतनिमित्तः - व्रतहेतुक एव, स्यात् - भवेत्किम् ।

विदूषक इति। विदूषकः कथयति। भो राजन्, जातपश्चात्तापा - सम्भूतानुतापा, तत्र भवती - पूज्या देवी, भवतस्तव, प्रणिपातलङ्घनं - प्रणामातिक्रमं, व्रतव्यपदेशेन - नियमव्याजेन, प्रमार्जितुकामा - अपनेतुमना इति, तर्कयामि - सम्भावयामि ।

राजेति। राजा प्राह। भवान्, उपपन्नं - युक्तमेव, आह - ब्रवीति, तथाहि - तथैव खलु, अवधूतेति, मनस्विन्यः - मानिन्यः, अवधूतप्रणिपाताः - अवधीरितप्रियप्रणामा अपि, निभृतैः - मनसि धृतैः, दयितानुनयैः - प्रियप्रार्थनावचनैः, सन्तप्यमानमनसः - तापसं युक्तचित्तास्सत्यः, पश्चादनन्तरं, व्यपत्रपन्ते-विशेषेण लज्जां प्राप्नुवन्ति, तत्तस्मात्, मणिहर्म्यस्य - रत्नप्रासादस्य, मार्गं - पन्थानम्, आदर्शय - प्रदर्शय ।

In Public domain. Digitization Muthulakshmi Research Academy

विदूषकः - इदोइदो भवं, इमिणा गंगातरंगसमसिरिएण फळिहमणिसोआणेण आरुहदुभवंपदोसावसाण रमणिज्ञं मणिहम्मं **(इतो इतो भवान्, अनेन गङ्गातरङ्गसमश्रीकेण स्फटिकमणिसोपानेनारोहतु भवान् प्रदोषावसानरमणीयं मणिहर्म्यम्)।**

(राजा। आरोहाग्रतः)

(सर्वे सोपानोत्सर्पणं रूपयन्ति)

विदूषकः - (विलोक्य) भोभो पच्चासण्णेण चंदोदएणभविदव्वं, जहतिमिरेणहि अमाणंपुव्वदिसामुहं ओळो असुह अंदीसदि **(भोः भोः प्रत्यासन्नेन चन्द्रोदयेन भवितव्यम्, यथा तिमिरेण हीयमानं पूर्वदिङ्मुखमवलोकसुभगं दृश्यते)।**

विदूषक इति। विदूषक आह। भवान्, इत इतः - अनेनानेन मार्गेण आगच्छत्विति शेषः, भवान्, प्रदोषावसानरमणीयं - प्रदोषावसाने - सायंकालान्ते, रमणीयं - मनोहरं, मणिहर्म्यं - मणिमयसौधं, गङ्गातरङ्गसमश्रीकेण - गङ्गातरङ्गैः - सुरनदीवीचिभिः, समा - तुल्या, श्रीश्शोभा यस्य तेन, सू।। ''उरः प्रभृतिभ्यः कबि''ति कप्, अनेन - पुरो दृश्यमानेन, स्फटिकमणिसोपानेन - स्फटिकशिलानिर्मितसोपानेन, आरोहतु - अध्यास्यतु।

राजेति। राजा प्राह। हे वयस्य, त्वं अग्रतः - पुरतः, आरोह - अधितिष्ठ।

सर्व इति। सर्वे - राजादयः, सोपानोत्सर्पणं - सोपानैरुपरिगमनं, रूपयन्ति - अभिनयन्ति।

विदूषक इति। विदूषकः। विलोक्य - दृष्ट्वा, प्राह, भो राजन्, आदराद् द्विरुक्तिः, चन्द्रोदयेन - नक्षत्रेश्वराभ्युदयेन, प्रत्यासन्नेन - समीपस्थेन, भवितव्यंभाव्यम्, यथा - येन प्रकारेण ज्ञातमिति चेत्, पूर्वदिङ्मुखं - प्राग्दिक्प्रारम्भः,

In Public domain. Digitization Muthulakshmi Research Academy

राजा - सम्यग्भवानाह -

उदयगूढशशाङ्कमरीचिभिस्तमसिदूरमितः प्रतिसारिते।
अलकसंयमनादिवलोचने हरति मे हरिवाहनदिङ्मुखम् ॥ 6॥

विदूषकः - हीहीभोखंडमोद असरिसोउट्ठिदोभ अवंमिअलंछणो (**हीही भोः खण्डमोदकसदृश उत्थितो भगवान् मृगलाञ्छनः**)।

राजा - (सस्मितम्) **सर्वत्रौदरिकस्याभ्यवहार्यमेव विषयः** (प्राञ्जलिः प्रणिपत्य) **भगवन् क्षपानाथ -**

~~~~~~

तिमिरेण - तमसा, हीयमानं - त्यक्तं सत्, अवलोकसुभगं - दृष्टिरम्यं, दृश्यते- विलोक्यते।

राजेति। राजा प्राह। हे वयस्य, भवान्, सम्यक् - युक्तम्, आह - ब्रवीति। **उदयेति**। उदयगूढशशाङ्कमरीचिभिः - उदयाचलान्तरितचन्द्रकिरणैः, तमसि - अन्धकारे, इतः - अस्माद्दिग्भागात्, दूरम् - आयतं यथातथा, प्रतिसारिते - निरस्ते सति, हरिवाहनदिङ्मुखं - हरिवाहनस्य - हरिहयस्य - इन्द्रस्येत्यर्थः, या दिक् - प्राची, तस्याः, मुखम्, अलकसंयमनात् - केशबन्धादिव, मे - मम, लोचने - नेत्रे, हरति - आकर्षति, अस्मिन् श्लोके प्राग्दिशो वनितया, तन्मुखस्य वनिताननेन च ध्वनिना औपम्यं गम्यते।

विदूषक इति। विदूषको वक्ति। हीहीत्याश्चर्ये, भो राजन्, खण्डमोदकसदृशः - खण्डमोदकतुल्यः, भगवान् - पूज्यः, मृगलाञ्छनः - चन्द्रः, उत्थितः - उदितः, नवोदितेन्दोः - अरुणकान्तिमत्वेन खण्डमोदकसाम्यं सुसङ्गतम्।

राजेति। राजा। सस्मितम् - समन्दहासं प्राह, सर्वत्र - सर्वदा, औदरिकस्य - उदरपोषणे पर्युत्सुकस्य, सू॥ ''उदराट्ठगाद्यून'' इति ठक्, अभ्यवहार्यं -
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

रविमावसते सतां क्रियायै सुधया तर्पयते सुरान् पितृंश्च।
तमसां निशिमूर्छतां निहन्त्रे हरचूडानिहितात्मने नमस्ते॥ 7॥

(उत्तिष्ठति)

विदूषकः - भोवअंस बम्हणाणण संकामिदक्खरेणते पिदामहेण अब्भणुण्णादोसि, आसणगदोहोहि, जावअहं विसुहासीणोहोमि (भो वयस्य ब्राह्मणाननसंक्रामिताक्षरेण ते पितामहेनाभ्यनुज्ञातोऽसि, आसनगतो भव, यावदहमपि सुखासीनो भवामि)।

राजा - तथा (विदूषकवचनं परिगृह्योपविष्टः परिजनं विलोक्य) **अभिव्यक्तायां चन्द्रिकायां किं दीपिका पौनरुक्त्येन? विश्राम्यन्तु भवत्यः।**

~~~~~~

भक्ष्यमेव, विषयः - गोचरो भवति, इति कथयन्, प्राञ्जलिः - कृताञ्जलिस्सन्, प्रणिपत्य - प्रणम्य, चन्द्रमिति शेषः, पुनःप्राह, हे भगवन् - पूज्य, क्षपानाथ - निशापते। **रविमिति**॥ सतां - विदुषां, क्रियायै - इष्ट्यादिकर्मणे, रविं - सूर्यम्, आवसते- अधितिष्ठते, सुधया - अमृतेन, सुरान् - देवान्, पितॄन् - अग्निष्वात्तादींश्च, तर्पयते - प्रीणयते, निशि - रात्रौ, मूर्छतां - व्याप्नुवतां, तमसाम् - अन्धकाराणां, निहन्त्रे - निवारकाय, हरचूडानिहितात्मने - ईश्वरशिरस्स्थापितमूर्तये, ते - तुभ्यं, सू॥ ''नमस्स्वस्ती''त्यादिना चतुर्थी, नमः - नतिः, अस्त्वितिशेषः, इत्युक्त्वा, उत्तिष्ठति - उत्थितो भवति।

विदूषक इति। विदूषको वदति। भो वयस्य - हे सखे राजन्, ब्राह्मणाननसंक्रामिताक्षरेण - ब्राह्मणस्य मम, आनने - मुखे, संक्रामितानि - प्रवेशितानि, अक्षराणि - वर्णानि येन तेन, ते - तव, पितामहेन - पितृपित्रा चन्द्रेण, अभ्यनुज्ञातः - आज्ञापितोऽसि, किमिति, त्वम्, आसनगतः - गृहीतासनः, भव - एधि, अहमपि सुखासीनः - सुखोपविष्टः, यावद्भवामि - भविष्यामि।
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

परिजनः - जंभट्टा आणवेदि (इति निष्क्रान्तः) (यद्भर्ताज्ञापयति)।

राजा - (चन्द्रमसं विलोक्य विदूषकं प्रति) **वयस्य परं मुहूर्तादागमनं देव्याः, तद्विविक्ते कथयिष्यामि स्वामवस्थाम्।**

विदूषकः - भोणदीसदिज्ञेव्वसा, किंतु तारिसंअणुराअंपेक्खि असक्कंखु आसाबंधेण अत्ताणंधारेदुं (**भो न दृश्यत एव सा, किन्तु तादृशमनुरागं प्रेक्ष्य शक्यं खल्वाशाबन्धेनात्मानं धारयितुम्)।**

राजेति। राजा। तथा - तेन प्रकारेण करोमीति, विदूषकवचनं - माणवकवाचं, परिगृह्य - अङ्गीकृत्य, उपविष्टः - निषण्णस्सन्, परिजनं - निकट स्थितभृत्यजनं, विलोक्य - वीक्ष्य, प्राह, कथम्, चन्द्रिकायां - ज्योत्स्नायाम्, अभिव्यक्तायां - स्फुटं भासमानायां सत्यां, दीपिकापौनरुक्त्येन - प्रदीपावृत्त्या, किं - किं वा प्रयोजनं, तस्मात्, भवत्यः, विश्राम्यन्तु - सुखेन तिष्ठन्तु।

परिजन इति। परिजनः कथयति। भर्ता - प्रभुः, यदाज्ञापयति - नियोजयति, तत्करोमीति वाक्यशेषः, इत्युक्त्वा निष्क्रान्तो - निर्गतः।

राजेति। राजा - पुरूरवाः, चन्द्रमसं - सुधांशुं, विलोक्य - अवेक्ष्य, विदूषकं प्रति - माणवकमुद्दिश्य, प्राह, हे वयस्य - प्रियसख, देव्याः - पट्टमहिष्याः, आगमनम् - आगतिः, मुहूर्तात् - घटिकाद्वयपरिमितकालात्, परम्- ऊर्ध्वं भविष्यतीति शेषः, तत्तस्मात्, विविक्ते - विजिनेऽस्मिन्प्रदेशे, स्वामात्मीयाम्, अवस्थां - स्थितिं, कथयिष्यामि - वक्ष्यामि।

विदूषक इति। विदूषको वक्ति। भो राजन्, सा - ऊर्वशी, न दृश्यते- न विलोक्यत एव, किन्तु - परन्तु, तादृशम् - आलोकसामान्यम्, अनुरागं - प्रेमाणं, प्रेक्ष्य - दृष्ट्वा, आशाबन्धेन - आशा - तृष्णा, सैव बन्धः - बन्धनं तेन, आत्मानं - स्वं, धारयितुं - स्थापयितुं, शक्यं - साध्यं खलु।

 In Public domain. Digitization Muthulakshmi Research Academy

राजा - एवमेतत्, बलवान् पुनर्मे मनोऽभिलाषः,

नद्या इव प्रवाहो विषमशिलासङ्कटस्खलितवेगः।

विघ्नितसमागमसुखो मनसि शयश्शतगुणो भवति॥ 8॥

विदूषकः - भोजहपरिही अमाणेहिं अंगेहिं अहिअं सोहसितह अदूरेपि आसमाअमं पेक्खामि **(भो यथा परिहीयमानैरङ्गैरधिकं शोभसे तथा अदूरे प्रियासमागमं पश्यामि)।**

राजा - (निमित्तं सूचयित्वा) **वयस्य -**

वचोभिराशाजननैर्भवानिव गुरुव्यधम्।

अयं मां स्पन्दितैर्बाहुराश्वासयति दक्षिणः॥ 9॥

राजेति। राजा प्राह। हे वयस्य, एतत् - भवदुक्तम्, एवं - सत्यम्, मे- मम, मनोऽभिलाषः पुनः - मनोरथस्तु, बलवान् - प्रबलः। नद्या इति। विघ्नित समागमसुखः - विघ्नितं - प्रतिबन्धकेनाहतं, समागमसुखं - समावेशसुखं यस्य सः, मनसिशयो - मन्मथः, विषमशिलासङ्कटस्खलितवेगः - विषमेषु - निम्नोन्नतेषु, शिलासङ्कटेषु - पाषाणसम्बाधेषु, स्खलितवेगः - प्रतिहतवेगः, नद्याः - सरितः, प्रवाहः - प्रसार इव, शतगुणः - शतावृत्तिः, भवति - सम्पद्यते।

विदूषक इति। विदूषकः प्राह। भो राजन्, परिहीयमानैः - परिक्षीयमाणैः, अङ्गैः - अवयवैः, यथा - येनप्रकारेण, अधिकं - भृशं, शोभसे - प्रतिभासि, तथा - तेन प्रकारेण, अदूरे - समीपे, प्रियासमागमं - प्रेयसी समावेशं, पश्यामि - अवलोकयामि।

राजेति। राजा। निमित्तं - शुभसूचकं, सूचयित्वा - ज्ञापयित्वा, प्राह, हे वयस्य - सखे माणवक, आकर्णय। वचोभिरिति। आशाजननैः - तृष्णाकारणैः, वचोभिः - भाषितैः, भवान् - त्वमिव, अयम् - एषः, दक्षिणः - सव्येतरः,

In Public domain. Digitization Muthulakshmi Research Academy

विदूषकः - णक्खुअण्णहाबम्हणस्सवअणं **(न खल्वन्यथा ब्राह्मणस्य वचनम्)।**

राजा - (सप्रत्याशस्तिष्ठति) **ततः प्रविशत्याकाशयानेन किञ्चित् क्षीबा-कृताभिसारिका वेषा ऊर्वशी चित्रलेखा च।**

ऊर्वशी - (आत्मानं विलोक्य) हळाचित्तळेहे अविरोअदिते अअं मेअप्पा-भरणभूसिदोणीळंसुअ परिग्गहोअहिसारिआवेसो **(सखि चित्रलेखे अपि रोचतेऽयं मेऽल्पाभरणभूषितो नीलांशुकपरिग्रहोऽभि-सारिका वेषः?)।**

बाहुः - भुजः, स्पन्दितैः - स्फुरितैः, गुरुव्यधं - दुर्भरविरहवेदनं, मामाश्वासयति- उज्जीवयति।

विदूषक इति। विदूषको वदति। ब्राह्मणस्य - विप्रस्य, वचनं - वाक्यं, अन्यथा - अन्यप्रकारं, न खलु - न भवति हि।

राजेति। राजा - पुरूरवाः, सप्रत्याशः - ऊर्वशीप्रत्यागमनाशासहितस्सन्, तिष्ठति - वर्तते, ततोऽनन्तरं, किञ्चित्क्षीबा - ईषन्मत्ता, कृताभिसारिका वेषा - कृतः - रचितः, अभिसारिकायाः - नायिकाविशेषस्य, वेषो - नेपथ्यं यया सा तथोक्ता, नि।। ''कान्तार्थिनी तु यायाति सङ्केतं साभिसारिके''त्यमरः, ऊर्वशी, चित्रलेखा - तन्नाम्नी सखी च, आकाशयानेन - वियन्मार्गेण, प्रविशति - रङ्गस्थलं प्राप्नोतीति प्रत्येकान्वयः।

ऊर्वशीति। ऊर्वशी। आत्मानं - स्वस्वरूपं, विलोक्य - वीक्ष्य, वदति, हे सखि - चित्रलेखे, अल्पाभरणभूषितः - विरलालङ्कारपरिष्कृतः, नीलांशुक-परिग्रहः - धृतकृष्णाम्बरः, मे - मम, अयमेषः, अभिसारिकावेषः - अभिसारिका भूमिका, रोचतेऽपि - रुचिं करोति किं, तुभ्यमिति - शेषः।

In Public domain. Digitization Muthulakshmi Research Academy

चित्रलेखा - णत्थिमेवा आविहवोपसंसिदुं, इदंतुचिंतेमि, अविणाम अहं पुरूरवो भवेअंति **(नास्ति मे वाग्विभवः प्रशंसितुम्, इदं तु चिन्तयामि, अपि नामाहं पुरूरवा भवेयमिति)।**

ऊर्वशी - सहि मेमअणोक्खुतुमं आणवेदि, सिग्घंणेहिमंतस्स सुहअस्सव-सदिंति **(सखि मे मदनः खलु त्वामाज्ञापयति, शीघ्रं नय मां तस्य सुभगस्य वसतिमिति)।**

चित्रलेखा - (विलोक्य) णंएदंपडिवत्ति दंविअ केळाससिहरं देपिअदम-स्सभवणं उअगदम्ह **(नन्वेतत्प्रतिवर्तितमिव कैलासशिखरं ते प्रियतमस्य भवनमुपगते स्वः)।**

ऊर्वशी - तेणहिपहावदोजाणीहि, कहिंसोमहहि अअचोरो, किंवा अणु-

~~~~~~

चित्रलेखेति। चित्रलेखा कथयति। मे - मम, प्रशंसितुं - वर्णयितुं, भूमिकारामणीयकमितिशेषः, वाग्विभवः - वचो वैभवं, नास्ति - न विद्यते, इदं-वक्ष्यमाणं तु, चिन्तयामि - तर्कयामि, किमिति। अहं, पुरूरवाः - तन्नामा राजा, अपि नाम भवेयं - स्यां किमिति।

ऊर्वशीति। ऊर्वशी वदति। हे सखि - चित्रलेखे, मे - मत्सम्बन्धी, मदनः - कामः, त्वां - भवतीम्, आज्ञापयति खलु - नियोजयति हि, किमिति, सुभगस्य - सुन्दरस्य, तस्य - राज्ञः, वसतिं - निवासं, मां, शीघ्रं - सत्वरं, नय-प्रापयेति।

चित्रलखेति। चित्रलेखा। विलोक्य - वीक्ष्य, ब्रवीति, ननु - सखि, प्रतिवर्तितं - प्रतिबिम्बितं, कैलासशिखरं - राजतशैलश्रृङ्गमिवस्थितं, ते - तव, प्रियतमस्य - अत्यन्तप्रियस्य, एतत् - पुरोवर्ति, भवनं - गृहम्, उपगते - प्राप्ते, स्वः - भवावः, आवामिति शेषः।
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

चिट्ठदित्ति **(तेन हि प्रभावतो जानीहि, कुत्र सममहृदयचोरः, किं वानुतिष्ठतीति)।**

चित्रलेखा - (ध्यात्वा आत्मगतम्) भोदु, कीडिस्संदावएदाए सह (प्रकाशम्) हळा! एसोमणोरहळद्धं पिअसमाअमसुहं अणुभवंतोउ अभोअक्खमेओआसेचिट्ठदि **(भवतु क्रीडिष्ये तावदेतया सह, सखि एष मनोरथलब्धं प्रियासमागमसुखमनुभवन्नुपभोगक्षमेऽवकाशे तिष्ठति)।**

(ऊर्वशी विषादं नाटयति)

चित्रलेखा - हुंमुद्धेका उणअण्णाचिंतापि असमाअमस्सकप्पिदा **(हुम्, मुग्धे का पुनरन्या चिन्ता प्रियसमागमस्य कल्पिता)।**

ऊर्वशीति। ऊर्वशी वदति। तेन हि - हेतुना, हे सखि, मम, हृदयचोरः-मनोहर्ता, सः - राजा, कुत्र - कस्मिन् प्रदेशे, किंवानुतिष्ठति - किं वा प्रयोजनं करोति, इति - इत्थं, प्रभावतः - स्वमहिमतः, जानीहि - आवेहि।

चित्रलेखेति। चित्रलेखा। ध्यात्वा - किञ्चिच्चिन्तयित्वा, आत्मगतं - स्वगतं यथा तथा वक्ति, भवतु - अस्तु, एतया सह - अनया ऊर्वश्यासाकं, क्रीडिष्ये तावत् - विहरिष्ये, प्रकाशम् - सर्वश्राव्यं यथातथा, वदति, हे सखि-प्रिये, एष राजा, मनोरथलब्धं - वाञ्छापरिप्राप्तं, प्रियासमागमसुखं - प्रेयसी समावेशसौख्यम्, अनुभवन् - प्राप्नुवन्, उपभोगक्षमे - विहारयोग्ये, अवकाशे-प्रदेशे, तिष्ठति - वर्तते।

ऊर्वशी। विषादं - व्यथां, नाटयति - अभिनयति।

चित्रलेखेति। चित्रलेखा कथयति। हे मुग्धे - आप्रौढे, प्रियसमागमस्य - वाञ्छितपुरुषसमावेशस्य, अन्या - इतरा, चिन्ता - वितारः, का पुनः - का वा, कल्पिता - ऊहिता, हुमिति प्रश्ने, नि।। ''हुंवितर्के परिप्रश्न'' इत्यमरः)।

In Public domain. Digitization Muthulakshmi Research Academy

ऊर्वशी - (सोच्छ्वासा) सहि अपेक्खिअणं संदिहदिमेहि अअं (**सखि अदृष्ट्वैनं सन्देग्धि मे हृदयम्**)।

चित्रलेखा - (विलोक्य) एसोमणिहम्मगदोव अंसमेत्तसहा ओराएसी ताएहि उअसप्पम्हणम् (उभे अवतरतः) (**एष मणिहर्म्यगतो वयस्यमात्रसहायो राजर्षिः, तदेह्युपसर्पाव एनम्**)।

राजा - वयस्य! रजन्या सह वर्धते मदनबाधा।

ऊर्वशी - अणवद्धि देणइमिणावअणेण आकंपिदं मेहिअअं, अंतरहिदा एव्वसुणुमेसेस इराळावं, जावणोसंस अच्छेदोभोदि (**अनवस्थिते-**

ऊर्वशीति। ऊर्वशी। सोच्छ्वासा - सनिश्श्वासा सती, वक्ति, हे सखि - प्रिये, एनं - पुरूरवसम्, अदृष्ट्वा - अनवलोक्य, मे - मम, हृदयं - मनः, सन्देग्धि - संशयं प्राप्नोति।

चित्रलेखेति। चित्रलेखा। विलोक्य - वीक्ष्य, ब्रूते, मणिहर्म्यगतः - माणिक्यप्रासादस्थितः, वयस्यमात्रसहायः - विदूषकमात्रानुचरः, एष परिदृश्यमानः, राजर्षिः - राजश्रेष्ठः पुरूरवाः, तत्तस्मात्, एहि - आगच्छ, एनं - राजानम्, उपसर्पावः - अनुसरावः, इत्युक्त्वा, उभे - ऊर्वशीचित्रलेखे, अवतरतः - आकाशादवरोहतः।

राजेति। राजा प्राह। हे वयस्य - सखे विदूषक, मदनबाधा - कामपीडा, रजन्या सह - रात्र्यासाकं, वर्धते - प्रवर्धते।

ऊर्वशीति। ऊर्वशी वक्ति। मे - मम, हृदयं - मनः, अनवस्थितेन - अनियतेन, अनेन - राजोक्तेन, वचनेन - वाक्येन, आकम्पितं - चलितम्, अन्तर्हिते - तिरस्करिणी विद्यया प्रच्छन्ने एव, अस्य - राज्ञः, स्वैरालापं - स्वेच्छा

In Public domain. Digitization Muthulakshmi Research Academy

नानेन वचनेनाकम्पितं मे हृदयम्, अन्तर्हिते एव शृणुवोऽस्य स्वैरालापम्, यावन्नौ संशयच्छेदो भवति)।

चित्रलेखा - जंतेरोअदि (यत्ते रोचते)।

विदूषकः - णंइमेअमिअगब्भा सेवि अंतुचंदपादा (**नन्विमेऽमृतगर्भा-स्सेव्यन्तां चन्द्रपादाः**)।

राजा - वयस्यैवमादिभिरुपक्रम्योऽयमातङ्कः? पश्य - कुसुमशयनं न प्रत्यग्रं न चन्द्रमरीचयो न च मलयजं सर्वाङ्गीणं न वा मणि-भूमयः। मनसिजरुजं सा वादिव्याममालमपोहितुम्।

सम्भाषणं, शृणुवः - आकर्णयावः, यावत् - यावताकालेन, नौ - आवयोः, संशयच्छेदः - सन्देहनिवृत्तिः, भवति।

चित्रलेखेति। चित्रलेखा वदति। हे ऊर्वशि, ते - तुभ्यं, सू।। ''रुच्यर्थानां प्रीयमाण इति सम्प्रदानत्वाच्चतुर्थी'', यद्रोचते - प्रियं भवति, तत्कुर्विति वाक्यशेषः।

विदूषक इति। विदूषको वक्ति। ननु - राजन्, अमृतगर्भाः - अन्तर्गत सुधाः, इमे - एते, चन्द्रपादाः - सुधांशुरश्मयः, नि ।। ''पादारश्म्यङ्घ्रितुर्यांशा'' इत्यमरः, सेव्यन्ताम् - अनुभूयन्तां, त्वयेति शेषः, तापशमनार्थमिति भावः ।

राजेति। राजा प्राह। हे वयस्य - सखे, एवमादिभिः - चन्द्रकिरण-निषेवणप्रभृतिभिरुपचारैः, अयमातङ्कः - एष कामज्वरः, नि ।। ''रुक्तापशङ्का-स्वातङ्क'' इत्यमरः, उपक्रम्यः - चिकित्स्य इति काकुः, सचिकित्स्य एवेति भावः, पश्य - आलोकय, तदेवाह, कुसुमेति, प्रत्यग्रम् - अभिनवं, नि ।। ''प्रत्यग्रोऽभिनवो नव्यो नवीनो नूतनो नवः। नूत्नश्चे''त्यमरः, कुसुमशयनं - पुष्पशय्या, मम, मनसिरुजं - मदनज्वरम्, अपोहितुं - निरसितुं, नालं - न समर्थं, चन्द्रमरीचयः - चन्द्रकिरणाः, नालं - न समर्थाः, मलयजं - चन्दनं च,

In Public domain. Digitization Muthulakshmi Research Academy

ऊर्वशी - काअवरा (**का परा**)।

राजा - रहसि लघयेदारब्धा वा तदाश्रयिणी कथा।

ऊर्वशी - हि अअ! दाणिंमं उज्झिअ अस्सिंसंकंतेणतु एफळं उ अळद्धं (**हृदयेदानीं मामुज्झित्वास्मिन् सङ्क्रान्तेन त्वया फलमुपलब्धम्**)।

विदूषकः - आम,भो अहं विजदासिहरिणिं रसाळं णळहेतदातं पत्थ अमाणो चिंतअंतो आससिमि (**आम्! अहमपि यदा शिखरिणीं रसालां न लभे तदा तां प्रार्थयमानश्चिन्तयन्नाश्वसिमि**)।

~~~~~~

नालं, मणिभूमयः - रत्नखचितभुवो वा, नालं - मनसिजरुजमपोहितुं न समर्थाः, किन्तु, सा - प्रसिद्धा, दिव्या - देवाङ्गना वा, मम, मनसिजरुजमपोहितुं - कामज्वरं निरसितुम्, अलं - समर्था, नि।। ''अलंभूषणपर्याप्तिशक्तिवारण-वाचकमित्यमरः)।

ऊर्वशीति। ऊर्वशी वदति। अपरा - मदन्यादिव्या, का - का वा विद्यत इति काकुः, न काचिदित्यर्थः।

राजेति। राजा प्राह। रहसि - विजने, आरब्धा - प्रक्रान्ता, तदाश्रयिणी-दिव्याङ्गना विषयिणी, कथा वा - चरित्रा वा, मम, मनसिजरुजं - मदनपीडां, लघयेत् - लघ्वीं कुर्यात्।

ऊर्वशीति। ऊर्वशी वदति। हे हृदय - चित्त, इदानीम् - अद्य, माम्, उज्झित्वा - विहाय, अस्मिन् - राज्ञि, सङ्क्रान्तेन - प्रविष्टेन, त्वया - भवता, फलं - लाभः, उपलब्धम् - प्राप्तम्।

विदूषक इति। विदूषको वक्ति। हे राजन्, आम् - तथैव, नि।। ''आमेवमि''त्यमरः, अहमपि, यदा - यस्मिन् समये, शिखरिणीं - द्राक्षाविशेषं, नि।। ''द्राक्षाभेदे शिखरिणी''ति त्रिकाण्डशेषः, रसालां - भक्ष्यविशेषं, नि।।
~~~~~~

In Public domain. Digitization-Mithilakshmi Research Academy

राजा - सम्पद्यते पुनर्भवतः।

विदूषकः - तुमंपि तं अइरेणपाविहिसि **(त्वमपि तामचिरेण प्राप्स्यसे)।**

राजा - सखे! एवं मन्ये।

चित्रलेखा - सुणु असंतुट्ठे सुणु **(शृण्वसन्तुष्टे शृणु)।**

विदूषकः - कधंविअ **(कथमिव)।**

राजा -

अयं तस्या रथक्षोभादंसेनांसोनिपीडितः।
एकःकृती शरीरेऽस्मिन् शेषमङ्गं भुवो भरः ॥ 10॥

''स्याद्रसाला तु मार्जिके''त्यमरः, न लभे - न प्राप्नोमि, तदा - तस्मिन् समये, तां - शिखरिणीं रसालां च, प्रार्थयमानः - कांक्षमाणः, चिन्तयन् - स्मरन्, आश्वसिमिसन्तुष्टिं प्राप्नोमि।

राजेति। राजा प्राह। भवतः पुनः - तव तु, सम्पद्यते - भवति, भोज्य-वस्तुप्राप्तिरित्यध्याहारः।

विदूषक इति। विदूषको वक्ति। हे राजन्, त्वमपि, ताम् - ऊर्वशीम्, अचिरेण - शीघ्रकालेन, प्राप्स्यसे - लप्स्यसे।

राजेति। राजा प्राह। हे सखे - माणवक, अहम्, एवं - वक्ष्यमाण-प्रकारेण, मन्ये - तर्कयामि।

चित्रलेखेति। चित्रलेखा वदति। हे असन्तुष्टे - अद्यापि सन्तोषरहिते, शृणु - आकर्णय, आदराद्द्विरुक्तिः।

राजेति। राजा प्राह। अयमिति। रथक्षोभात् - स्यन्दनसङ्घट्टनात्, तस्याः - ऊर्वश्याः, अंसेन - भुजशिरसा, अंसः - मदीयभुजशिरः, निपीडितः - सङ्घट्टितः,

In Public domain. Digitization Muthulakshmi Research Academy

ऊर्वशी - किंदाणिं विळंबिस्सं (सहसोपगम्य) हळा अग्गदोविमहगदाए अअंउदासीणोविअ महाराओ (**किमिदानीं विलम्बिष्ये .... सख्यग्रतोऽपि मम गताया अयमुदासीन इव महाराजः**)।

चित्रलेखा - अदितुवरिदे अणक्खित्त तिरक्खरिणी असि (**अतित्वरिते अनाक्षिप्ततिरस्करिण्यसि**)।

(नेपथ्ये) इदो इदो भट्टिणी (**इतो इतो भट्टिनी**)।

(सर्वे समाकर्णयन्ति। ऊर्वशी सह सख्या विषण्णा)

अतो हेतोः, अस्मिन् - मदीये, शरीरे - देहे, अयमेषः, एकः - केवलः, अंसः, कृती - कृतार्थः, शेषमवशिष्टम्, अङ्गं - शरीरं तु, भुवो - भूमेः, भरः - भारभूतः निरर्थकत्वादिति भावः।

ऊर्वशीति। ऊर्वशी। इदानीम् - अद्यापि, किं - किमर्थं, विलम्बिष्ये - कालयापनं करिष्यामि, इत्यालोच्य, सहसा - शीघ्रम्, उपगम्य - समीपं प्राप्य, कथयति, किमिति। हे सखि - चित्रलेखे, अयम् - एषः, महाराजः - पुरूरवाः, मम, अग्रतः - पुरतः, गतायाः - स्थितायास्सत्या अपि, उदासीनः - तटस्थ इव, स्थित इत्यध्याहारः।

चित्रलेखेति। चित्रलेखा वदति। हे अतित्वरिते - अतिचपलचित्ते, त्वम्, अनाक्षिप्ततिरस्करिणी - अनाहतान्तर्धानविद्या, असि - भवसि, अतो राज्ञा नावलोकितासीति भावः।

नेपथ्य इति। नेपथ्ये - तिरस्करिण्यन्तरितदेशे, भट्टिनी - देवी, इतइतः - अनेनानेन मार्गेण, आगच्छत्विति शेषः, सम्भ्रमात् द्विरुक्तिः।

सर्वे - राजादयः, समाकर्णयन्ति - शृण्वन्ति, ऊर्वशी, सख्या - चित्र-

In Public domain. Digitization: Mithilakshmi Research Academy

विदूषकः - भोवअंस उअट्ठिदा देवीतुमंवा अं अमोहोहि (**भो वयस्य उपस्थिता देवी, त्वं वाचं यमो भव**)।

राजा - भवानपि संवृताकारमास्ताम्।

ऊर्वशी - हळा एत्थकिंकरणिज्जं (**सख्यत्र किं करणीयम्**)।

चित्रलेखा - अळंआवेएण, अंतरहिदावअं, इअं उअवासणि अमकिसारा-एसिमहिसीदीसदि, ताणएसाइधचिरं चिट्ठिस्सदि (**अलमावेगेन, अन्तर्हिते आवाम्, इयमुपवासनियमकृशा राजर्षिमहिषी दृश्यते, तस्मान्नैषेह चिरं स्थास्यति**)।

लेखया सह, सू।। ''सहयुक्तेऽप्रधान'' इति तृतीया, विषण्णा - खिन्ना, प्रकृते राज्ञा सङ्घटनाभावादिति भावः।

विदूषक इति। विदूषको वक्ति। भो वयस्य - हे सखे, देवी - पट्ट-महिषी, उपस्थिता - समायाता, अतः, त्वं, वाचं यमः - मौनव्रती, सू।। ''वाचि यमोव्रत इति खच्प्रत्ययः'', वाचं यमपुरन्दरौ चेति निपातनाम्ममागमः, नि।। ''तपस्वी तापसः पारिकाङ्क्षी वाचं यमो मुनि''रित्यमरः, भव - एधि।

राजेति। राजा प्राह। हे माणवक, भवानपि, संवृताकारं - निगूढाकृति यथातथा, आस्ताम् - वर्तताम्।

ऊर्वशीति। ऊर्वशी वक्ति। हे सखि, अत्र - अस्मिन्समये, किं करणीयं - किं वा कर्तव्यम्।

चित्रलेखेति। चित्रलेखा कथयति। हे ऊर्वशि, आवेगेन - त्वरया, अलं - न कार्यम्, आवाम्, अन्तर्हिते - तिरस्करिण्या आदृष्टे, इयं - पुरोवर्तिनी, राजर्षिमहिषी - पुरूरवःपट्टमहिषी, उपवासनियमकृशा - निराहारव्रतकार्श्ययुता,

In Public domain. Digitization Muthulakshmi Research Academy

(ततः प्रविशत्यौपहारिकहस्तपरिजनादेवी)

चेटी - इदोइदो भट्टिणी **(इतइतो भट्टिनी)**।

देवी - (चन्द्रमालोक्य) हंजेणि उणिए अज्जएसोरोहिणी संजो एणअहिअंसोहदिभ अवंमिअळंछणो **(हञ्जे निपुणिके अद्यैष रोहिणीसंयोगेन अधिकं शोभते भगवान् मृगलाञ्छनः)**।

निपुणिका - णंदेवीसहिदस्सभट्टिणो विसेसरमणिज्जदाभोदि (इति परिक्रामन्ति) **(ननु देवी सहितस्य भर्तुर्विशेषरमणीयता भवति)**।

दृश्यते - लक्ष्यते, तस्माद्धेतोः, एषा - देवी, चिरं - दीर्घकालम्, इह - राजसमीपे, न स्थास्यति - न वर्तिष्यते, अतस्संशयं त्यजेति भावः।

ततोऽनन्तरम्। औपहारिकहन्तपरिजना - उपहारः - उपायनं प्रयोजनं येषां तान्यौपहारिकाणि - पुष्पफलादिकानि वस्तूनि, सू।। ''प्रयोजनमिति ठक्प्रत्ययः'', तानि हस्ते यस्य स तादृशः, परिजनः - परिवारो यस्यास्सा, देवी - राज्ञी, प्रविशति - रङ्गस्थलं प्राप्नोति।

भट्टिनी - देवी, इतोऽनेन मार्गेणागच्छत्विति शेषः। सम्भ्रमाद्द्विरुक्तिः।

देवीति। देवी। चन्द्रमालोक्य - सुधांशुं प्रेक्ष्य, वदति, निपुणिके - निपुणिकाख्ये, हञ्जे - चेटिके, अद्येदानीं, भगवान् - पूजनीयः, एष परिदृश्यमानः, मृगलाञ्छनः - मृगाङ्कः, रोहिणीसंयोगेन - रोहिण्याख्यनक्षत्रसम्बन्धेन, अधिकम् - अतीव, शोभते - प्रकाशते।

निपुणिकेति। निपुणिका वक्ति। देवी सहितस्य - राज्ञीयुक्तस्य, भर्तुः - राज्ञः, विशेषरमणीयता - अतिशयितसुन्दरता, भवति ननु - सम्पद्यते हि, इत्युक्त्वा, परिक्रामन्ति - गच्छन्ति।

In Public domain. Digitization Muthulakshmi Research Academy

विदूषकः - भोणजाणामि, सोत्थिवा अणिअंमेदेदि, ओनदकम्म व्ववदेसेण-मुत्तरो साभवंतस्सपणिवादळं घणं पमज्जिदुकामात्ति, अज्ज मे अच्छीणं सुहदं सणा देवी (**भो न जानामि, स्वस्तिवाचनिकं मे ददाति, उत व्रतकर्मव्यपदेशेन मुक्तरोषा भवतः प्रणिपातलङ्घनं प्रमार्जितु-कामेति, अद्य मेऽक्ष्णोस्सुखदर्शना देवी**)।

राजा - (सस्मितम्) **उभयथापि घटते, तथापि यत्तुपश्चादभिहितं भवता तन्मां प्रतिभाति, यदत्र भवती** -

सितांशुका मङ्गलमात्रभूषणा पवित्रदूर्वाङ्कुरलाञ्छितालका।
व्रतापदेशोज्झितगर्ववृत्तिना हृदि प्रसन्ना वपुषैव लक्ष्यते ।। 11 ।।

विदूषक इति। विदूषको ब्रवीति। भो राजन्, देवी - राज्ञी, मे - मह्यं, स्वस्तिवाचनिकं - स्वस्तिवाचने भवं भक्ष्यविशेषं, ददाति - प्रतिपादयति, उत- अथवा, व्रतकर्मव्यपदेशेन - चन्द्रव्रतकरणव्याजेन, मुक्तरोषा - त्यक्तामर्षा, भवतः - तव, प्रणिपातलङ्घनं - प्रणामनिराकरणं, प्रमार्जितुकामा - अपनेतुमनाः, इत्येवं, न जानामि - न वेद्मि, किन्तु, अद्य - इदानीं, मे - मम, अक्ष्णोः - नेत्रयोः, सुखदर्शना - प्रियदर्शना, भवतीत्यध्याहारः।

राजेति। राजा। सस्मितं - समन्दहासं, प्राह, हे विदूषक, उभयथा - भवदुक्तपक्षद्वयमपि, घटते - सम्भवति, तथापि - तदपि, भवता - त्वया, पश्चात् - अनन्तरं, यत् - यद्वाक्यं तु, अभिहितं - उक्तं, तत् - तदेव, मां प्रति - ममेत्यर्थः, भाति - स्फुरति, यद्यस्मात्, सितेति। सितांशुका - शुभ्रपरिधान धारिणी, मङ्गलमात्रभूषणा - माङ्गल्यगोरोचनादिमात्रालङ्काराः, पवित्रदूर्वाङ्कुर-लाञ्छितालका - पवित्रैः - पूतैः, दूर्वाङ्कुरैः - शतपर्विकाकिसलयैः, नि।। ''दूर्वातु शतपर्विके''त्यमरः, लाञ्छिताः - चिह्निताः, अलकाः - चूर्णकुर्तला यस्यास्सा

 In Public domain. Digitization Muthulakshmi Research Academy

देवी - (उपगम्य) जेदुजेदु अय्यवुत्तो **(जयतु जयत्वार्यपुत्रः)।**

परिजनः - जेदुजेदुभट्टा **(जयतु जयतु भर्ता)।**

विदूषकः - सोद्धिभोदीए **(स्वस्ति भवत्यै)।**

राजा - **देवि स्वागतम्**? (हस्ते गृहीत्वोपवेशयति)।

ऊर्वशी - हळाठाणे इअंदेवीसद्देण उअचरीअदि, णकिंविपरिही अदिस ईदोओजस्सिदाए **(सखि ! स्थाने इयं देवी शब्देनोपचर्यते, न किमपि परिहीयते शचीत ओजस्वितया)।**

तथोक्ता, अत्रभवती - पूज्यादेवी, व्रतापदेशोज्झितगर्ववृत्तिना - व्रतापदेशेन - व्रतव्याजेन, नि।। ''व्याजोपदेशो लक्ष्यं चे''त्यमरः, उज्झिता - त्यक्ता, गर्ववृत्तिः - मानव्यापारः येन तेन, वपुषा - शरीरेणैव, हृदि - मनसि, प्रसन्ना - कालुष्य-रहिता, लक्ष्यते - दृश्यते।

देवीति। देवी। उपगम्य - राजसमीपं प्राप्य कथयति, आर्यपुत्रः - भर्ता महाराजः, जयतु - सर्वोत्कर्षेण वर्तताम्, आदरात् द्विरुक्तिः।

परिजन इति। परिजनः - निपुणिकादिपरिवारजनः प्राह, भर्ता - स्वामी, जयतु - सर्वातिशायी भवतु, सम्भ्रमाद्द्विरुक्तिः।

विदूषक इति। विदूषको वदति। हे देवि, भवत्यै - तुभ्यं, स्वस्ति - शुभं भवत्विति शेषः, सू।। ''नमस्स्वस्ती''त्यादिना चतुर्थी।

राजेति। राजा प्राह। हे देवि, स्वागतं - शुभागमनं किम्, इत्युक्त्वा, हस्ते गृहीत्वा - करे धृत्वा, उपवेशयति - निवेशयति।

ऊर्वशीति। ऊर्वशी कथयति। हे सखि - चित्रलेखे, इयं - राजमहिषी, देवीशब्देन - देवीपदेन, उपचर्यते - व्यवह्रियते, स्थाने - युक्तम्, नि।। ''युक्ते द्वे साम्प्रतं स्थाने'' इत्यमरः, ओजस्वितया - तेजोधैर्यगाम्भीर्यौदार्यसरसतादिगुण-

In Public domain. Digitization Muthulakshmi Research Academy

चित्रलेखा - साहु! असूआ परम्मु हंमंतिदं तुए (**साधु! असूया पराङ्मुखं मन्त्रितं त्वया**)।

देवी - अय्यवुत्तं पुरोकदुअ कोविमए वदविसेसोसंपा अणिज्ञो, तामुहुत्त अंउ अरोहोसही अदु (**आर्यपुत्रं पुरस्कृत्य कोऽपि मया व्रतविशेषस्सम्पादनीयः, तस्मान्मुहूर्तमुपरोधस्सह्यताम्**)।

राजा - **मामैवम्, अनुग्रहः खलु नोपरोधः।**

विदूषकः - ईदिसोएव्वसोद्धिवा अणिअवंतो उअरोहोबहुसो भोदु (**ईदृश एव स्वस्तिवाचनिकवानुपरोधो बहुशो भवतु**)।

वत्त्वेन, शचीतः - इन्द्रमहिष्याः, किमपि - किञ्चिदपि, न परिहीयते - न न्यूना भवति, शची समानेत्यर्थः।

चित्रलेखेति। चित्रलेखा वक्ति। त्वया - भवत्या, असूया पराङ्मुखम् - असूया रहितं यथा तथा, मन्त्रितं - भाषितं, साधु - अतीवयुक्तम्।

देवीति। देवी वदति। मया, आर्यपुत्रं - भर्तारं, पुरस्कृत्य - अग्रतो निधाय, कोऽपि - कश्चित्, व्रतविशेषः - गरिष्ठव्रतं, सम्पादनीयः - सम्यक् कर्तव्यः, तस्माद्धेतोः, मुहूर्तम् - घटिकाद्वयपरिमितं समयम्, उपरोधः - प्रतिबन्धः, सह्यताम् - क्षम्यतां, भवतेत्यध्याहारः।

राजेति। राजा प्राह। एवम् - अनेन प्रकारेण, मा - न वक्तव्यं, सम्भ्रमात् द्विरुक्तिः, अयं, अनुग्रहः खलु - अभ्युपपत्तिरेव, नोपरोधः - प्रतिबन्धो न भवति।

विदूषक इति। विदूषको वदति। ईदृशः - एवंविध एव, स्वस्तिवाचनिकवान् - स्वस्तिवाचने भवानि भक्ष्याणि स्वस्तिवाचकानि, तद्वान्, उपरोधः - प्रतिबन्धः, बहुशः - अनेकशः, सू।। "बह्वल्पार्थादित्यादिना शस्प्रत्ययः", भवतु - अस्तु।

 In Public domain. Digitization Muthulakshmi Research Academy

राजा - **किं नामधेयमेतद्देव्या व्रतम्**? (देवी निपुणिकामवेक्षते)।

चेटी - भट्टापि अप्पसादणं णाम (**भर्तः प्रियप्रसादनं नाम**)।

राजा - (देवीमवलोक्य)

> **अनेन कल्याणिमृणालकोमलं**
> **व्रतेन गात्रं ग्लपयस्य कारणम्।**
> **प्रसादमाकाङ्क्षति यस्तवोत्सुक-**
> **स्स किं त्वया दासजनः प्रसाद्यते ।। 12 ।।**

ऊर्वशी - (सवैलक्ष्यस्मितम्) महंतो क्खुसे इमस्सिं बहुमाणो (**महान् खल्वस्यास्यां बहुमानः**)।

राजेति। राजा प्राह। एतत् - इदं क्रियमाणं, देव्याः, व्रतं - नियमः, किं नामधेयं - किमभिधानं, स्यादितिशेषः, राज्ञा एव मुक्ते, देवी - राज्ञी, निपुणिकां - एतन्नाम्नीं चेटीम्, अवेक्षते - विलोकते।

चेटीति। चेटी वक्ति। हे भर्तः - स्वामिन्, प्रियप्रसादनं - प्रियस्य - भर्तुः, प्रसादनम् - अनुग्रहजनकं तन्नामकं व्रतमिदमित्यर्थः।

राजेति। राजा - देवीमवलोक्य - प्रेक्ष्य प्राह, अनेनेति। हे कल्याणि - मङ्गलप्रदे, त्वम्, अनेन - क्रियमाणेन, व्रतेन - नियमेन, मृणालकोमलं - बिस मृदुलं, गात्रं - शरीरम्, अकारणं - कारणरहितं यथा तथा, ग्लपयसि - शोषयसि, प्रियप्रसादनमेवात्रकारणमिति चेत्तत्राह। प्रसादमिति। उत्सुकः - उत्कण्ठितः, यः - पुरुषः, तव, प्रसादम् - अनुग्रहम्, आकाङ्क्षति - इच्छति, दासजनः - भृत्यजनः, स पुरुषः, त्वया - भवत्या, किं - किमर्थं, प्रसाद्यते - अनुग्राह्यते।

ऊर्वशीति। ऊर्वशी। सवैलक्ष्यस्मितम् - सविस्मयमन्दहासं यथा तथा,

In Public domain. Digitization Muthulakshmi Research Academy

चित्रलेखा - सरसी एव्वएसाआकिदी बहुमाणस्स, मुद्धे अण्ण संकंतपेम्माणो विणाअरिआअहिअंदक्खिणाभोन्ति (**सदृश्येवैषाकृतिर्बहुमानस्य, मुग्धेऽन्य सङ्क्रान्तप्रेमाणोऽपि नागरिका अधिकं दक्षिणा भवन्ति**)।

देवी - (सस्मितम्) णंइमस्सवदपरिग्गहस्सअअंपहावोजं एत्तिअं मंतेदि अय्यवुत्तो (**नन्वस्य व्रतपरिग्रहस्यायं प्रभावः यदेतावन्मन्त्रयत्वार्यपुत्रः**)।

विदूषकः - विरमदुभोदी, णजुत्तंदे सुभासिदं एदं पच्छक्खादुं (**विरमतु भवती, न युक्तं ते सुभाषितमेतत् प्रत्याख्यातुम्**)।

देवी - दारि आओओ णेधमेओ अहारिअं, जावहम्मगदे चंद वादे अच्छेमि (**दारिका उपनयत मे औपहारिकम्, यावत् हर्म्यगते चन्द्रपादे अर्पयामि**)।

वदति, अस्य - राज्ञः, अस्यां - देव्यां, बहुमानः - सत्कारः, महान् - अभ्यधिकः खलु।

चित्रलेखेति। चित्रलेखा कथयति। एषा कृतिः - अयं देव्या आकारः, बहुमानस्य - सत्कारस्य, सदृशी - अनुरूपैव, हे मुग्धे - बाले, नागरिकाः - निपुणाः, अन्यसङ्क्रान्तप्रेमाणः - कान्तान्तरासक्तस्नेहा अपि, अधिकम् - अतीव, दक्षिणाः - तुल्यवृत्तयः, भवन्ति - सम्पद्यन्ते।

देवीति। देवी। सस्मितं - समन्दहासं यथा तथा कथयति, ननु - सखि, अस्य - एतस्य, व्रतपरिग्रहस्य - व्रताचरणस्य, अयं - वक्ष्यमाणः, प्रभावः - महिमा, आर्यपुत्रः -भर्ता, एतावत् - इयत्, मन्त्रयति - आलोचयतीति यत्।

विदूषक इति। विदूषको ब्रवीति। भवती, विरमतु - तूष्णीं भूता भवतु, एतत् - इदं, सुभाषितं - ममव्रतविषयकसूक्तं, प्रत्याख्यातुं - निरसितुं, ते - तव, न युक्तं - नार्हम्।

In Public domain, Digitization Muthulakshmi Research Academy

परिजनः - जंदेवी आणवेदि, एसोउ अहारो (**यद्देव्याज्ञापयति, एष उपहारः**)।

देवी - उ अणेध (नाट्येन गन्धकुसुमादिभिश्चन्द्रपादानभ्यर्च्य) हंजे! महओ अहारिअंमोदअसरावं अय्यमाणव अंळंभावेहि (**उपनयत ... हञ्जे ममौपहारिकं मोदकशरावमार्यमाणवकं लम्भय**)।

परिजनः - जंदेवीआणवेदि, अय्यमाणवअइदंदे (**यद्देव्याज्ञापयति, आर्य-माणवक इदं ते**)।

विदूषकः - (मोदकशरावं गृहीत्वा) सोद्धिभोदीए, बहुफळो उअवासोभोदु (**स्वस्ति भवत्यै, बहुफल उपवासो भवतु**)।

देवीति। देवी वदति। हे दारिकाः - बालिकाः, मे - मम, औपहारिकं-पुष्पफलादिपूजाद्रव्यम्, उपनयत - आनयत, हर्म्यगते - सौधस्थिते, चन्द्रपादे - चन्द्रकिरणे, जातावेकवचनम्, यावदर्पयामि - समर्पयिष्यामि।

परिजन इति। परिजनः - परिवारः कथयति। देवी - राज्ञी, यदाज्ञापयति-नियोजयति, तत्करोमीति वाक्यशेषः, इत्युक्त्वा, एष उपहारः - इदमुपायनम्।

देवीति। देवी वक्ति। उपनयत - आहरत, इति गृहीत्वा, नाट्येन - अभिनयेन, गन्धकुसुमादिभिः - चन्दनपुष्पप्रभृतिभिः, चन्द्रपादान् - चन्द्ररश्मीन्, अभ्यर्च्य - सम्पूज्य, पुनःप्राह, किमिति। हञ्जे - चेटि, मम, औपहारिकम् - उपायनतया चन्द्राय समर्पितं, मोदकशरावं - तन्नामकभक्ष्यपात्रम्, आर्यमाणवकं-पूज्यविदूषकं, लम्भय - प्रापय, तस्मै देहीत्यर्थः।

परिजन इति। परिजनो ब्रूते। देवी - राज्ञी, यदाज्ञापयतीत्युक्त्वा, हे आर्यमाणवक - पूज्यविदूषक, इदमौपहारिकं, ते - तव, दापितमित्यध्याहारः।

विदूषक इति। विदूषकः। मोदकशरावं गृहीत्वा - मोदकपात्रं स्वीकृत्य,

In Public domain. Digitization Muthulakshmi Research Academy

देवी - अय्यवुत्त! इदोदाव (**आर्यपुत्र! इतस्तावत्**)।

राजा - **अयमस्मि।**

देवी - (राज्ञः पूजामभिनीय, प्राञ्जलिः प्रणम्य) एसाहंदेवंदामि, मिहुणंरोहिणी मिअळंछणाणं सक्खीकदु अ अय्यवुत्तं अणुप्पसादेमि, अज्ञप्पहुदि अज्ञवुत्तो जंइद्धिअंपद्धेदि अज्ञवुत्तस्सजा समाअमप्पणइणीता एमएस-मंपीदि बंधेण वत्तिदव्वंति (**एषाहं त्वां वन्दे, मिथुनं रोहणीमृग-लाञ्छनयोस्साक्षीकृत्य आर्यपुत्रमनुप्रसादयामि, अद्य प्रभृत्यार्य-पुत्रो यां स्त्रियं प्रार्थयते आर्यपुत्रस्य या समागमप्रणयिनी तस्यां मया समं प्रीतिबन्धेन वर्तितव्यमिति**)।

प्राह, भवत्यै - तुभ्यं, स्वस्ति - मङ्गलम्, अस्त्विति शेषः, उपवासः - व्रतं, तवेति शेषः, बहुफलः - अमितफलप्रदायकः, भवतु - अस्तु।

देवीति। देवी वक्ति। हे आर्यपुत्र - भर्तः, इतस्तावत् - इमं प्रदेशं प्रति, आगम्यतामिति शेषः।

राजेति। राजा प्राह। अयमस्मि - अयमहमागतोऽस्मीत्यर्थः।

देवीति। देवी। राज्ञः - पुरूरवसः, पूजामभिनीय - नाट्येन पूजां कृत्वा, प्राञ्जलिः - कृताञ्जलिस्सती, प्रणम्य - नमस्कृत्य, कथयति, किमिति, एषा - इयम्, अहं, त्वां - भवन्तं, वन्दे - अभिवादये, रोहिणीमृगलाञ्छनयोः - रोहिणी चन्द्रयोः, मिथुनं - द्वन्द्वं, साक्षीकृत्य - साक्षिणौ स्थापयित्वा, आर्यपुत्रं - भर्तारम्, अनुप्रसादयामि - अनुग्राहयामि, आर्यपुत्रः - भर्ता, अद्यप्रभृति - इमं दिन-मारभ्य, यां स्त्रियं - या कान्तां, प्रार्थयते - याचते, या कान्ता, आर्यपुत्रस्य - भर्तुः, समागमप्रणयिनी - समागमे - समावेशे, प्रणयिनी - इच्छावती, तस्यां - कान्तायां, मया समं - मया तुल्यं, प्रीतिबन्धेन - अनुरागानुबन्धेन, वर्तितव्यं - स्थातव्यमिति।

ऊर्वशी - हळा णजाणेकिं परंसेव अणंति, महउणविसेसवीसद्धं हिअ अंसं पुत्तं (**सखि न जाने किम्परमस्यावचनमिति, मम पुनर्विशेष विस्रब्धं हृदयं संवृत्तम्**)।

चित्रलेखा - सहिमहाणुभावाए पदिव्वदाए अब्भणुण्णादासि, अणंतरं ते पिअसमाअमो भविस्सदि (**सखि महानुभावया पतिव्रतयाभ्यनुज्ञातासि, अनन्तरं ते प्रियसमागमो भविष्यति**)।

विदूषकः - (अपवार्य) वअंसछिण्ण हद्धो मच्छे पळाइदेणिव्विण्णो धीवरो भणदि, मेधम्मोभविस्सदित्ति (प्रकाशम्) भोदि किंतारिसो तत्त भवं (**वयस्य छिन्नहस्तो मत्स्ये पलायिते निर्विण्णो धीवरो भणति, मे धर्मो भविष्यतीति... भवति किं तादृशस्तत्र भवान्** ?))।

ऊर्वशीति। ऊर्वशी वदति। हे सखि, अस्या देव्याः, वचनं - वाक्यं, किं परं - किमर्थकमिति, न जाने - न वेद्मि, मम, हृदयं पुनः - चित्तं तु, विशेष-विस्रब्धम् - अतीवविश्वासयुक्तं, संवृत्तं - जातम्।

चित्रलेखेति। चित्रलेखा वदति। हे सखि - ऊर्वशि, महानुभावया - उत्कृष्टप्रभावसम्पन्नया, पतिव्रतया - साध्व्या देव्या, अभ्यनुज्ञाता - अनुमतासि, तस्मात्, अनन्तरम् - अनुपदमेव, ते - तव, प्रियसमागमः - इष्टजनसमावेशः, भविष्यति - सम्पत्स्यते।

विदूषक इति। विदूषकः। अपवार्य - त्रिपताकहस्तेन मुखपार्श्वमाच्छाद्य, वक्ति, हे वयस्य - सखे राजन्, मत्स्ये - मीने, पलायिते - अतिक्रम्यगते सति, धीवरः - कैवर्तः, निर्विण्णः - निर्वेदं गतस्सन्, भणति - वक्ति, किमिति, मे - मम, धर्मः - अहिंसालक्षणः, भविष्यति - सम्पत्स्यत इति, तद्वद्देवी भणितमिति भावः, प्रकाशम् - सर्वश्राव्यं यथा तथा, ब्रूते, भवान् - तत्र - तस्मिन्विषये, तादृशः - तद्विधः, भवति - सम्पद्यते किम् ।

In Public domain. Digitization Muthulakshmi Research Academy

देवी - मूढ अहं अत्तणोसुहा आरेण अज्जवुत्तंणिव्वुदसरीरं कादुं इच्छामि, एत्ति एणसेण जाणामि पीडाणवत्ति (**मूढाहमात्मनश्शुभाचारेणार्यपुत्रं निर्वृतशरीरं कर्तुमिच्छामि, एतावतास्य न जानामि पीडा नवेति**)।

राजा -

दातुं वा प्रभवसि मामन्यस्मै हर्तुमेव वा दासम्।
नाहं पुनस्तथा त्वं यथाहि मां शङ्कसे भीरु ॥ 13 ॥

देवी - भोदुवाभवंणवा, जहणिद्दिट्ठं संपादिदंमए पिआणुप्पसादणंणाम वदं एधदारिआ ओगच्छामो (**भवतु वा भवान् न वा, यथा निर्दिष्टं सम्पादितं मया प्रियानुप्रसादनं नाम व्रतम्, एतदारिका गच्छामः**)।

देवीति। देवी वक्ति। हे मूढ - अज्ञ, आत्मनः - स्वस्य, शुभाचारेण - समुचितप्रवर्तनेन, अहम्, आर्यपुत्रं - भर्तारं, निर्वृतशरीरं - सुखितदेहं, कर्तु-मिच्छामि - अभिलषामि, एतावता - एतन्मात्रेण, अस्य - राज्ञः, पीडा - व्यथा, भवति वा, न वा - न भवति वेति, न जानामि - न वेद्मि।

राजेति। राजा प्राह। किमिति। दातुमिति। हे भीरु - भयशीले, दासं - भृत्यप्रायं, माम्, अन्यस्मै - इतरस्मै, दातुं - वितरीतुं वा, हर्तुम् - आदातुं वा, प्रभवति - समर्था भवस्येव, अहं पुनः - अहं तु, तथा - तादृशः, न - न भवामि, मां, यथा - यादृशं, त्वं, शङ्कसे - तर्कयसि हि।

देवीति। देवी वक्ति। हे भर्तः, भवान्, भवतु वा, तादृश इति शेषः, न वा - न भवतु वा, मया, प्रियानुप्रसादनं नाम - प्रियानुप्रसादनाभिख्यं, व्रतं - नियमः, यथानिर्दिष्टं - यथोद्दिष्टं, सम्पादितं - कृतम्, हे दारिकाः - बालिकाः, एत - आगच्छत, गच्छामः - यामः।

In Public domain. Digitization: Muthulakshmi Research Academy

राजा - **प्रिये न खलु प्रसादितोऽस्मि, यदि सम्प्रति विहाय गम्यते।**

देवी - अय्यवुत्त! मए अळंघिदपुव्वोणि अमो (इति निष्क्रान्ता सपरिवारा देवी) **(आर्यपुत्र! मयालङ्घितपूर्वो नियमः)।**

ऊर्वशी - हळा पिअकळत्तोरा एसी, तह विमहहिअ अंणिवत्ते दुंणसक्कुणोमि **(सखि प्रियकलत्रो राजर्षिः, तथापि मम हृदयं निवर्तयितुं न शक्नोमि)।**

चित्रलेखा - किंमुहाधिरसोहिदो अप्पा णिंदिअदि **(किं मुदा स्थिरसौहृद आत्मा निन्द्यते)।**

राजा - (आसन्नमुपेत्य) **न खलु वयस्यादूरतो देवी?।**

~~~~~~

राजेति। राजा प्राह। हे प्रिये - प्रेमवति देवि, सम्प्रति - इदानीं, विहाय - त्यक्त्वा, मामिति शेषः, गम्यते यदि - यानं क्रियते चेत्, त्वयेति शेषः, प्रसादितः - अनुग्राहितः, नास्मि खलु - न भवामि हि।

देवीति। देवी कथयति। हे आर्यपुत्र - भर्तः, मया, नियमः - व्रतम्, अलङ्घितपूर्वः - अनतिक्रान्तपूर्वः, इत्युक्त्वा, सपरिवारा - परिजनसहिता सती, देवी - राज्ञी, निष्क्रान्ता - निर्गता।

ऊर्वशीति। ऊर्वशी वदति। हे सखि - चित्रलेखे, राजर्षिः - राजश्रेष्ठः, प्रियकलत्रः - जायाप्रियः, सू।। "वा प्रियस्येति पूर्वनिपातः", तथापि - कलत्र प्रियत्वेपि, अहम्, मम, हृदयं - स्वान्तं, निवर्तयितुं - प्रत्यावर्तयितुं, न शक्नोमि - समर्था न भवामि।

चित्रलेखेति। चित्रलेखा वक्ति। स्थिरसौहृदः - दृढस्नेहः, आत्मा - स्वं, मुदा - व्यर्थं, किं निन्द्यते - किमर्थं गर्ह्यते।
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

विदूषकः - भणवीसद्धंजंसिवत्तुकामो, असज्झोत्तिपरिच्छिदिअ आदुरोविअ वेज्जेणसेरं मुक्को भवं तत्तभोदीए (**भण विस्रब्धं यदसि वक्तुकामः, असाध्य इति परिच्छिद्य आतुर इव वैद्येन स्वैरं मुक्तो भवान् तत्र भवत्या**)।

राजा - **अपि नामोर्वश्या**?।

ऊर्वशी - अज्जकिदद्धाभोमि (**अद्य कृतार्था भवामि**)।

राजा -

गूढानूपुरशब्दमात्रमपि मे कान्ताश्रुतौ पातयेत्-
श्चादेत्यशनैः कराम्बुजवृते कुर्वीत वा लोचने।

राजेति। राजा। आसन्नमुपेत्य - समीपमागत्य, प्राह, हे वयस्य - सखे, देवी - पट्टमहिषी, अदूरतः - समीपत इति काकुः, स्थिता किमित्यध्याहारः।

विदूषक इति। विदूषको ब्रवीति। हे राजन्, त्वम्, यत्, वक्तुकामः - भाषितुमनाः, असि - भवसि, तत्, विस्रब्धं - सविश्वासं यथातथा, भण - वद, भवान्, तत्र भवत्या - पूज्यया देव्या, वैद्येन - चिकित्सकेन, असाध्यः - चिकित्सितुमशक्य इति, परिच्छिद्य - निश्चित्य, आतुरः - रोगीव, स्वैरं - स्वच्छन्दं, मुक्तः - त्यक्तः।

राजेति। राजा प्राह। ऊर्वश्या - तन्नाम्न्या देवकान्तया, अपि नाम - मुक्तः किम्, अहमिति शेषः।

ऊर्वशीति। ऊर्वशी वक्ति। अद्य - इदानीं, कृतार्था - कृतकृत्या, भवामि - अस्मि।

राजेति। राजा प्राह। कान्ता - ऊर्वशी, गूढा - स्वयमविज्ञाता सती, मे

हर्म्येऽस्मिन्नवतीर्य साध्वसवशान्मन्दाय मानाबला-
दानीयेत पदात्पदं चतुरया सख्या ममोपान्तिकम् ।। 14 ।।

ऊर्वशी - हळा इमंदावसेमणोरहं संपादइस्सं (इति पृष्ठतो राज्ञो नयने संवृणोति। चित्रलेखा विदूषकं संज्ञापयति) **(सखि इमं तावदस्य मनोरथं सम्पादयिष्यामि)।**

राजा - (स्पर्शं रूपयित्वा) **सखे! न खलु नारायणोरुसम्भवा सैवेयं वरोरूः।**

- मम, श्रुतौ - कर्णेन्द्रिये, नूपुरशब्दमात्रं - मञ्जीरशिञ्जितमेव, नि।। ''मात्रं कात्स्न्र्येऽवधारण'' इत्यमरः, पातयेदपि - प्रसारयेत्किम्, शनैः - मन्दं यथा तथा, पश्चात् - पृष्ठतः, एत्य - आगत्य, लोचने - नेत्रे, ममेति शेषः, कराम्बुजवृते-पाणिपद्माच्छादिते, कुर्वीत - कुर्याद्वा, अस्मिन् - एतस्मिन्, हर्म्ये - प्रासादे, अवतीर्य - नभस्स्थलादवरुह्य, साध्वसवशात् - भयायत्तत्वात्, नि।। ''वश आयत्ततायां चे''त्यमरः, मन्दायमाना - मन्दगमनासती, चतुरया - निपुणया, सख्या - सहचर्या, ममोपान्तिकं - मत्समीपं, पदात्पदं - प्रतिपदं, बलात् - बलात्कारेण, आनीयेत - प्राप्येत किम्, णीञ् प्रापण इति धातोस्सम्भावनायां लिङ्।

ऊर्वशीति। ऊर्वशी वदति। हे सखि - चित्रलेखे, अस्य - राज्ञः, इमं-राज्ञाकाङ्क्षितं, मनोरथम् - अभिलाषं, तावदिदानीं, सम्पादयिष्यामि - निर्वर्तयिष्यामि, इत्युक्त्वा, पृष्ठतः - पश्चादागत्य, राज्ञः - पुरूरवसः, नयने - नेत्रे, संवृणोति - आच्छादयति, तत्समये, चित्रलेखा, विदूषकं - तत्र स्थितं माणवकं, संज्ञापयति - मा प्रकटयेति हस्तसंज्ञया कथयति।

राजेति। राजा। स्पर्शं - ऊर्वश्यास्सुखस्पर्शं, रूपयित्वा - अभिनीय, प्राह, हे सखे - वयस्य, इयं - संवृत मच्चक्षुः, वरोरूः - रम्यसक्थिका कान्ता,

In Public domain. Digitization Muthulakshmi Research Academy

विदूषकः - कधं भवं अवगच्छदि (**कथं भवानवगच्छति?**)।

राजा - **किमत्राज्ञेयम्** -

अङ्गमनङ्गक्लिष्टं सुखयेदन्यानमेकरस्पर्शात्।
नेच्छ्वसिति तपनकिरणैश्चन्द्रस्येवांशुभिःकुमुदम् ।। 15 ।।

ऊर्वशी - (हस्तावपनीयोत्तिष्ठति - किञ्चिदुपसृत्य) जेदुजेदु महाराओ (**जयतु जयतु महाराजः**)।

राजा - **सुन्दरि! स्वागतम्** (एकासने उपवेशयति)।

सा - पूर्वं दृष्टा, नारायणोरुसम्भवा - नारायणस्य - एतन्नामकस्य मुनेः, ऊरोः - सक्थिप्रदेशात्, नि।। ''सक्थिक्लीबे पुमानूरुरि''त्यमरः, सम्भवति - जायत इति तथोक्ता ऊर्वश्येव, न खलु - न भवेत्किं, किन्तु, ऊर्वश्येव भवेदिति भावः।

विदूषक इति। विदूषको वदति। हे राजन् - भवान्, कथं - केन प्रकारेण, अवगच्छति - ऊर्वशीति जानाति।

राजेत्यादि। राजा प्राह। अत्र - अस्मिन्विषये, अज्ञेयं - ज्ञातुमशक्यं, किं - किमस्तीति काकुः, अन्या - ऊर्वशीव्यतिरिक्ता युवतिः, अनङ्गक्लिष्टं - मन्मथपीडितं, मे - मम, अङ्गं - शरीरं, करस्पर्शात् - हस्तसम्पर्कात्, न सुखयेत् - सुखं न कुर्यात्, अत्रार्थे दृष्टान्तमाह। नेति। कुमुदं - कैरवं, तपनकिरणैः - सूर्यरश्मिभिः, चन्द्रस्य - इन्दोः, अंशुभिः - किरणैरिव, नोच्छ्वसिति - न विकसति।

ऊर्वशीति। ऊर्वशी। हस्तौ - करौ, अपनीय - अपसार्य, किञ्चिदीषत्, उपसृत्य - समीपमेत्य, वदति, महाराजः - सार्वभौमः, जयतु - सर्वोत्कर्षेण वर्तताम्, अत्यादरादिद्वरुक्तिः।

राजेति। राजा प्राह। हे सुन्दरि - रमणि, स्वागतं - शुभागमनं खलु, तुभ्यमिति शेषः, इत्युक्त्वा, एकासने - एकपीठे, उपवेशयति - निवेशयति।

In Public domain. Digitized by Muthulakshmi Research Academy

चित्रलेखा - सुहंपिअवअंसस्स (**सुखं प्रियवयस्यस्य**)।

राजा - **नन्वेतदुपपन्नम्**।

ऊर्वशी - हळा! देवी एदिण्णो महाराओ, अदोसेपणअवदीवि असरीरसं सग्गंगदम्हि, माक्खुमं पुरोभाइणिं समद्धेहि (**सखि! देव्या दत्तो महाराजः, अतोऽस्य प्रणयवतीवशरीरसंसर्गं गतास्मि, मा खलु मां पुरोभागिनीं समर्थय**)।

विदूषकः - कधं इधज्ञेव्व तुम्हाणं अद्धमिदोसुज्ञो (**कथमिहैव युवयोरस्तमितस्सूर्यः ?**)।

राजा - (**ऊर्वशीं विलोक्य**) -

चित्रलेखेति। चित्रलेखा वक्ति। प्रियवयस्यस्य - इष्टसुहृदः महाराजस्य, सुखं - सौख्यं खलु।

राजेति। राजा प्राह। एतत् - सुखम्, उपपन्नं ननु - प्राप्तमेव।

ऊर्वशीति। ऊर्वशी कथयति। हे सखि - चित्रलेखे, देव्या - पट्टमहिष्या, महाराजः - पुरूरवाः, दत्तः - विसृष्टः, अतः - अस्मात्कारणात्, अस्य - राज्ञः, प्रणयवती - प्रियतमेव, शरीरसंसर्गं - देहसम्पर्कं, गता - प्राप्ता, अस्मि - भवामि, मां, पुरोभागिनीं - सर्वकार्येष्वग्रगामिनीं, मा खलु समर्थय - नालोचय।

विदूषक इति। विदूषको वदति। युवयोर्द्वयोः, इह - अत्रैव, कथं - केन वा प्रकारेण, सूर्यः - दिवाकरः, अस्तमितः - अस्तङ्गतः, भवेदिति शेषः।

राजेति। राजा। ऊर्वशीं विलोक्य - वीक्ष्य, प्राह, **देव्येति**। अस्मिन् - एतस्मिन्, शरीरे - देहे, ममेति शेषः, देव्या - पट्टमहिष्या, अहं, दत्तः - विश्राणित इति, व्यापारम् - आलिङ्गनादिकं, व्रजसि - गच्छसि यदि प्राप्नोषि यदीति यावत्,

In Public domain. Digitization Muthulakshmi Research Academy

देव्याहं दत्त इति व्यापारं व्रजसि यदि शरीरेऽस्मिन्।
प्रथमं कस्यानुमतेश्चोरी भूय त्वया हृतं हृदयम्॥ 16॥

चित्रलेखा - वअंस! निरुत्तराएसा, संपदं महाविण्णावणासुणि अदु **(वयस्य! निरुत्तरैषा, साम्प्रतं मम विज्ञापना श्रूयताम्)।**

राजा - अवहितोऽस्मि।

चित्रलेखा - वसंताणंतरे उदुसम एभअवंसुज्ञोम एउअ अरिदव्वो, न जह इअंमेसहीसग्गस्स उक्कंठदितह वअंसेणकादव्वं **(वसन्तानन्तरे ऋतुसमये भगवान् सूर्योमयोपचरितव्यः, न यथेयं मे सखी स्वर्गायोत्कण्ठते तथा वयस्येन कर्तव्यम्)।**

त्वया - भवत्या, प्रथमं - प्राक्, कस्य, अनुमतेः - अङ्गीकारं प्राप्य, हृदयं - चित्तं, ममेति शेषः, चोरीभूय - तस्करा भूत्वा, हृतम् - अपहृतम्, वदेति शेषः।

चित्रलेखेति। चित्रलेखा वक्ति। हे वयस्य - सखे, एषा - ऊर्वशी, निरुत्तरा - प्रतिवाक्यदाने असमर्था, साम्प्रतमिदानीं, मम, विज्ञापना - निवेदना, श्रूयताम् - आकर्ण्यताम्।

राजेति। राजा प्राह। अहम्, अवहितः - तद्वाक्यश्रवणे अप्रमत्तः, असि - भवामि, उच्यतामिति शेषः।

चित्रलेखेति। चित्रलेखा वक्ति। वसन्तानन्तरे - वसन्ताव्यवहितोत्तरे, ऋतुसमये - ग्रीष्मकाले, मया, भगवान् - पूज्यः, सूर्यः - प्रभाकरः, उपचरितव्यः - व्रतविशेषे उपासितव्यः, नि॥ ‘‘वरिवसिते वरिवस्यितमुपासितं चोपचरितं चे’’त्यमरः, इयम् - एषा, मे - मम, सखी - सहचर्यूर्वशी, यथा - येन प्रकारेण, स्वर्गाय - स्वर्गमिन्द्रलोकं, द्रंष्टुं, सू॥ ‘‘क्रियार्थोपपदस्येत्यादिना चतुर्थी’’,

In Public domain, Digitization Muthulakshmi Research Academy

विदूषकः - भोदि! किंवा सग्गेसुमरिदव्वं! णउण्हीअदि, णपिज्ञदि, केवळं अणिमिसेहिंळो अणेहिंविडम्बि अदि **(भवति! किं वा स्वर्गे स्मर्तव्यं नाश्यते न पीयते, केवलमनिमिषैर्लोचनैर्विडम्ब्यते)।**

राजा - भद्रे!

अनिर्देश्यसुखस्स्वर्गः कस्तं विस्मारयिष्यति।
अनन्यनारी सामान्यो दासस्त्वस्याः पुरूरवाः ॥ 17॥

चित्रलेखा - अणुगहीदम्हि, हळा उव्वसि! अकादराभविअवि सञ्जेहिमं **(अनुगृहीतास्मि, सखि ऊर्वशि! अकातरा भूत्वा विसर्जय माम्)।**

नोत्कण्ठते - उत्सुका न भवति, तथा - तेन प्रकारेण, वयस्येन - सख्या महाराजेन, कर्तव्यं - विधातव्यम् ।

विदूषक इति। विदूषको वदति। हे चित्रलेखे, स्वर्गे - त्रिदशालये, स्मर्तव्यं - स्मरणीयं, किं वा - वस्तु, भवति - विद्यते, कुतः, नाश्यते - न भुज्यते, न पीयते - न चूष्यते, केवलम्, अत्यन्तम्, अनिमिषैः - निमीलनरहितैः, लोचनैः - नेत्रैः, विडम्ब्यते - हासास्पदी क्रियते, अस्माल्लोकात्कोऽपि विशेषस्तत्र नास्तीति भावः, अतो हेतोः ऊर्वश्याः स्वर्गलोकापेक्षा न शस्ता ।

राजेति। राजा प्राह। हे भद्रे - चित्रलेखे, अनिर्देश्येति। स्वर्गः - इन्द्रलोकः, अनिर्देश्यसुखः - अनिर्वाच्यशातः, नि।। "शर्मशातसुखानि चे"त्यमरः, तस्मात्, कः - को वा जनः, तं - तादृशं स्वर्गं, विस्मारयिष्यति - विस्मृतिं जनयिष्यति, परन्तु, अस्याः - ऊर्वश्याः, अनन्यनारीसामान्यः - इतरस्त्रीकदम्बकदुर्लभः, पुरूरवाः - तन्नामा राजा, दासः - भृत्यतुल्यः, अयन्तु, एको विशेषोऽत्रास्तीति भावः ।

चित्रलेखेति। चित्रलेखा वक्ति। अनुगृहीता - अभ्युपपन्ना, अस्मि -

In Public domain. Digitization Muthulakshmi Research Academy

ऊर्वशी - (चित्रलेखां परिष्वज्य) सहि! माक्खुमं विसुमरेहि **(सखि! मा खलु मां विस्मर)।**

चित्रलेखा - (सस्मितम्) वअंसेण संगदामएतुमं भणिदव्वा (इति राजानं प्रणम्य निष्क्रान्ता) **(वयस्येन सङ्गता मया त्वं भणितव्या)** ।

विदूषकः - दिट्ठिआमणोरहसम्पत्ती एवड्ढदिभवं **(दिष्ट्या मनोरथसम्पत्त्या वर्धते भवान्)।**

राजा - इमां तावन्ममवृद्धिं पश्य -

सामन्तमौलिमणिरञ्जितपादपीठ-
मेकातपत्रमवनेर्न तथा प्रभुत्वम्।

भवामि, एवं राजानमुक्त्वा ऊर्वशीं प्रत्याह, सखि - सहचरि, ऊर्वशि, त्वम्, अकातरा - अभीता, भूत्वा - सम्पद्य, मां, विसर्जय - त्यज।

ऊर्वशीति। ऊर्वशी। चित्रलेखां परिष्वज्य - आलिंग्य, वदति, हे सखि-प्रिये, मां, मा खलु विस्मर - विस्मृतिं मा कुरु।

चित्रलेखेति। चित्रलेखा सस्मितं - समन्दहासं, यथातथा ब्रूते, हे सखि, त्वं, वयस्येन - प्रियेण, सङ्गता - संयुक्ता सती, मया, भणितव्या - एवं वक्तव्या, न तु त्वयाहमिति भावः, इत्युक्त्वा, राजानं - पुरूरवसं, प्रणम्य - नमस्कृत्य, निष्क्रान्ता - निर्गता।

विदूषक इति। विदूषको वक्ति। भवान्, मनोरथसम्पत्त्या - इष्टार्थसिध्या, दिष्ट्या - दैवेन, वर्धते - एधते।

राजेति। राजा प्राह। तावदिदानीम्, इमां - वर्तमानां, मम - मत्सम्बन्धिनीं, वृद्धिं - श्रेयोलाभं, पश्य - आलोकय, सामन्तेति। हे सखे - वयस्य माणवक,

अस्यास्सखे चरणयोरहमद्यकाम-
माज्ञाकरत्वमधिगम्य यथा कृतार्थः ।। 18 ।।

ऊर्वशी - णत्थिमेवा आ विहवो अदोपि अंमन्तिदुं **(नास्ति मे वाचाविभवोऽतः प्रियं मन्त्रयितुम्)।**

राजा - (ऊर्वशीं हस्तेनावलम्ब्य) **अहो! विरुद्धसम्पादन ईप्सितार्थलाभो नाम-**

पादास्त एव शशिनस्सुखयन्ति गात्रं
बाणास्त एव मदनस्य मनोनुकूलाः।

~~~~~~

अहम्, अद्येदानीम्, अस्याः - ऊर्वश्याः, चरणयोः - पादयोः, आज्ञाकरत्वं - भृत्यत्वम्, अधिगम्य - प्राप्य, यथा - येन प्रकारेण, कामम् - अतीव, कृतार्थः - कृतकृत्योऽस्मि, तथा - तेन प्रकारेण, सामन्तमौलिमणिरञ्जितपादपीठं - सामन्तानां - भूपालानां, ये मौलिमणयः - किरीटरत्नानि, तैः रञ्जितं - रागं प्रापितं, पादपीठं - चरणपीठं यस्मिन् तत्तथोक्तम्, अत एव, एकातपत्रम् - अद्वितीयच्छत्रम्, अवनेः - भूमेः, प्रभुत्वम् - आधिपत्यमधिगम्य, न कृतार्थः - सार्वभौमत्वमपि ऊर्वशीसाहचर्यादधिकं न भवतीति भावः।

ऊर्वशीति। ऊर्वशी वदति। अतः - अस्माद्वाक्यात्, प्रियं - मनोहारि वाक्यं, मन्त्रयितुम् - वक्तुं, मे - मम, वाचाविभवः - वचनवैभवं, नास्ति - न विद्यते।

राजेति। राजा - पुरूरवाः, ऊर्वशीं, हस्तेन - करेण, अवलम्ब्य - गृहीत्वा, प्राह, ईप्सितार्थलाभः - इष्टार्थप्राप्तिः, विरुद्धसम्पादनो नाम - विपरीत कार्यजनको भवति हि, अहो - आश्चर्यम्, तदेवोपपादयति, पादा इति। शशिनः - चन्द्रस्य, पादाः - किरणाः, ते - तज्जातीया एव सन्तः, गात्रं - शरीरं, ममेति
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

संरम्भरूक्षमिव सुन्दरि यद्यदासी-
त्त्वत्सङ्गमेन मम तत्तदिवानुकूलम् ॥ 19 ॥

ऊर्वशी - अवरद्धम्हिचिर आळविरहकारिणी अय्यवुत्तस्स **(अपराद्धास्मि चिरकालविरहकारिण्यार्यपुत्रस्य)।**

राजा - मामैवम् -

यदेवोवनतं दुःखात्सुखं तद्रसवत्तरम्।
निर्वाणाय तरुच्छाया तप्तस्य हि विशेषतः ॥ 20 ॥

शेषः, सुखयन्ति - शर्मदा भवन्ति, ये पूर्वं दुःखदा इति भावः, मदनस्य - मन्मथस्य, बाणाः - शराः, ते - तज्जातीया एव सन्तः, मनोनुकूलाः - चेतस्सुखदाः, ये पूर्वं प्रतिकूला इति भावः, हे सुन्दरि - लावण्यवति, यद्यत् - चन्द्रपादादिकं, संरम्भरूक्षं - संरम्भेण - इष्टप्राप्त्यभावजनितेनाभिनिवेशेन, रूक्षं - प्रतिकूलमिव, आसीत् - अभूत्, तत्तत्, मम, त्वत्सङ्गमेन - भवत्समागमेन, अनुकूलं - सुखप्रदमिवासीत्।

ऊर्वशीति। ऊर्वशी वदति। आर्यपुत्रस्य - महाराजस्य, चिरकालविरहकारिणी - दीर्घकालविप्रयोगकरासती, अपराद्धा - आगस्कारिणी, अस्मि - भवामि।

राजेति। राजा प्राह। मामैवम् - एवमित्थं, मा - न भवति, आदराद्द्विरुक्तिः, यदिति। दुःखात् - क्लेशात्, उपनतं - प्राप्तं यत्सुखं, भवतीति शेषः, तत् - तत्सुखमेव, रसवत्तरम् - अतीवस्वादुतरम्, तथाहि, तप्तस्य - आतपतापितस्य जनस्य, तरुच्छाया - वृक्षच्छाया, विशेषतः - अतीव, निर्वाणाय-सुखाय भवति।

In Public domain, Digitization Muthulakshmi Research Academy

विदूषकः - भो! सेविदापदोसरमणिज्ञा चन्दपादा, समओक्खुते वासघरेपवेसस्स (**भोः! सेविताः प्रदोषरमणीयाश्चन्द्रपादाः, समयः खलु ते वासगृहे प्रवेशस्य**)।

राजा - तेन हि सख्यास्ते मार्गमादर्शय।

विदूषकः - इदोइदो भोदी (**इतइतो भवती**)।

राजा - सुन्दरि! इयमिदानीं मे प्रार्थना।

ऊर्वशी - काविअ (**केव?**)।

विदूषक इति। विदूषकः कथयति। भोः - हे राजन्, प्रदोषकालरमणीयाः - सन्ध्यासमयमनोहराः, चन्द्रपादाः - हिमांशुकिरणाः, सेविताः - अनुभूताः, इतःपरं, वासगृहे - गृहाभ्यन्तरे, प्रवेशस्य - प्रापणस्य, ते - तव, समयः खलु-अवसरो हि।

राजेति। राजा प्राह। तेन हि - तेन हेतुना, ते - तव, सख्याः - वयस्यायाः, मार्गं - पन्थानम्, आदर्शय - प्रदर्शय।

विदूषक इति। विदूषको वक्ति। भवती, इतइतः - अनेनानेन मार्गेण, आगच्छत्विति शेषः।

राजेति। राजा प्राह। हे सुन्दरि - रमणि, मे - मम, इदानीमद्य, इयं - वक्ष्यमाणा, प्रार्थना - विज्ञापना, अस्तीति शेषः।

ऊर्वशीति। ऊर्वशी वदति। हे राजन्, केव - कीदृशी, प्रार्थनेतिशेषः।

राजेत्यादि। पूर्वं - प्राक्, अनुपनतमनोरथस्य - अनधिगतत्वत्समागमरूपाभिलाषस्य, मे - मम, त्रियामा - रात्रिः, शतगुणतां - शतसंख्यावृत्तत्वं,

In Public domain. Digitization Muthulakshmi Research Academy

राजा -

अनुपनतमनोरथस्य पूर्वं शतगुणतामिवमेगता त्रियामा।
यदिनु तव समागमे तथैव प्रसरति सुभ्रु! ततः कृती भवेयम्॥ 21॥

(इति निष्क्रान्तास्सर्वे)

॥ इति तृतीयोऽङ्कः ॥

गता - प्राप्तेवस्थिता, हे सुभ्रु - सुन्दरि, तव, समागमे - समावेशे, तथा - तेन प्रकारेणैव, प्रसरति यदिनु - शतगुणत्वेनैव गच्छति चेत्, रात्रिरिति शेषः, ततस्तर्हि, कृती - धन्यः, भवेयम् - स्याम्।

इत्युक्त्वा, सर्वे - राजादयः, निष्क्रान्ता - निर्गताः।

॥ इति श्रीमन्मृत्युञ्जयनिश्शङ्कक्षितिपालविरचिते
विक्रमोर्वशीयव्याख्याने रत्नदीपिका समाख्याने
तृतीयोऽङ्कः ॥ श्रीरस्तु ॥

In Public domain. Digitization Muthulakshmi Research Academy

ॐ चतुर्थाङ्कः ॐ

अत्र पुस्तके [ ] ईदृश रेखाद्वयमध्यगो ग्रन्थः मूलं छाया वा उदीचीनपुस्तकाधिगतोऽधिकपाठ इत्यवगन्तव्यः।।

[नेपथ्ये सहजन्या चित्रलेखयोः प्रावेशिक्याक्षिप्तिका।

पिअसहि विओअविमणा सहिसहिआवाउळासमुळ्ळसइ।
सूरकरफंसवि असिअ तामरसेसरवरूसङ्गे ।।
(प्रियसखीवियोगविमनास्सखीसहिता व्याकुला समुल्लसति।
सूर्यकरस्पर्शविकसितताम‌रसे सरोवरोत्सङ्गे।। 1।।)]

~~~~~~

[**नेपथ्य इति।** नेपथ्ये - रङ्गस्थलव्यतिरिक्ततिरस्करिण्यन्तरितनटवर्ग-वर्णिकाग्रहणयोग्यस्थाने, सहजन्याचित्रलेखयोः - एतदाख्ययोरूर्वशीसख्योः, प्रावेशकी - प्रवेशः - प्रयोजनमस्या इति विग्रहः, सू।। "प्रयोजनमिति ठक्प्रत्ययः", सू।। "टिड्ढाणञित्यादिना ङीप्", रङ्गस्थलप्रवेशसंसूचिका, आक्षिप्तिका - एतदाख्या गीतिः, गीयत इति शेषः, यथा, पिअसहीति। प्रियसखीवियोगविमनाः - इष्ट-सहचरीविश्लेषदुःखिता, अतएव, सखीसहिता सहचरीयुक्तापि, व्याकुला - व्यग्रा, हंसीत्यध्याहारः, सूर्यकरस्पर्शविकसितताम‌रसे - रविरश्मिसम्पर्कप्रफुल्लपङ्केरुहे, नि।। "पङ्केरुहं तामरसमि"त्यमरः, सरोवरोत्सङ्गे - प्रशस्तसरसीतटे, समुल्लसति - संचरति, हंसीव्याजेन सखीसहितायाश्चित्रलेखायाः प्रवेशस्सूच्यते। किन्तु हंसीपक्षे वर्णितगुणं सरो यथा सुखकारणमपि। विरहितत्वात् केवलं दुःखाय। तद्वच्चित्रलेखा पक्षे वर्षासमयोऽपि। सखीवियोगात् दुःखकारणं जातम्। प्रियवस्तु प्रियसङ्गतस्य सुखाय भवति। विरहितस्य तु तदेव क्लेशाय भवतीति भावः। आक्षिप्तिकागीते-र्लक्षणं यथा - चञ्चत्पुटादितालेन मार्गत्रयविभूषिता। आक्षिप्तिका स्वरपदप्रथिका कथिता बुधैरिति ।]
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

(ततः प्रविशति विमनस्का चित्रलेखा सहजन्या च)

[**चित्रलेखा** - (प्रवेशान्तरे द्विपदिकया दिशोऽवलोक्य)

सहअरिदुक्खालिद्धअं सरवरअम्मिसिणिद्धअं।
बाहावग्गिअणअणअंतम्म इहं सीजुअलअं ॥
**(सहचरी दुःखालीढं सरोवरे स्निग्धम्।
बाष्पावल्गितनयनं ताम्यति हंसीयुगलम् ॥ 2॥)**]

सहजन्या - (चित्रलेखां विलोक्य) सहि चित्तळेहे! मिळाअमाण सदपत्तस्सवि अदेमुहच्छाअहिअअस्सअस्सद्धदं सूएदि, ताकधेहिदे अणि व्वुदि-काळणं, अहंविसमदुक्खाभोदुं इच्छामि (**सखि चित्रलेखे! म्लायमान**

कविरिदानीमङ्कान्तरमुपक्रममाणः प्रवेशकं नामार्थोपक्षेपकं प्रस्तौति। **ततः प्रविशतीत्यादि**। ततोऽनन्तरं, विमनस्का - दुःखिता, चित्रलेखा सहजन्या च, प्रविशति - रङ्गस्थलं प्राप्नोतीति प्रत्येकान्वयः।

[**चित्रलेखेति**। चित्रलेखा। प्रवेशान्तरे - प्रवेशमध्ये, दिशोऽवलोक्य - ककुभः प्रेक्ष्य, द्विपदिकया - द्विपदिकाख्यया गीत्या, गायतीति शेषः, यथा, सह अरीति। सहचरीदुःखालीढं - सखी व्यथाक्रान्तं, स्निग्धं - अन्योन्यस्नेहयुक्तं, समसुखदुःखमिति भावः, बाष्पावल्गितनयनं - बाष्पाकीर्णनेत्रं, हंसीयुगलं - चक्राङ्गद्वन्द्वं, सरोवरे - कासारश्रेष्ठे, ताम्यति - म्लायति। द्विपदिकालक्षणमाह भरतः - ''शुद्धा खण्णा च मात्रा च सम्पूर्णेति चतुर्विधा। भवेद्द्विपदिका गीति-र्भरतेन प्रकीर्तिता। भवेच्चतुर्भिश्चरणैस्त्रयोदशकलात्मकैरिति।।'' कलाशब्देन मात्रोच्यते। दिगवलोकनसमये प्रायशो द्विपदिका व्यवह्रियते।]

सहजन्येति। सहजन्या। चित्रलेखां विलोक्य - वीक्ष्य, कथयति, किमिति। हे सखि - प्रिये, चित्रलेखे, म्लायमानशतपत्रस्येव - ग्लायमानकुशेशयस्येव, ते

In Public domain, Digitization: Maharishi Research Academy

शतपत्रस्येव ते मुखच्छायाहृदयस्यास्वस्थतां सूचयति, तस्मा-त्कथयतेऽनिर्वृति कारणम्, अहमपि समदुःखा भवितुमिच्छामि)।

चित्रलेखा - अच्छरावारपरिआएणइध भअवदोसुज्जस्सविमाणे सहतु एवट्टंती बलिअंउव्वसी एउक्कंठिदम्हि **(अप्सरोवारपर्यायेण इह भगवतस्सूर्यस्य विमाने सह त्वया वर्तमाना बलवदूर्वश्यामुत्कण्ठितास्मि)।**

सहजन्या - जाणेवो अण्णोण्णगदंसिणेहम् **(जानेवोऽन्योन्यगतं स्नेहम्)।**

चित्रलेखा - तदोइमाइदिवसा इकोणुक्खुसेवुत्तन्तोत्ति पणिहाणट्ठि दाएमए

~~~~~~

- तव, मुखच्छाया - वदनकान्तिः, हृदयस्य - चित्तस्य, अस्वस्थतां - पर्याकुलत्वं, सूचयति - द्योतयति, तस्मात्कारणात्, ते - तव, अनिर्वृतिकारणम् - अस्वास्थ्य-हेतुं, कथय - वद, अहमपि, समदुःखा - तुल्यव्यथा, त्वया सहेति शेषः, भवितुम्, इच्छामि - अभिलषामि।

चित्रलेखेति। चित्रलेखा वक्ति। भगवतः - पूज्यस्य, सूर्यस्य - रवेः, इहास्मिन्, विमाने - रथे, अप्सरोवारपर्यायेण - अप्सरसां - स्वर्वेश्यानां, वारस्य - अवसरस्य, नि।। ''निवहावसरौ वारावि''त्यमरः, पर्यायेण - अनुपात्ययेन - अनतिक्रमेणेत्यर्थः, सू।। ''परावनुपात्यय इण'' इति घङ् प्रत्ययः, त्वया सह - भवत्या साकं, वर्तमाना - तिष्ठन्ती सती, ऊर्वश्याम् - एतन्नामकास्मत्प्रियसख्यां, बलवदतीव, उत्कण्ठिता - पर्युत्सुका, अस्मि - भवामि।

सहजन्येति। सहजन्या वदति। हे चित्रलेखे, वः - युवयोरिति भावः, अन्योन्यगतम् - इतरेतरसक्तं, स्नेहं - प्रेम, जाने - वेद्मि।

चित्रलेखेति। चित्रलेखा वक्ति। हे सहजन्ये, ततोऽनन्तरम्, इमानि दिवसानि - एषु दिनेषु, अस्याः - ऊर्वश्याः, वृत्तान्तः - उदन्तः, कोनु खलु-
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

अच्चाहिदं उअळद्धं **(तत इमानि दिवसानि कोनु खल्वस्यावृत्तान्त इति प्रणिधानस्थितयामयात्याहितमुपलब्धम्)।**

सहजन्या - (सावेगम्) कीरिसंविअ **(कीदृशमिव?)।**

चित्रलेखा - उव्वसीकीळिदुंरदिसहाअं राएसिं अमच्चेसुणिवेसि दरज्ज धुरंगेण्हि अविहरन्तीगंधमादणभूधरंगदा **(ऊर्वशी किल तं रतिसहायं राजर्षिममात्येषु निवेशितराज्यधुरं गृहीत्वा विहरन्ती गन्धमादनभूधरं गता)।**

सहजन्या - सोणामसम्भो ओजोतारिसेसु पदेसेसु **(स नाम सम्भोगः यस्तादृशेषु प्रदेशेषु)।**

कीदृशो वा स्यादिति, प्रणिधानस्थितया - ध्यानारूढया, मया, अत्याहितं - महाभयम्, नि।। ''अत्याहितं महाभीति''रित्यमरः, उपलब्धम् - अवगतम्।

सहजन्येति। सहजन्या। सावेगं - सत्वरं, वक्ति, कीदृशमिव - किं विधं वा, भवेदिति शेषः।

चित्रलेखेति। चित्रलेखा कथयति। किमिति। हे सहजन्ये, ऊर्वशी, रतिसहायं - स्वविषयकासक्तिमात्रसहितं, नत्वन्यसपत्नीयुक्तमिति भावः, अमात्येषु - मन्त्रिषु, निवेशितराज्यधुरं - निक्षिप्तराज्यभारं, तं - प्रसिद्धं, राजर्षिं - राजश्रेष्ठं पुरूरवसं, गृहीत्वा - स्वीकृत्य, विहरन्ती - क्रीडन्ती सती, गन्धमादनभूधरं - गन्धमादनाख्यपर्वतं, गता - प्राप्ता किल, किलेति सम्भावनायाम्, नि।। ''वार्ता सम्भाव्ययोः किले''त्यमरः।

सहजन्येति। सहजन्या वदति। हे सखि, यः - सम्भोगः, तादृशेषु - तद्विधेषु गन्धमादनतुल्येष्वित्याशयः, प्रदेशेषु - स्थानेषु, क्रियत इत्यध्याहारः, स नाम - स एव, सम्भोगः - रतिः, भवति, गन्धमादनादयस्सम्भोगसमुचितप्रदेशा इति भावः।

In Public domain. Digitization Muthulakshmi Research Academy

चित्रलेखा - तहिंमन्धाइणीपुळिणेसुकी ळुदुकामाविज्ञाहरदारिआ उदअवणी-दामरा एसिणाणिज्झादत्ति कुविदाउव्वसी (**तत्र मन्दाकिनीपुलिनेषु क्रीडितुकामा विद्याधरदारिका उदयवती नाम राजर्षिणा निध्यातेति कुपिता ऊर्वशी**)।

सहजन्या - भोदि! दूरंआरूढोपण ओ असहणो, तदोतदो (**भवति ! दूरमारूढः प्रणयोऽसहनः, ततस्ततः**)।

चित्रलेखा - तदोभट्टिणो अणुणअंअप्पडिवज्जमाणा गुरुसावसम्मूढहि अआ-अम्हाणं परिहरणिज्जं कुमारवणंपविट्ठा, पवेसाणन्तरं काळणन्तरणि-वट्टिणाळदाभावेण सेपरिणदंरूअं (**ततो भर्तुरनुनयमप्रतिपद्यमाना**

~~~~~~

चित्रलेखेति। चित्रलेखा कथयति। हे सहजन्ये, तत्र - नगे, मन्दाकिनी पुलिनेषु - स्वर्णदीपैकतेषु, क्रीडितुकामा - विहर्तुमनाः, उदयवती नाम - एत-न्नामधेया, विद्याधरदारिका - विद्याधरपुत्रिका, राजर्षिणा - पुरूरवसा, निध्याता - दृष्टेति, नि।। ''निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षण''मित्यमरः, ऊर्वशी, कुपिता - क्रुद्धा।

सहजन्येति। सहजन्या वक्ति। भवति - पूज्ये चित्रलेखे, दूरमत्यन्तम्, आरूढः - उत्पन्नः, प्रणयः - सौहृदम्, असहनः - असहिष्णुः, अन्यवनितादर्शन-मित्यर्थाल्लभ्यते, ततस्ततः - अनन्तरमनन्तरम्, किं वृत्तमिति शेषः।

चित्रलेखेति। चित्रलेखा कथयति। ततोऽनन्तरं, भर्तुः - प्रियस्य, अनुनयं - प्रसादनक्षमं चाटुवचनम्, अप्रतिपद्यमाना - अगृह्णन्ती, गुरुशापसम्मूढहृदया - गुरोर्भरतस्य, शापेन, सम्मूढहृदया - व्याक्षिप्तचित्तासती, अस्माकम् - अप्सरसा-मित्यर्थः, परिहरणीयम् - अप्रवेश्यं, कुमारवनं - कार्तिकेयारण्यं, प्रविष्टा - प्राप्ता, प्रवेशानन्तरं - प्रवेशोत्तरकाल एव, अस्याः - ऊर्वश्याः, रूपं - शरीर-
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

गुरुशापसम्मूढहृदयास्माकं परिहरणीयं कुमारवनं प्रविष्टा, प्रवेशानन्तरं कारणान्तरनिवर्तिना लताभावेनास्याः परिणतं रूपम्)।

सहजन्या - णत्थिविहिणो अळङ्घणिज्ञो, तस्सअणुराअस्सअअं णाम एक्कपदे अणत्थो, अहसोकिं अवत्थोराएसी (**नास्ति विधेरलङ्घनीयः, तस्यानुरागस्यायं नामैकपदेऽनर्थः, अथ स किमवस्थो राजर्षिः)।**

चित्रलेखा - तस्सिंएव्वकाणणेपि अदमं विचिण्णन्तो अहोरत्तं वट्टदि, णजाणेइमिणा उणणिव्वुदाणं विउक्कण्ठाकारिणा मेहोदएणको णामसे अणत्थो भविस्सदित्ति (**तस्मिन्नेव कानने प्रियतमां विचिन्वन्नहोरात्रं वर्तते, न जाने अनेन पुनर्निर्वृतानामप्युत्कण्ठाकारिणा मेघोदयेन को नामास्यानर्थो भविष्यतीति)।**

स्वरूपं, कारणान्तरनिवर्तिना - कारणान्तरेण - केनचित्कारणेन, निवर्तिना - अपगच्छता, लताभावेन - वल्लीत्वेन, परिणतं - संवृत्तम्।

सहजन्येति। सहजन्या वक्ति। हे चित्रलेखे, विधेः - दैवस्य, अलङ्घनीयः - अनतिक्रमणीयः असाध्य इति यावत्, नास्ति - न विद्यते, कुतः, तस्य - तादृशस्य, अनुरागस्य - प्रेम्णः, अयं - ईदृशः, अनर्थः - अपायः, एकपदे - अनुपदं, जात इति शेषः, नामेति सम्भावनायाम्, अथानन्तरं, स राजर्षिः - पुरूरवाः, किमवन्थः - कीदृशस्थितिः, कथयेति शेषः।

चित्रलेखेति। चित्रलेखा कथयति। हे सहजन्ये, प्रियतमां - प्रियसखीमूर्वशीं, विचिन्वन् - अन्विष्यन्, नि॥ ''अन्वेषणं विचयनं मार्गणं मृगणा मृग'' इत्यमरः), तस्मिन्कानने - गन्धमादनारण्य एव, अहोरात्रम् - अहोरात्रावित्यर्थः, सू॥ ''कालाध्वनोरत्यन्तसंयोग'' इति सप्तम्यर्थे द्वितीया, वर्तते - तिष्ठति, निर्वृतानां - सुखितानामपि, उत्कण्ठाकारिणा - औत्सुक्यसम्पादकेन, अनेन -

In Public domain, Digitization Muthulakshmi Research Academy

[अत्रान्तरे जम्भलिका -

सहअरि दुक्खालिद्धअं सरवरअम्हिसिणिद्धअं।
अविरळबाहजलोण्हअं तम्म इहंसीजु अळअं॥
(सहचरी दुःखालीढं सरोवरे स्निग्धम्।
अविरलबाष्पजलोष्णं ताम्यति हंसीयुगलम्॥ 3॥)]

सहजन्या - णहितारिसा आकिदिवि सेसाचिरदुक्खभा इणो भोन्ति, अवस्सं भू ओविकिंवि अणुग्गहणिमित्तंपि असमा अमेभविस्सदि, ता एहि उदअउम्मु हस्ससुज्ञस्सभ अवदोउ अट्ठाणंकरेम्ह **(नहि तादृशा आकृतिविशेषाश्चिरदुःखभागिनो भवन्ति, अवश्यं भूयोऽपि किम-**

~~~~~~

वर्तमानेन, मेघोदयेन पुनः - जलदाविर्भावेन तु, को नाम - कीदृशो वा, अनर्थः - अपायः, अस्य - राज्ञः, भविष्यति - सम्पत्स्यत इति, न जाने - न वेद्मि, अहमित्यध्याहारः।

[**अत्रेति**। अत्रान्तरे - अस्मिन्नवकाशे, जम्भलिका - एतदाख्या गीतिः, नेपथ्ये गीयत इति वाक्याध्याहारः, सह अरीति, अस्माभिः पूर्वं व्याख्यातैवेयम्), जम्भलिका लक्षणमाह भरतः - शुद्धा द्विपदिका गीतिस्सैव जम्भलिकोच्यत इति]

सहजन्येति। सहजन्या वक्ति। हे सखि, तादृशाः - तद्विधाः, आकृतिविशेषाः - सुलक्षणाकाराः, चिरदुःखभागिनः - दीर्घकालदुःखानुभवाः, न भवन्ति हि - न सम्पद्यन्ते खलु, भूयः - पुनरपि, प्रियसमागमे - प्रियस्य - पुरूरवसः, समागमे - समावेशे, किमपि - किं वा, अनुग्रहनिमित्तम् - अभ्युपपत्तिकारणम्, अवश्यं - सर्वथा, भविष्यति - सम्पत्स्यते, तस्मात्कारणात्, एहि - आगच्छ, उदयोन्मुखस्य - उदेष्यतः, भगवतः - पूज्यस्य, सूर्यस्य - आदित्यस्य, उपस्थानम् - उपासनं, कुर्वः - विधास्यावः।
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

प्यनुग्रहनिमित्तं प्रियसमागमे भविष्यति, तस्मादेह्युदयोन्मुखस्य सूर्यस्य भगवत उपस्थापनं कुर्वः)।

[अत्रान्तरे खण्डधारा -

चिन्तादुम्मि अमाणसि आसह अरिदंसण लाळसि आ।
विअसि अकमळमणोहरए विहरइ हंसीसरवर ए ॥
(चिन्तादूनमानसिका सहचरीदर्शनलालसिका ।
विकसितकमलमनोहरे विहरति हंसी सरोवरे ॥ 4॥)]

(इति निष्क्रान्ते)

(प्रवेशकः)

[नेपथ्ये पुरूरवसः प्रावेशिक्याक्षिप्तिका -

गहणंग इन्दणाहो पिअविरहुम्मा अपअळि अविआरो।
विसइतरुकुसुम किसळ अभूसि अणि अदेहपब्भारो॥

[**अत्रेत्यादि**। अत्रान्तरे - अस्मिन्नवकाशे, खण्डधारा - एतदाख्या द्विपदिका गीतिः, नेपथ्ये गीयत इति वाक्यशेषः, यथा, चिन्तादूनमानसिका - उत्कण्ठा-तप्तहृदया, सहचरीदर्शनलालसिका - वयस्यादर्शनोत्सुका, हंसी - काचित् हंस वधूः, विकसितकमलमनोहरे - प्रोत्फुल्लपद्मरमणीये, सरोवरे - कासारश्रेष्ठें, विहरति - सञ्चरति, खण्डधारालक्षणमाह भरतः - चतुर्दशकलायुक्तैश्चतुर्भिश्च-रणैरिह, खण्डाख्याद्विपदी गीतिः खण्डधारापि सा भवेदिति।]

इतीति। इत्युक्त्वा, निष्क्रान्ते - निर्गते, सहजन्या चित्रलेखे इत्यध्याहारः।

एतल्लक्षणं यथा दर्पणे - प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः। अङ्कद्वयान्तर्विज्ञेयश्शेषं विष्कम्भके यथेति।

In Public domain. Digitization: Muthulakshmi Research Academy

(गहनं गजेन्द्रनाथः प्रियविरहोन्मादप्रकटितविकारः।
विशतितरुकुसुमकिसलयभूषितनिजदेहप्राग्भारः।। 5।।)]

(ततः प्रविशत्युन्मत्तवेषो राजा)

राजा - आः दुरात्मन् राक्षस! तिष्ठ तिष्ठ, क्व मे प्रियतमामादाय गच्छसि, हन्त! हन्त! कैलासशिखराद्गगनमुत्पत्य बाणैर्मामभिवर्षति।

~~~~~~

[नेपथ्य इत्यादि। नेपथ्ये - भूमिकाग्रहणयोग्यतिरस्करिण्यन्तरितनटवर्गस्थाने, पुरूरवसः - एतन्नाम्नो राज्ञः, प्रावेशिकी - प्रवेशसूचिका, आक्षिप्तिका- एतन्नाम्नी गीतिका, यथा, प्रियविरहोन्मादप्रकटितविकारः - प्रियस्य वस्तुनः - प्रियाया इत्यर्थः, विरहेण - वियोगेन, यः उन्मादः - मत्तता, तेन प्रकटितः - प्रकाशितः, विकारः - मानसप्रकृतिविपर्ययः यस्य सः, तरुकुसमकिसलयभूषितनिजदेहप्राग्भारः - तरूणां - वृक्षाणां, कुसुमैः - पुष्पैः, किसलयैः - पल्लवैश्च, भूषितः - अलंकृतः, निजदेहस्य - स्वकीयशरीरस्य, प्राग्भारः - शिखरं, पृष्ठदेश इत्यर्थः, येन स तथाभूतस्सन्, गजेन्द्रनाथः - कश्चिद्गजयूथपः, गहनमरण्यं, विशति - प्रविशति, अत्र गजव्याजेन पुरूरवा आक्षिप्यते, सोऽपि कामुकत्वात् पुष्पादिभिरलङ्कृतनिजदेह इति भावः। आक्षिप्तिकालक्षणं तूक्तम्।]

(ततोनन्तरम्। उन्मत्तवेषः - सोन्मादसमुचितनेपथ्यः, राजा - पुरूरवाः, प्रविशति - रङ्गस्थलं प्राप्नोति)

राजेति। राजा - पुरूरवाः, प्राह। आ इति कोपे, नि।। ''आस्तु स्यात्कोपपीडयोरि''त्यमरः, दुरात्मन् - दुष्टस्वभाव, हे राक्षस - असुर, मे - मम, प्रियतमां - प्रेयसीमूर्वशीम्, आदाय - स्वीकृत्य, क्व गच्छसि - कुत्र व्रजसि, अयं - राक्षसः, कैलासशिखरात् - रजताद्रिशृङ्गात्, गगनमाकाशम्, उत्पत्य - उत्प्लुत्य, मां, बाणैः - शरैः, अभिवर्षति - प्रहरतीत्यर्थः, हन्तेति विषादे, सम्भ्रमाद्द्विरुक्तिः।
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

(विभाव्य) अये!

नवजलधरस्सन्नद्धोऽयं न दृप्तनिशाचर-
स्सुरधनुरिदं दूराकृष्टं न नाम शरासनम्।
अयमपि पटुर्धारासारो न बाणपरम्परा
कनकनिकषस्निग्धा विद्युत् प्रिया न ममोर्वशी ।। 6।।

[इति मूर्छितः पतति, पुनर्द्विपदिकयोत्थाय, निश्श्वस्य -

मज्जि जाणिअं, मिअळो अणिंणिसि अरुकोविहरइ।
जावणुणवतळिसामळधाराहरु वरिसेइ ।।
(मया ज्ञातं मृगलोचनीं निशाचरः कोऽपि हरति।
यावन्नु नवतटिच्छ्यामलोधाराधरो वर्षति ।। 7।।]

विभाव्येत्यादि। राजा। विभाव्य - पर्यालोच्य, पुनःप्राह। अये - इत्याश्चर्ये, अहो मे भ्रान्तिरित्यर्थः, अयं - परिदृश्यमानः, सन्नद्धः - वर्षसन्नाहयुक्तः, नव-जलधरः - नूतनाम्बुदः, दृप्तनिशाचरः - गर्वितराक्षसः, न - न भवति, इदं - पुरोवर्ति, सुरधनुः - इन्द्रचापः, दूरूकृष्टम् - अतिमात्रविस्तृतं, शरासनं - धनुः, न नाम - न भवति हि, अयमग्रतस्थितोऽपि, पटुः - सान्द्रः, धारासारः - वर्ष-धारासम्पातः, बाणपरम्परा - शरपंक्तिः, न - नहि, इयं कनकनिकषस्निग्धा - सुवर्णनिकषोपलगतरेखामसृणा, विद्युत् - तटित्, मम, प्रिया - दयिता, ऊर्वशी, न - नहि।

[इतीत्यादि। इत्युक्त्वा, मूर्छितः - मूर्छां गतस्सन्, पतति - निपतति, द्विपदिकया - नामगीत्या, पुनः - भूयः, उत्थाय - उद्गत्य, निश्श्वस्य - निश्श्वासं कृत्वा, गायति, किमिति। यावन्नु - यावताकालेन तु, नवतटिच्छ्यामलः - नूतन-विद्युत्सहितः, नीलवर्णश्च, धाराधरः - मेघः, वर्षति - वृष्टिं करोति, तावत्

 In Public domain Digitization Muthulakshmi Research Academy

(विचिन्त्य) तत्क्वनु खलु मम रम्भोरूर्गतास्यात् -

तिष्ठेत्कोपवशात्प्रभावपिहिता दीर्घं न सा कुप्यति,
स्वर्गायोत्पतिता भवेन्मयि पुनर्भावार्द्रमस्या मनः।
तां हर्तुं विबुधद्विषोऽपि न हि मे शक्ताः पुरोवर्तिनीं
सा चात्यन्तमदर्शनं नयनयोर्यातेति कोऽयं विधिः ।। ४ ।।

राजा - (दिशोऽवलोक्य) **अहो! परावृत्तभागधेयानां युगपन्निपातिनो दुःखानुबन्धाः, कुतः -**

~~~~~~

कोऽपि - कश्चन, निशाचरः - राक्षसः, मृगलोचनीं - हरिणाक्षीं, हरति - अपहरतीति, मया, ज्ञातं - बुद्धम् ।]

विचिन्त्येत्यादि। राजा विचिन्त्य - विचार्य, प्राह। तत्तस्मात्, मम, रम्भोरुः - कदलीस्तम्भसदृशोरुप्रदेशा ऊर्वशी, सू।। "ऊरूत्तरपदादौपम्य" इत्यूङ् प्रत्ययः, क्वनु - कुत्र वा, गतास्यात्खलु - याता भवेद्धि, कोपवशात् - अमर्ष वशात्, प्रभावपिहिता - प्रभावेन - तिरस्करिणी विद्यामहिम्ना, पिहिता - आच्छादिता सती, तिष्ठेत् - वर्तेत वा, सम्भावनायां लिङ्, तदपि, सा - ऊर्वशी, दीर्घं - चिरं, न कुप्यति - न क्रुध्यति, मयीति शेषः, स्वर्गाय - सुरलोकं गन्तुं, सू।। "क्रियार्थे"त्यादिना चतुर्थी, उत्पतिता - उद्गता, भवेत् - स्याद्वा, तदपि, अस्या ऊर्वश्याः, मनः - चेतः, मयि पुनः - मयि तु, भावार्द्रं - भावेन - अनुरागेण, आर्द्रं - स्निग्धम्, विबुधद्विषः - सुरद्विषोऽपि, मे - मम, पुरोवर्तिनीम् - अग्रतस्थितां, तामूर्वशीं, हर्तुम् - अपहर्तुं, न शक्ता हि - न समर्था खलु, सा - ऊर्वशी च, अत्यन्तं - भृशं, नयनयोः - नेत्रयोः, ममेति शेषः, अदर्शनं - दृष्टिगोचरत्वाभावं, याता - गता, इति - एवम्भूतः, अयम् - एषः, विधिः - हेतुः, कः - को वा स्यात्।
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

अयमेकपदे तया वियोगः प्रियया चोपनतस्सुदुस्सहो मे।
नववारिधरोदयादहोभिर्भवितव्यं च निरातपर्धिरम्यैः ।। 9।।

[अत्रान्तरे चर्चरी -

जळहरसंहरएहकोपमइआणत्तओ
अविरळधारासारक्कन्तदिसामुह ओ ए।
मञिवुहविभमन्तेजइपि अपेक्खिहिमि
तव्वेजंजुकरीहि सितंतु सहीहिमि ।।

(जलधर संहर अत्र कोपं मया आज्ञप्तः
अविरलधारासाराक्रान्तदिङ्मुखः ।

राजेति। दिशः - ककुभः, अवलोक्य - वीक्ष्य, प्राह। परावृत्तभागधेयानां- निवृत्तभाग्यानां, जनानामिति शेषः, दुःखानुबन्धाः - व्यथापरम्पराः, युगपन्निपातिनः - एकदा प्राप्नुवन्ति, अहो - आश्चर्यम्, कुतः - कस्मादिति चेत्। अयमिति। एकपदे - सपदि, नि।। ''एकपदे सद्यस्सपदि तत्क्षण'' इत्यमरः, प्रियया - दयितया, तया ऊर्वश्या, सुदुस्सहः - अत्यन्तं सोढुमशक्यः, अयम् - एषः, वियोगः - विश्लेषः, मे - मम, उपनतः - प्राप्तश्च, नववारिधरोदयात् - नूतनमेघाविर्भावात्, अहोभिः - वासरैः, निरातपर्धिरम्यैः - अनातपसम्पत्तिरमणीयैः, भवितव्यं - भाव्यञ्च ।

[अत्रेत्यादि। अत्रान्तरे - अस्मिन् समये, चर्चरी - एतदाख्या गीतिः, नेपथ्ये गीयत इति शेषः, यथा, हे जलधर - मेघ, अविरलधारासाराक्रान्तदिङ्मुखः - अविरलेन - सान्द्रेण, धारासारेण - धारासम्पातेन, आक्रान्तानि - व्याप्तानि, दिङ्मुखानि - दिशावकाशा येन सः, त्वं - मया, आज्ञप्तः - अनुशिष्टस्सन्, अत्र - अस्मिन् समये, कोपं - अमर्षं, संहर - त्यज, अहं, पृथिवीं - भुवं, भ्रमन् -

In Public domain, Digitization Mithila Research Academy

अहं पुथिवीं भ्रमन् यदि प्रियां प्रेक्षिष्ये,
तदा यद्यत् करिष्यसि तत्तत्सहिष्ये ।। 10 ।।)]

(विहस्य) वृथैव खलु मया मनसः परितापवृद्धिरुपेक्ष्यते, यथा मुनयो व्याहरन्ति "राजा कालस्य कारणमि"ति तत्किमहं जलदसमयं प्रत्यादिशामि? ।

[विहस्योत्थाय, यथा मुनयोऽप्येवं व्याहरन्तीति पुनःपठित्वा, भवतु प्रत्यादिशामि अनन्तरे चर्चरी -

गन्धुम्मा इअ महुअरगीएहिं
वज्जन्ते हिंपरहुअदूरेहिं ।
पसरिअपवनुव्वेल्लि अपल्लवणिअरू
सुललिअ विविह पआरेण च्चइकप्पअरू ।।

सञ्चरन्, प्रियां - दयितामूर्वशीं, प्रेक्षिष्ये यदि - द्रक्ष्यामि चेत्, तदा - तस्मिन् समये, यद्यत्, करिष्यसि - तनोषि, तत्तत् - उभयत्रापि वीप्सायां द्विरुक्तिः, सहिष्ये - क्षमिष्ये ।]

विहस्येति। राजा विहस्य - हासं कृत्वा, प्राह, वृथा - अकारणमेव, मया, मनसः - चित्तस्य, परितापवृद्धिः - सन्तापातिशयः, उपेक्ष्यते खलु - सह्यते हि, यथा - येन प्रकारेण, राजा - नृपतिः, कालस्य - वसन्तादि समयस्य, कारणं - हेतुरिति, मुनयो - मन्वादयः, व्याहरन्ति - वदन्ति, तत्तस्मात्कारणात्, अहं - जलदसमयं - वर्षकालं, प्रत्यादिशामि - निराकरोमि किम्। किमिति प्रश्ने।

[राजा। विहस्य - प्रहस्य, उत्थाय - उत्थितो भूत्वा, यथेत्यादि पुनः पठित्वा - भूयो व्याहृत्य, प्राह, भवतु - अस्तु, प्रत्यादिशामि - निरस्यामि, अनन्तरे - ततःपरं, चर्चरी - एतदाख्या गीतिः, नेपथ्ये गीयत इति शेषः, यथा,

In Public domain. Digitization Muthulakshmi Research Academy

(गन्धोन्मादितमधुकरगीतै-
र्वाद्यमानैः परभृततूर्यैः।
प्रसृतपवनोद्वेल्लितपल्लवनिकर-
स्सुललितविविधप्रकारेण नृत्यति कल्पतरुः॥ 11॥)

तेन नर्तित्वा]

अथवा, न प्रत्यादिशामि, यत्प्रावृषेण्यैरेव चिह्नैर्ममराज्योपचारः सम्प्रति हि -

विद्युल्लेखाकनकरुचिरं श्रीवितानं ममाभ्रं,
व्याधूयन्ते निचुलतरुभिर्मञ्जरी चामराणि।

गन्धोन्मादितमधुकरगीतैः - गन्धेन - सौरभेन, उन्मादितानां - प्राप्तचेतो विकाराणां, मधुकराणां - षट्पदानां, गीतैः - गानविशेषैः, वाद्यमानैः - ताड्यमानैः, परभृततूर्यैः - परैः - इतरैः, भ्रियन्ते - पोष्यन्त इति, परभृताः - पिकाः, त एव तूर्याणि - वाद्यानि, तैः, प्रसृतपवनोद्वेल्लितपल्लवनिकरः - प्रसृतेन - मन्देन - वायुना, उद्वेल्लितः - चलितः, पल्लवनिकरः - किसलयसमुदायः यस्य स तथोक्तः, कल्पतरुः - कल्पवृक्षः, सुललितविविधप्रकारेण - अतिसुन्दरबहुप्रकारेण, नृत्यति - लास्यं करोति। तेन नर्तित्वा - तेन - गीत्या प्रतिपाद्यमान तौर्यत्रिकेन, नर्तित्वा - नृत्यं कृत्वा प्राहेत्युत्तरेणान्वयः ।]

अथवेत्यादि। अथवा - तथा नोचेत्, न प्रत्यादिशामि - प्रावृट्कालं निराकरोमि, यद्यस्मात्, प्रावृषेण्यैः - प्रावृट्कालभवैः, चिह्नैः - मेघविद्युल्लेखादि लक्षणैरेव, मम, राज्योपचारः - राजार्हसेवा विशेषः, भवतीति शेषः, सम्प्रति हि- इदानीं खलु, विद्युल्लेखाकनकरुचिरं - विद्युल्लेखया - तटिद्रेखया, कनकरुचिरं - स्वर्णमनोहरम्, अभ्रं - मेघः, मम, श्रीवितानं - शोभायुक्त उल्लाभः, भवति,

In Public domain Digitization: Mahamahopadhyaya Research Academy

घर्मच्छेदात्पटुतरगिरो वन्दिनो नीलकण्ठा
धाराहारोपनयनपरानैगमास्सानुमन्तः ।। 12 ।।

किं मेघपरिच्छदश्लाघया, यावदस्मिन् वने प्रणष्टां प्रियामन्विष्यामि।

[पाठस्यान्तरे भिन्नकः -

दइआरहिओअहि अंदुहिओ विरहाणु गओपरिमन्धरओ।
गिरिकाणण एकुसुमुज्ञळए गअजूहवईउ अझीणगई ।।
(दयितारहितोऽधिकं दुःखितो विरहानुगतः परिमन्थरकः।
गिरिकाननके कुसुमोज्ज्वलके गजयूधपतिरूहस्व क्षीणगतिः।। 13 ।।)]

निचुलतरुभिः - वेतसवृक्षैः, मञ्जरीचामराणि - मञ्जर्यः - पुष्पगुच्छा एव, चामराणि - व्यजनानि, व्याधूयन्ते - चाल्यन्ते, घर्मच्छेदात् - ग्रीष्मात्ययात्, पटुतरगिरः - स्फुटतरभाषिणः, नीलकण्ठाः - मयूराः, वन्दिनः - स्तुतिपाठकाः, मम भवन्तीति शेषः, धाराहारोपनयनपराः - धारा - जलधाराः, ता एव हाराः - मुक्तावल्यः, तेषामुपनयने - सम्पादने, पराः - आसक्ताः, सानुमन्तः - नगाः, नैगमाः - वणिजः, नि।। "नैगमो वाणिजो वणिगि"त्यमरः, भवन्ति, भवतु - अस्तु, मेघ-परिच्छदश्लाघया - जलदोपचारश्लाघनेन, किं - किं वा प्रयोजनम्, अस्मिन्वने - एतस्मिन्कानने, प्रणष्टां - तिरोहितां, प्रियां - दयितामूर्वशीं, यावदन्विष्यामि - मार्गिष्यामि।

[पाठस्य - चर्चरीगीतिका पाठस्य, अन्तरे - मध्ये, भिन्नकः - भिन्नक इति गीतविशेषः गीयत इति शेषः, यथा, दयितारहितः - प्रियाविरहितः, अत एव अधिकं - भृशं, दुःखितः - व्याकुलितः, विरहानुगतः - विरहावस्थापन्नः, परिमन्थरकः - अतीवमन्दः, गजयूधपतिः - कुञ्जरकुलनाथः, कुसुमोज्ज्वलके - पुष्पप्रकाशिते, गिरिकाननके - पर्वतोपान्तवने, क्षीणगतिः - कृशसञ्चारस्सन्, तिष्ठतीत्यूहस्व - आलोचय।]

In Public domain. Digitization Muthulakshmi Research Academy

(परिक्रम्य) हन्त व्यवसितस्य मे सन्दीपनं संवृत्तम्, कुतः -

आरक्तराजिभिरियं कुसुमैर्नवकन्दलीसलिलगर्भैः।
क्रोधादन्तर्भाष्पे स्मरयति मां लोचने तस्याः॥ 14॥

इतो गतेति कथंनु तत्र भवती मया सूचयितव्या -

पद्भ्यां स्पृशेद्वसुमतीं यदि सा सुगात्री
मेघाभिवृष्टसिकतासु वनस्थलीषु।
पश्चान्नता गुरुनितम्बतया ततोऽस्या
दृश्येत चारुपदपंक्तिरलक्तकाङ्का॥ 15॥

परिक्रम्येति। राजा। परिक्रम्य - किञ्चिद्दूरं गत्वा, प्राह। किमिति। व्यवसितस्य मे - प्रियान्वेषणोद्योगयुक्तस्य मम, सन्दीपनं - विरहानलोद्दीपनं, संवृत्तं - जातम्, हस्तेति विषादे, कुतः - कस्मादिति चेत्, आरक्तेति, इयं - परिदृश्यमाना, नवकन्दली - नूतनशिलीन्ध्रः, आरक्तराजिभिः - ईषद्रक्तकोटिभिः, नि॥ "आङीषदर्थेऽभिव्याप्ता"वित्यमरः), सलिलगर्भैः - अन्तर्गतजलैः, कुसुमैः - पुष्पैः, कोपात् - आमर्षात्, अन्तर्भाष्पे - अन्तस्स्थिताश्रुणी, तस्याः - ऊर्वश्याः, लोचने - नेत्रे, मां, स्मरयति - स्मृतिं जनयति।

इतइति। तत्र भवती - पूज्या ऊर्वशी, इतोगता - अनेन मार्गेण यातेति, मया, कथंनु - केन वा प्रकारेण, सूचयितव्या - ज्ञातव्या भवतीति काकुः, यतः, पद्भ्यामिति। सुगात्री - लावण्य युताङ्गी, सा - ऊर्वशी, मेघाभिवृष्टसिकतासु-जलदसिक्तवालुकासु, वनस्थलीषु - काननप्रदेशेषु, पद्भ्यां - पादाभ्यां, वसुमतीं - पृथिवीं, स्पृशेद्यदि - स्पर्शं कुर्याच्छेत्, ततः - तस्मिन् समये, गुरुनितम्बतया-स्थूलश्रोणीभागतया, पश्चान्नता - चरमभागे निम्ना, अलक्तकाङ्का - लाक्षाराग-चिह्निता, अस्याः - ऊर्वश्याः, चारुपदपंक्तिः - सुन्दरांघ्रिश्रेणिः, दृश्येत - वीक्ष्येत।

In Public domain, Digitization Muthulakshmi Research Academy

(परिक्रम्यावलोक्य च, सहर्षं) उपलब्धमुपलक्षणम्। येन तस्याः कोपनाया मार्गोऽनुमीयते -

हृतोष्ठरागैर्नयनोदबिन्दुभिर्निमग्ननाभेर्निपतद्भिरङ्कितम्।
च्युतं रुषा भिन्नगतेरसंशयं शुकोदरश्याममिदं स्तनांशुकम्॥ 16॥

(विभाव्य) सेन्द्रगोपकं नवशाद्वलमिदम्, कुतोनु खलु निर्जने वने प्रिया-प्रवृत्तिरवगन्तव्या ?।

(विलोक्य) अयमासारोच्छ्वसितशैलेयस्थगितपाषाणमारूढः।

परिक्रम्येति। राजा। परिक्रम्य - किञ्चिद्गत्वा, अवलोक्य - प्रेक्ष्य च, सहर्षं - ससन्तोषं यथातथा, प्राह, उपलक्षणं - प्रियाचिह्नम्, उपलब्धं - ज्ञातं, येन हेतुना, कोपनायाः - अमर्षशीलायाः, तस्याः - ऊर्वश्याः, मार्गः - पन्थाः, अनुमीयते - ऊह्यते, हृतेति। निमग्ननाभेः - निम्ननाभेः, रुषा - मां प्रतिरोषेण, भिन्नगतेः - स्खलितगमनायाः, ऊर्वश्याः, निपतद्भिः - स्रवद्भिः, नयनोदबिन्दुभिः - अश्रुकणैः, अङ्कितं - चिह्नितं, शुकोदरश्यामं - कीरगर्भश्यामलं, च्युतं - गलितं, स्तनांशुकं - वक्षस्थलोपरिस्थितमुत्तरीयम्, इदम् - एतदेव, आसंशयं - संशयो नास्ति।

विभाव्येति। राजा। विभाव्य - समालोच्य, प्राह, इदम् - एतत्, सेन्द्र-गोपकम् - इन्द्रगोपाख्यकीटविशेषसमाकीर्णं, नवशाद्वलं - नूतनदूर्वादलहरितं स्थानं, न तु स्तनांशुकमित्यर्थः, निर्जने वने - जनरहिते कानने, प्रियाप्रवृत्तिः - प्रेयसीवार्ता, कुतोनु खलु - कस्माद्वा, अवगन्तव्या - ज्ञातव्या ।

विलोक्येति। राजा। विलोक्य - वीक्ष्य, प्राह, आसारोच्छ्वसितशैलेय-स्थगितपाषाणम् - आसारेण - धारावर्षेण, उच्छ्वसितेन - उच्चलितेन, शैलेयेन - शिलाजतुना, नि॥ ''शैलेयमर्थ्यं गिरिजमश्मजं च शिलाजत्वि''त्यमरः, स्थगितं -

In Public domain. Digitization Muthulakshmi Research Academy

आलोकयति पयोदान् प्रबलपुरो-
वातताडितशिखण्डः केकागर्भेण।
शिखी दूरोन्नमितेन कण्ठेन भव-
त्वस्मात्प्रियाप्रवृत्तिमागमयेयम् ।। 17 ।।

[अनन्तरे खण्डकः -

संपत्तविसूरणओ तुरि अंपरवारणओ।
पिअअमदंसणळाळसओ गअवरुविम्हिअमाणसओ ।।
(सम्प्राप्तविसूरणकस्त्वरितं परवारणकः।
प्रियतमादर्शनलालसको गजवरो विस्मितमानसकः।। 18 ।।)

(तेन खण्डकान्तरे चर्चरी)

~~~~~~

व्याप्तं, पाषाणं - शिलाम्, आरूढः - अधिष्ठितः, अयं - पुरोवर्ती, अस्य श्लोकस्थेन शिखीत्यनेन सम्बन्धः, आलोकयतीति, प्रबलपुरोवातताडितशिखण्डः - जञ्झामारुताहतबर्हः, केकागर्भेण - केकास्वरयुक्तेन, दूरोन्नमितेन - दीर्घमुन्नती कृतेन, कण्ठेन - गलेन, उपलक्षितः, शिखी - मयूरः, वयोदान् - जलदान्, आलोकयति - पश्यति, भवतु - अस्तु, अस्मात् - मयूरात्, प्रियाप्रवृत्तिं - दयिता वृत्तान्तम्, आगमयेयम् - आनयेयम्।

[अनन्तर इत्यादि। अनन्तरे - ततः परं, खण्डकः - एतदाख्यो गीत-विशेषः, गीयत इति शेषः, सम्प्राप्तविसूरणकः - प्राप्तभेदः, प्रियाविरहादित्यर्थः, परवारणकः - शात्रवभञ्जनः, प्रियतमादर्शनलालसकः - प्रेयसी प्रेक्षणाभिलाषुकः, विस्मितमानसकः - अद्भुतरसाविष्टमनस्कः, गजवरः - कश्चित्कुञ्जरश्रेष्ठः, त्वरितं - शीघ्रं, गच्छतीति शेषः, खण्डकलक्षणं तु भरतेनोक्तम् - पूर्वं चतुर्विंशतिभि-रष्टाविंशतिभिः परम्। मात्राभिरिह यस्यार्थं खण्डकस्स प्रकीर्तित इति।। तेन -
~~~~~~

 In Public domain, Digitization: Maharshi Research Academy

बरहिणपब्भप इअब्भत्थेमि आचक्खुहिमेता
एत्थअरण्णेभमन्ते जइपइदिट्टीसामहुकंता।
णिसम्मइमिअंकसरिसेवअणे हंसगई
एचिण्हे जाणीहिसि अअक्खि उतुज्झमई ।।

(बर्हिणप्रभो! त्वामभ्यर्थये आचक्ष्वमेतत्
अत्रारण्ये भ्रमता यदि त्वया दृष्टा सा मम कान्ता।
निशामयमृगाङ्कसदृशं वदनं हंसगतिः
एतच्चिह्नं ज्ञास्यसि आख्यातं तुभ्यं मया ।। 19 ।।)

(चर्चरिकयोपविश्य - अञ्जलिं बध्वा)]

नीलकण्ठहरोत्कण्ठां वनेऽस्मिन् वनिता मम।
दीर्घापाङ्गा सितापाङ्ग! दृष्टा दृष्टिक्षमा भवेत् ।। 20 ।।

हेतुना, खण्डकान्तरे - एतद्गीतावकाशे, चर्चरी - एतदाख्यागीतिः, गीयते, राजवाक्यानुकरणेनेति भावः, हे बर्हिणप्रभो - मयूरराज! अहं, त्वां - भवन्तम्, अभ्यर्थये - प्रार्थयामि, मे - मह्यं, तत्, आचक्ष्व - वद, तत्किम्, अत्रारण्ये - अस्मिन्वने, भ्रमता - सञ्चरता, त्वया - भवता, मम, कान्ता - प्रिया, सा - ऊर्वशी, दृष्टा यदि - प्रेक्षिता चेत्, निशामय - पश्य, मृगाङ्कसदृशं - चन्द्रनिभं, वदनम् - आननं, हंसगतिः - हंसतुल्यगमनम्, इति, मया, तुभ्यं - भवते, आख्यातं - कथितम्, एतच्चिह्नम् - इदं लक्षणं, ज्ञास्यसि - जानीहि ।]

(राजा। चर्चरिकया - बरहिणेत्यादि गीत्या, उपविश्य - निषण्णो भूत्वा, अञ्जलिं बद्ध्वा - हस्तौ संयोज्य, प्राहेत्युत्तरेणान्वयः)

नीलकण्ठेत्यादि। हे सितापाङ्ग - शुक्लनेत्रान्त, नीलकण्ठ - मयूर, उत्कण्ठाम् - औत्सुक्यं, हर - अपनय, दृष्टिक्षमा - दर्शनयोग्या, दीर्घापाङ्गा -

कथमदत्वा प्रतिवचनं प्रनृत्तः।

किन्नु खलु हर्षकारणमस्य?

भवतु विदितमेतन्मत्प्रियाविप्रणाशा-
द्घनरुचिरकलापो निस्सपत्नोऽद्यजातः।
रतिविगलितबन्धे केशपाशे सुकेश्या-
स्सतिकुसुमसनाथे कं हरेदेषबर्हः? ॥ 21 ॥

न खल्वेनं परव्यसननिर्वृतं प्रक्ष्यामि।

दीर्घनेत्रान्ता, मम, वनिता - प्रिया, अस्मिन्वने - एतस्मिन्कानने, दृष्टा - प्रेक्षिता, भवेत् - स्यात्किमिति काकुः, अयं मयूरः, प्रतिवचनम् - उत्तरम्, अदत्वा - अनुक्त्वा, कथं - केन प्रकारेण, प्रनृत्तः - नाट्यारम्भं कृतवान्।

किन्विति। राजा पुनःप्राह। अस्य - मयूरस्य, हर्षकारणं - सन्तोषहेतुः, किन्नु खलु - किं वा स्यात्, **भवत्वित्यादि।** भवतु - अस्तु, एतत् - हर्षकारणं, विदितं - ज्ञातं, मत्प्रियाविप्रणाशात् - मम प्रियायाः - दयिताया ऊर्वश्याः, विप्रणाशात् - अदर्शनात्, घनरुचिरकलापः - मेघवन्मनोहरबर्हः, अद्य - इदानीं, निस्सपत्नः - निश्शत्रुकः, जातः - भूतः, रतिविगलितबन्धे - रत्यां - क्रीडायां, विगलितः - स्रन्तः, बन्धः - ग्रन्थिर्यस्य तस्मिन्, कुसुमसनाथे - पुष्पाकीर्णे, सुकेश्याः - चारुकचाया ऊर्वश्याः, केशपाशे - केशकलापे, सति - विद्यमाने, नि॥ ''सत्ये साधौ विद्यमाने प्रशस्तेऽभ्यर्हिते च सदि''त्यमरः, एष बर्हः - अयं शिखण्डः, कं - जनं, हरेत् - आवर्जयेत्, कस्य वा मनोहरो भवेदिति भावः परव्यसननिर्वृतं - परेषाम् - अन्येषां, व्यसनेन - विपदा, नि॥ ''व्यसनं विपदि भ्रंशे दोषे कामज कोपज'' इत्यमरः, निर्वृतं - सुखितम्, एनं - मयूरं, न खलु प्रक्ष्यामि - प्रश्नं करिष्यामि हि।

In Public domain. Digitization Muthulakshmi Research Academy

(परिक्रम्य) इयमातपात्यये सन्धुक्षितमदा जम्बूविटपमध्यास्ते परभृतिका, विहङ्गेषु पण्डितजातिरेषा, यावदेनामभ्यर्थये।

[अनन्तरे खुरकः -

विज्ञाहरकाणणळीणओदुक्ख विणिग्गअबाहु प्पीडओ।
दूरोसारि अहिअआणन्दओ अम्बरमाणेण भमइगइन्दओ॥
(विद्याधरकाननलीनको दुःख विनिर्गत बाष्पोत्पीडकः।
दूरोत्सारितहृदयानन्दकोऽम्बरमानेन भ्रमति गजेन्द्रकः॥ 22॥)

(खुरकानन्तरे चर्चरी)

परहुअमहुरपलाविणिकन्ती णन्दणवण सच्छन्दभमन्ती।
जइपइपिअअमसामहुदिट्टा ताअअक्खहिमहुपरपुट्टा॥

परिक्रम्येति। राजा। परिक्रम्य - किञ्चिद्गत्वा प्राह, किमिति। आतपात्यये - ग्रीष्मावसाने, सन्धुक्षितमदा - सन्दीपितमदा, इयम् - एषा, परभृतिका - कोकिला, जम्बूविटपं - जम्बूकुञ्जं, अध्यास्ते - अधितिष्ठति, एषा - कोकिला, विहङ्गेषु - पक्षिषु, पण्डितजातिः - विद्वज्ज्ञातिः, अतः, एनां - परभृतिकां, यावदभ्यर्थये - प्रार्थयिष्ये, प्रियावृत्तान्तमिति शेषः।

[अनन्तर इति। अनन्तरे - तदुत्तरं, खुरकः - नृत्यविशेषः प्रतिपाद्यत इति शेषः, यथा, विद्याधरकाननलीनकः - विद्याधराणां - देवयोनिविशेषाणां, कानने - वने, लीनकः - प्रच्छन्नः, दुःखविनिर्गतबाष्पोत्पीडकः - दुःखेन - प्रिया विरहविषादेन, विनिर्गतं - निस्सृतं, यद्बाष्पं - नेत्रजलं, तस्य, उत्पीडकः - निरोधकः, दूरोत्सारितहृदयानन्दकः - दूरमत्यन्तम्, उत्सारितः - निरस्तः, हृदयानन्दो - मनस्सन्तोषो येन स तथोक्तः, गजेन्द्रकः - करिराजः, अम्बरमानेन-आकाशपरिमितेन, अत्युन्नतेनेति यावत्, भ्रमति - सञ्चरति, खुरकानन्तर इति।

In Public domain. Digitization Muthulakshmi Research Academy

(परभृते मधुरप्रलापिनि ! कान्ता नन्दनवने स्वच्छन्दं भ्रमन्ती।
यदि त्वया प्रियतमा सा मम दृष्टा तदाचक्ष्व मह्यं परपुष्टे ।। 23 ।।)
(एतदेव नर्तित्वा वलन्तिकयोपसृत्य जानुभ्यां स्थित्वा)]

भवति !

त्वां कामिनां मदनदूतिमुदाहरन्ति
मानावभङ्गनिपुणं त्वममोघमस्त्रम्।
तामानय प्रियतमां मम वासकाशं
मां वा नयस्व कलभाषिणि यत्र कान्ता।। 24 ।।

~~~~~~

खुरकानन्तरे - खुरकावसाने, चर्चरी - एतदाख्या गीतिः, गीयत इति शेषः, मधुरप्रलापिनि - मञ्जुभाषिणि, हे परभृते - कोकिले, नन्दनवने - इन्द्रोद्यानतुल्ये कानने, स्वच्छन्दं - स्वैरं, भ्रमन्ती - सञ्चरन्ती, प्रियतमा - अत्यन्तप्रिया, सा- प्रसिद्धा, मम कान्ता - ऊर्वशी, त्वया - भवत्या, दृष्टा यदि - प्रेक्षिता चेत्, हे परपुष्टे - परभृते, तत् - प्रियादर्शनं, मह्यम्, आचक्ष्व - कथय, एतत् - इदमेव, नर्तित्वा - नटित्वा, वलन्तिकया - रागोपाङ्गविशेषेण, उपसृत्य - अनुसृत्य, जानुभ्याम् - ऊरुपर्वभ्यां, नि।। "जानूरुपर्वाष्ठी वदस्त्रिया"मित्यमरः, स्थित्वा - प्राहेत्युत्तरेणान्वयः ।]

भवतीति। हे भवति - पूज्ये परभृते, त्वां - भवतीं, कामिनां - कामुकानां, मदनदूतिं - मन्मथदूतिकाम्, उदाहरन्ति - कथयन्ति, लोका इति शेषः। त्वं, मानावभङ्गनिपुणं - मानच्छेदप्रवीणम्, अमोघं - सफलं, सद्यः कार्यकारित्वादिति भावः, अस्त्रं - शस्त्रं, मदनस्येति शेषः, तस्मात्, हे कलभाषिणि - मधुरवचने, तां - प्रसिद्धां, प्रियतमां - प्रेयसीमूर्वशीं, मम सकाशं - समीपं वा, आनय - आगमय, अथवा, यत्र - यस्मिन्प्रदेशे, कान्ता - प्रिया, वर्तत इति शेषः, तं प्रदेशं, यत्तदोर्नित्यसम्बन्धात्, मां वा, नयस्व - प्रापयस्व, नयतिर्द्विकर्मकः, त्वां
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

किमाह भवती, कथं त्वामेवमनुरक्तं विहाय सा गतेति? शृणु तावत् -

कुपिता न तु कोपकारणं सकृदप्यात्मकृतं स्मराम्यहम्।
प्रभुता रमणेषु योषितां न तु भावस्खलितान्यपेक्षते ॥ 25 ॥

(विलोक्य) **कथं कथाच्छेदकारिणि स्वकार्ये व्यासक्ता -**

महदपि परदुःखं शीतलं सम्यगाहुः
प्रणयमगणयित्वा यन्ममापद्गतस्य।

~~~~~~

- भवन्तं, विहाय - परित्यज्य, सा - ऊर्वशी, कथं - केन प्रकारेण, गता - यातेति, पृच्छसि किमिति वाक्याध्याहारः, शृणु तावत् - आकर्णय, हे परभृते, कुपितेति। कुपिता - कोपयुक्ता, ऊर्वशीति शेषः, अहं, सकृत् - एकवारमपि, आत्मकृतं - स्वकृतं, कोपकारणम् - अमर्षहेतुं, न तु स्मरामि - न तर्कयामि हि, तथापि, योषितां - स्त्रीणां, रमणेषु - प्रियेषु विषये, प्रभुता - आधिपत्यं, भावस्खलितानि - भावव्यतिक्रमांस्तु, नापेक्षते - न स्पृहयते, अकारणामर्षः स्त्रीणां नैसर्गिक इति भावः।

विलोक्येति। राजा। विलोक्य - प्रेक्ष्य, प्राह। हे कथाच्छेदकारिणि - प्रकृतचारित्रनाशकारिणि, त्वं, स्वकार्ये - स्वव्यापारे, कथं - केन प्रकारेण, व्यासक्ता - आसक्तिविशिष्टासि, महदिति। महत् - अधिकमपि, परदुःखम् - अन्यखेदं, शीतलं - सुखावहम्, अत एव सम्यक् - समीचीनम्, आहुः - वदन्ति, केचिदिति शेषः, यद्यस्मात्, मदान्धा - गर्वान्धा, एषा - कोकिला, आपद्गतस्य- प्रियाविरहेण विपन्नस्य, मम, प्रणयं - सौहृदम्, अगणयित्वा - अविचार्य, अभिमुखपाकम् - आसन्नपरिपाकं, राजजम्बूद्रुमस्य - उन्नतजम्बूवृक्षस्य, फलम्, अधरम्- ओष्ठमिव, पातुम् - आस्वादयितुं, प्रवृत्ता - व्यावृता, इति प्रियाविरहेण उपमानो-
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

अधरमिव मदान्धा पातुमेषा प्रवृत्ता
फलमभिमुखपाकं राजजम्बूद्रुमस्य ।। 26 ।।

एवं गतेऽपि प्रियेव मञ्जुस्वनेति न कोऽपि कोपोऽस्याम् इतो वयम् । (परिक्रामितकेन कर्णं दत्वा) अये! दक्षिणेन वनं प्रियाचरणनिक्षेपशंसी नूपुरशब्दः ! यावदत्र गच्छामि ।

[ककुभेन षडुपभङ्गाः -

पिअअमविरहकिला मिअवअणओ
अविरलवाहजलाउलणअणओ ।
दुस्सहदुक्खविसण्ठुलगमणओ
पसरिअ उरुतावदी विअअङ्गओ ।।

पमेयभावस्य - जम्बूफलाधरयोरप्रसिद्धत्वेऽपि राज्ञा मोहादूहितम्, एवमिति। एवमनेन प्रकारेण, गते - कार्ये स्थितेऽपि, प्रिया - प्रेयसीव, मञ्जुस्वना - मधुर स्वरेति हेतोः, अस्यां - परभृतायां, कोऽपि - को वा, कोपः - क्रोधः, न - न विद्यते, ममेत्यध्याहारः, अतः, वयम्, इतः - अनेन मार्गेण, गमिष्याम इति शेषः ।

परिक्रामितकेनेति। राजा। परिक्रामितकेन - परिक्रमणाभिनयेन, परि-क्रमणं - किञ्चिद्दूरं गमनं, कर्णं - श्रोत्रं, दत्वा - वितीर्य, आकर्ण्येत्यर्थः, प्राह, अये इत्याश्चर्ये। दक्षिणेन वनं - वनस्य दक्षिणादूरप्रदेशे, सू।। ''एनपा द्वितीये''ति द्वितीया, प्रियाचरणनिक्षेपशंसी - दयितापादप्रक्षेपसूचकः, नूपुरशब्दः - मञ्जीरध्वनिः, निस्सरतीति शेषः, तस्मात्, अत्र - इमं प्रदेशं, यावद्गच्छामि - गमिष्यामि ।

ककुभेनेत्यादि। ककुभेन - ककुभाख्यवाद्यविशेषेण, षट् - षट्संख्याकाः, उपभङ्गा एतदाख्य गीतविशेषाः, गीयन्त इति शेषः, यथा, प्रियतमाविरहक्लान्त-वदनकः - दयिताविश्लेषम्लानाननः, अविरलबाष्पजलाकुलनयनकः - सान्द्राश्रु-

In Public domain, Digitization: Muthulakshmi Research Academy

(प्रियतमा विरहक्लान्तवदनकोऽ-
विरलबाष्पजलाकुलनयनकः।
दुस्सह दुःखविसंस्थुलगमनकः
प्रकृतोरुतापदीप्ताङ्गकः ॥ 27 ॥

अहिअंदुम्मि अमाणसओदरिअंगओ,
काणने परिभमइगइन्दओ।

(अनन्तरे द्विपदिकया दिशोऽवलोक्य)

पिअकरिणी विच्छेइओ गुरुसो आणलदीविअओ,
वाहजलाउललोअणओ, करिवर भमइसमाउलओ
(अधिकं दूनमासकोदरितं गतः
कानने परिभ्रमति गजेन्द्रकः।
प्रियकरिणीविच्छेदितको गुरुशोकानलदीपितकः
बाष्पजलाकुललोचनकः करिवरो भ्रमति समाकुलकः॥ 28 ॥)]

(परिक्रम्यावलोक्य च) अहो धिक्!

सलिलसमाकीर्णनेत्रः, दुस्सहदुःखविसंस्थुलगमनकः - असह्यव्यथास्थैर्यरहितगतिः, प्रसृतोरुतापदीप्ताङ्गकः - विस्तृताधिकसन्तापज्वलितशरीरः, अधिकं - भृशं, दूनमानसकः - सन्तप्तहृदयः, गजेन्द्रकः - गजराजः, कानने - वने, दरितं - भयं, गतः - प्राप्तस्सन्, परिभ्रमति - समन्तात्सञ्चरति, अनन्तरे - तदुपरि, द्विपदिकया - एतदाख्यया गीत्या, दिशः - आशाः, अवलोक्य - वीक्ष्य, राजा प्राहेत्युत्तरेणान्वयः, प्रियेति। प्रियकरिणीविच्छेदितकः - इष्टहस्तिनीवियोजितः, गुरुशोकानलदीपितकः - दुर्भरदुःखाग्निसन्तप्तः, बाष्पजलाकुललोचनकः - अश्रुवारिव्याप्तनयनः, करिवरः - गजेन्द्रः, समाकुलकः - दुःखितस्सन्, भ्रमति - सञ्चरति।

In Public domain. Digitization Muthulakshmi Research Academy

मेघश्यामादिशो दृष्ट्वा मानसोत्सुकचेतसाम्।
कूजितं राजहंसानां नेदं नूपुरशिञ्जितम्।। 29।।

भवतु, यावदेते मानसोत्सुकाः पतत्रिणस्सरसो नोत्पतन्ति ताव- देतेभ्यः प्रियाप्रवृत्तिरवगन्तव्या।

(उपेत्य) भोहं सजलविहङ्गराज!

पश्चात्सरः प्रतिगमिष्यसि मानसं तत्,
पाथेयमुत्सृज बिसं ग्रहणाय भूयः।

~~~~~~

परिक्रम्येत्यादि। राजा। परिक्रम्य - कियद्दूरं गत्वा, अवलोक्य - वीक्ष्य च प्राह, अहो इत्याश्चर्ये, धिगिति निर्भर्त्सने, नि।। ''धिङ्निर्भर्त्सननिन्दयो''-रित्यमरः, मेघश्यामाः - जलदनीलाः, दिशः - ककुभः, दृष्ट्वा - विलोक्य, मानसोत्सुकचेतसां - मानसे - मानसाख्यसरोवरे, उत्सुकमुत्कण्ठितं - चेतश्चित्तं येषां तेषां, राजहंसानां - हंसविशेषाणाम्, इदं - श्रूयमाणं, कूजितं - ध्वनितं, नूपुरशिञ्जितं - मञ्जीरस्वनितं, न - न भवति, भवतु - अस्तु, यावत् - यावताकालेन, मानसोत्सुकाः - मानसाख्यसरोवरासक्ताः, एते - पुरोवर्तिनः, पतत्रिणः - पक्षिणः हंसा इत्यर्थः, सरसः - मानसाख्यसरोवरात्, नोत्पतन्ति - नोत्तिष्ठन्ति, तावत् - तावताकालेन, एतेभ्यः - राजहंसेभ्यः, प्रियाप्रवृत्तिः - दयितावृत्तान्तः, अवगन्तव्या - ज्ञातव्या।

उपेत्येत्यादि। राजा उपेत्य - समीपं गत्वा, प्राह, जलविहङ्गराज - सलिलपक्षिप्रभो, भो हंस - हे राजहंस, त्वम्, तत् - प्रसिद्धं, मानसं - मानसाख्यं, सरः - सरसीं प्रति, पश्चात् - अनन्तरं, गमिष्यसि - यास्यसि, पाथेयं - पथि, मार्गे - साधु, बिसं - मृणालं, भूयः - पुनः, ग्रहणाय - आदानाय, उत्सृज - त्यज, तावत् - इदानीं, दयिताप्रवृत्त्या - प्रियावृत्तान्तकथनेन, शुचः - दुःखात्,
~~~~~~

In Public domain, Digitization Muthulakshmi Research Academy

मां तावदुद्धरशुचोदयिता प्रवृत्त्या
स्वार्थात्सतां गुरुतरा प्रणयिक्रियैव॥ 30॥

यथोन्मुखो विलोकयति मानसोत्सुकेन मया न लक्षिते ति वचनमाह।

[उपविश्य चर्चरी - अरेरे हंसाः किंगो इज्जइ **(अरेरे हंसाः ! किं गोप्यते)।]**

यदि हंसगता न ते नतभ्रूस्सरसो रोधसि दृक्पथं प्रिया मे।
मदखेलपदं कथंनु तस्यास्सकलं चोरगतं त्वया गृहीतम्॥ 31॥

[पुनश्चर्चरी - गइ अणुसारेमइल क्खिज्जइ **(गत्यनुसारेण मया लक्ष्यते)।]**

मामू, उद्धर - रक्ष, कुतः, सतां - सत्पुरुषाणां, प्रणयिक्रिया - सुहृत्कार्यमेव, स्वार्थात् - स्वकार्यादपि, गुरुतरा - अतीवश्रेष्ठा, अयं - राजहंसः, यथा - यस्मात्, उन्मुखः - मदभिमुखस्सन्, विलोकयति - पश्यति, तस्मात्, मानसोत्सुकेन - मानसासक्तेन, मया, न लक्षिता - भवत्प्रिया न प्रेक्षितेति, वचनं - वाक्यम्, आह - वदति किमिति काकुः।

[उपविश्येति। उपविश्य - निषण्णो भूत्वा, चर्चरी - चर्चर्याख्या गीतिः, गीयत इति शेषः, अरेरे हंसाः - हे मानसौकसः, नि॥ ''हंसास्तु श्वेतगरुतश्च क्राङ्गामानसौकस'' इत्यमरः), कोपात् - हंसानां नीचसम्बोधनम्, किं - किमर्थं, गोप्यते - निगूह्यते, ऊर्वशीति शेषः।]

यदीति। हे हंस, नतभ्रूः - कुटिलभ्रूः, मे - मम, प्रिया - दयिता, सरसः - एतस्य कासारस्य, रोधसि - तटे, ते - तव, दृक्पथं - दृष्टिमार्गं, न गता यदि - न प्राप्ता चेत्, हे चोर - तस्कर, कथं - केन प्रकारेण, मदखेल पदं - मदेन खेलं - सलीलं, पदं - पादनिक्षेपो यस्मिन् तत्तथोक्तं, तस्याः - प्रियायाः, सकलं - सम्पूर्णं, गतं - गमनं, त्वया - भवता, गृहीतं - स्वीकृतंनु।

[पुनरिति। पुनः - भूयः, चर्चरी - एतदाख्या गीतिः, गीयते, यथा,

In Public domain. Digitization Muthulakshmi Research Academy

अतश्च -

हंसप्रयच्छमेकान्तां गतिस्तस्यास्त्वयाहृता।
विभावितैकदेशेन देयं यदभियुज्यते॥ 32॥

[पुनश्चर्चरी -

कइपइसिक्खिअएगइलालस।
सापइदिट्ठीजहणभरालस॥
(कुत्र त्वया शिक्षितमेतत् गतिलालस।
सा त्वया दृष्टा जघनभरालसा॥ 33॥)]

(विहस्य) अये! एष चोरानुशासी राजेति भयादुत्पतितः (परिक्रम्य) किमिदानीं प्रियासहायं चक्रवाकं प्रक्ष्यामि।

गत्यनुसारेण - प्रियतमागमनानुकारेण, मया, लक्ष्यते, प्रियादृष्टा त्वयेत्यवश्य-मूह्यते।]

अत इति। अतः - अस्मात्कारणाच्च, हे हंस - राजहंस, मे - मम, कान्तां - दयितामूर्वशीं, प्रयच्छ - देहि, यतः, त्वया, तस्याः - ऊर्वश्याः, गतिः - गमनं, हृता - अपहृता, विभावितैकदेशेन - ज्ञातेनैकदेशेन, यत् - वस्तु, अभि-युज्यते - अभिगृह्यते, विवादास्पदी क्रियत इति यावत्, तद्वस्तु, देयं - दातु-मुचितमेव।

[**पुनरिति।** पुनः - भूयः, चर्चरी - चर्चर्याख्या गीतिर्गीयते, कथम्, हे गतिलालस - ऊर्वशीगमनासक्तहंस, एतत् - गमनं, त्वया - भवता, कुत्र - कस्य सन्निधौ, शिक्षितं - अभ्यस्तं, जघनभरालसा - जघनभरेण - श्रोणीभारेण, अलसा - मन्दगमना, सा - ऊर्वशी, त्वया - भवता, दृष्टा - वीक्षिता वा।]

विहस्येत्यादि। राजा, विहस्य - हासं कृत्वा, ब्रूते। किमिति। अये

In Public domain. Digitization Muthulakshmi Research Academy

[अनन्तरे कुटिलिका -

मम्मररणिअमणोहरए (मन्दघटी) कुसुमि अतरुवरपल्लविए।

चर्चरी -

दइआविरहुम्माइअओ काणणे भमइगइन्दओ ॥

(मर्मररणितमनोहरके कुसुमिततरुवरपल्लविते।
दयिता विरहोन्मादितकः कानने भ्रमति गजेन्द्रकः ॥ 34 ॥)

द्विलयान्तरे चर्चरी -

गोरोअणाकुङ्कुमवण्णाचक्का भण इम।
इमहुवा सरकीळन्तीधणिआणदिट्ठीपइ ॥

(गोरचना कुङ्कुमवर्णचक्र! भण माम्।
मधुवासरे क्रीडन्ती धन्या न दृष्टा त्वया ॥ 35 ॥)]

इत्याश्चर्ये, एष हंसः, चोरानुशासी - तस्करशासनकारी, राजा - पुरूरवाः, इति - एवंविधात्, भयात् - साध्वसात्, उत्पतितः - उत्थितः, इत्युत्प्रेक्ष्य, परिक्रम्य - कियद्दूरं गत्वा, पुनर्ब्रवीति, इदानीमद्य, प्रियासहायं - दयितायुक्तं, चक्रवाकं - कोकपक्षिणं, प्रक्ष्यामि किं - प्रश्नं करिष्यामि किम्, प्रियान्वेषणार्थमिति भावः॥

[अनन्तर इत्यादि। अनन्तरे - तदुत्तरं, कुटिलिका - नाट्यविशेषः, क्रियत इति शेषः, कथम्। मर्मररणितमनोहरके - मर्मरध्वनिमनोज्ञे, मन्दघटी - मन्दघट्याख्यनाट्यविशेषः क्रियते, कथम्। कुसुमिततरुवरपल्लविते - पुष्पपल्लव-सहितश्रेष्ठवृक्षविशिष्टे, चर्चरी - चर्चराख्या गीतिः, गीयते, कथम्। एवंविधे, कानने - अरण्ये, दयिताविरहोन्मादितकः - प्रियाविश्लेषोन्मत्तः, गजेन्द्रकः - कश्चिद्गजराजः, भ्रमति - सञ्चरति, द्विलयान्तरे - लयद्वयमध्ये, चर्चरी - चर्चराख्या गीतिः, गीयते, यथा, गोरचनाकुङ्कुमवर्ण - एतत्तुल्यदेहकान्तिविशिष्ट, हे चक्र -

In Public domain. Digitization Muthulakshmi Research Academy

(उपेत्य)

रथाङ्गनामन्! वियुतो रथाङ्गश्रोणिबिम्बया।
एष त्वां पृच्छति रथी मनोरथशतैर्वृतः॥ 36॥

कथं कः क इत्ययमाह - माम्, अये! तावन्नविदितोऽहमस्य?

सूर्याचन्द्रमसौ यस्य मातामह पितामहौ।
स्वयंवृतः पतिर्द्वाभ्यामूर्वश्या च भुवादयः॥ 37॥

कथं तूष्णीं स्थितः? भवतूपालप्स्येतावदेनम्।

सरसि नलिनीपत्रेणापित्वमावृतविग्रहाम्
ननु सहचरीं दूरे मत्वा विरौषि समुत्सुकः।
इति च भवतो जायास्नेहात्पृथक्स्सतिभीरुता
मयि च विधुरे भावः कान्ताप्रवृत्तिपराङ्मुखः॥ 38॥

~~~~~~

चक्रवाक, मधुवासरे - चैत्रमासदिने, क्रीडन्ती - विहरन्ती, धन्या - पुण्यशीला ऊर्वशी, त्वया - भवता, न दृष्टा - नावलोकिता किं, मां भण - मां प्रति वद।]

उपेत्येति। राजा। उपेत्य - समीपं प्राप्य, प्राह। हे रथाङ्गनामन् - चक्रनामधेय, रथाङ्गश्रोणिबिम्बया - चक्रतुल्यजघनमण्डलया, ऊर्वश्या, वियुतः - वियुक्तः, रथी - रथिकः, एष राजा, मनोरथशतैः - अपरिमिताभिलाषैः - प्रिया स्मरणजनितैरिति भावः, वृतः - युक्तस्सन्, त्वां - भवन्तं, पृच्छति - प्रश्नं करोति, कथमित्यादि, कः क इति - चक्रवाककूजिते, अयं - चक्रवाकः, मां, कथं - केन हेतुना, कःक इति। आह - अप्रसिद्धमिव ब्रवीतीत्यर्थः, अस्य - चक्रवाकस्य, अहं, तावदिदानीं, न विदितः - न ज्ञातः किमू, कःक इति चक्रवाकध्वनिमात्मोद्देशेन प्रयुक्तमिति मत्वा राज्ञ एव मुक्तिः, यस्य - पुरूरवसः, मातामहपितामहौ - मातुःपिता पितुःपिता च, सूर्याचन्द्रमसौ - दिवाकरो
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

सर्वथा मदीयानां भागधेयानां विपर्यासस्य प्रभावप्रकारः। अन्य-मेवावगाहिष्ये (पदान्तरे स्थित्वा) भवतु क्व तावद्गमिष्यामि?

इदं रुणद्धि पद्मं मामन्तः क्वणितषट्पदम्।
मयादष्टाधरं तस्यास्ससीत्कारमिवाननम्।। 39।।

भवत्वस्मिन्नेव कमलाध्यासिनि मधुकरे प्रणयित्वं करिष्ये, इतो-गतस्यानुशयो मा भूदिति।

निशाकरश्च, सू।। ''देवताद्वन्द्वे चे''ति पूर्वपदस्य दीर्घः, यः - पुरूरवाः, ऊर्वश्या - एतन्नाम्न्या देवकान्तया च, भुवा - भूदेव्या चेति, द्वाभ्याम् - उभाभ्यां, पतिः - अधिपतिः, स्वयंवृतः - अनन्यप्रेरणया वरीवृतः, एवंविधोऽहं कथं न विदित इति पूर्वेणानुषङ्गः। कथं - केन हेतुना, तूष्णीं स्थितः - मौनमालम्ब्य वर्तते, चक्रवाक इति शेषः। भवतु - अस्तु, एनं - कोकं, तावदिदानीम्, उपालप्स्ये-उपालम्भं करिष्ये। सरसीति। ननु - चक्रवाक, त्वं, सरसि - अस्मिन्कासारे, आवृतविग्रहाम् - आच्छादितशरीरामपि, सहचरीं - प्रियतमां चक्रवाकीं, नलिनी पत्रेण - पद्मिनीदलेन, तन्मात्रव्यवधानेनेत्यर्थः, दूरे मत्वा - दूरस्थान्निश्चित्य, समुत्सुकः - उत्कण्ठितस्सन्, निरौषि - आक्रन्दनं करोषि, भवतः - तव, जाया स्नेहात् - भार्या प्रेम्णः, पृथक् स्थितिभीरुता - भिन्नस्थानावस्थानभयम्, इति - एवंविधा च वर्तत इति शेषः, विधुरे - प्रियाविरहिते, मयि, भावः - अभिप्रायश्च, कान्ताप्रवृत्तिपराङ्मुखः - प्रियोदन्तकथननिवृत्तः, तवेति शेषः। सर्वथेत्यादि। सर्वथा - सर्वप्रकारैः, मदीयानां - मत्सम्बन्धिनां, भागधेयानां - भाग्यानां, विपर्यासस्य-व्यत्ययस्य, प्रभावप्रकारः - महिमरीतिः, एवमस्तीति वाक्यशेषः, अन्यं - इतरमेव, अवगाहिष्ये - आश्रयिष्ये, इत्युक्त्वा, पदान्तरे - स्थानान्तरे, स्थित्वा - वर्तित्वा, प्राह। भवतु - अस्तु, तावदिदानीं, क्व गमिष्यामि - कुत्र वायास्यामि, अन्तः-

In Public domain. Digitization Muthulakshmi Research Academy

अस्यानन्तरे अर्थद्विचतुरस्करः -

एक्कक्कमवण्णिअगुरुअरपेम्मर
सेनरेहंसजु आणओकीलइकामवसे
(एकक्रमवर्धितगुरुतरप्रेमरसः।
सरसि हंसयुवकः क्रीडति कामवशः।। 40।।)

(चतुरस्रकेणोपविश्य, अञ्जलिं बध्वा)

मधुकर! मदिराक्ष्याश्शंस तस्याः प्रवृत्तिं,
वरतनुरथवा तेनैव दृष्टा प्रिया मे।

~~~~~~

क्वणितषट्पदम् - अन्तरालध्वनद्भ्रमरम्, इदं - पुरोवर्ति, पद्मम् - अरविन्दं, मया, दष्टाधरं - दन्तक्षलोष्ठम्, अत एव, ससीत्कारं - सीत्कारसहितं, तस्याः ऊर्वश्याः, आननं - वदनमिव, मां, रुणद्धि - गतिप्रतिषेधं करोति। भवतु - अस्तु, कमलाध्यासिनि - पद्माधिष्ठिते, अस्मिन् - एतस्मिन्नेव, मधुकरे - षट्पदे, प्रणयित्वं - स्नेहं, करिष्ये - विधास्ये, इतोगतस्य - एवंविधव्यापारविशिष्टस्य, ममेति शेषः, अनुशयः - अनुतावः, मा भूत् - मास्त्विति पूर्वेणान्वयः।

[**अस्येति**। अस्य - ग्रन्थस्य, अनन्तरे - अनुपदम्, अर्थद्विचतुरस्रकः - एतदाख्यनाट्यविशेषप्रवर्तकगीतिकाभेदः, प्रतिपाद्यत इति शेषः। यथा, एकक्रम वर्धितगुरुतरप्रेमरसः - एकक्रमेण - लोकोत्तरक्रमेण, वर्धितः - अभिवृद्धिं प्रापितः, प्रेमरसः - अन्योन्यविषयकस्नेहरसो यस्य सः, हंसयुवकः - कश्चित्तरुणराजहंसः, कामवशः - कामुकस्सन्, सरसि - कासारे, क्रीडति - विहरति, एतल्लक्षणं यथा - अस्यैव चेच्चरणयोरन्तरं स्याद्यदङ्गुलम्। वितस्तिमात्रमथवा नन्द्यावर्तं तदुच्यते।। अस्यैव नन्द्यावर्तमिति द्वितीयं नाम।]

मधुकरेति। हे मधुकर - भ्रमर, मदिराक्ष्याः - मदालसलोचनायाः, तस्याः - ऊर्वश्याः, प्रवृत्तिं - वार्तां, शंस - कथय, अथवा - तथा नोचेत्, वरतनुः
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

यदि सुरभिमवाप्स्यस्तन्मुखोच्छ्वास गन्धं
तव रतिरभविष्यत्पुण्डरीके किमस्मिन्॥ 41॥

साधयामस्तावत् (परिक्रामितकेन) एष नीपस्कन्धनिषण्णहस्तः करिणीसहायो गजराजस्तिष्ठति, अस्मात्प्रियोदन्तं लप्स्ये।

[कुटिलिका - करिणीविरहसन्दादिअओ (मन्दघटी) काणण एगन्धुद्धुअमहुअरओ (करिणीविरहसन्तापितकः ..... कानने गन्धोद्धतमधुकरकः)]

भवतु, न त्वरा कार्या।

- सुन्दराङ्गी, मे - मम, प्रिया - दयिता, ते - तव, न दृष्टा - नावलोकितैव, कुतः, सुरभिं - परिमलयुक्तं, तन्मुखोच्छ्वासगन्धम् - ऊर्वशीवदननिश्श्वासामोदं, यद्यवाप्स्यः - प्राप्नोषि चेत्, अस्मिन् - पुरस्थिते, पुण्डरीके - अरविन्दे, तव, रतिः - आसक्तिः, अभविष्यत् किं - भवेद्वा, न भवेदेवेत्यर्थः, "सू॥ लिङ्निमित्ते लृङ्क्रियातिपत्ताविति लृङ्", साधयाम इति। वयं, तावदिदानीं, साधयामः - गच्छामः, स्थानान्तरमिति शेषः। राजा, परिक्रामितकेन - परिक्रमणाभिनयेन प्राह, नीपस्कन्दनिषण्णहस्तः - कदम्बप्रकाण्डप्रसारितकरः, करिणीसहायः - हस्तिनीसहितः, एषः - अयं, गजराजः - करिराजः, तिष्ठति - वर्तते, अस्मात् - गजराजात्, प्रियोदन्तं - दयितावृत्तान्तं, लप्स्ये - ज्ञास्यामि।

[कुटिलकेति। कुटिलिका - गीतिविशेषः, गीयत इति शेषः, यथा, करिणीविरहसन्तापितकः - हस्तिनीविश्लेषसन्तप्तः, मन्दघटी - एतदाख्यागीतिः, गीयते, यथा, गन्धोद्धतमधुकरकः - मदोन्मत्तद्विरेभः, कानने - वने, सञ्चरतीति शेषः, एतेन भ्रमरेण, राज्ञः, करिण्या ऊर्वश्याश्चौपम्यं गम्यते।]

भवत्वित्यादि। राजा प्राह। भवतु - अस्तु, त्वरा - वेगः, न कार्या - न कर्तव्या, मयेति शेषः। कुतः। अयं - गजराजः, प्रियकरेणुहस्तेन - इष्टकरिणी

In Public domain. Digitization Muthulakshmi Research Academy

अयमचिरोद्गतपल्लवमुपनीतं प्रियकरेणुहस्तेन।
अभिलषति तावदासवसुरभिरसं सल्लकीभङ्गम्।। 42।।

(क्षणमात्रं स्थित्वा)

[(अनन्तरे चर्चरी) -

हजिपजिपुच्छमि आचक्खहिगअवरुललि अपहारेणणासिअतरुअरु।
दूरविणिज्जिअस सहरकन्तीदिट्ठीपि अपजिसम्मुह अन्ती।।

(अहं त्वां पृच्छामि आचक्ष्व गजवरललितप्रहारेण नाशिततरुवर!
दूरविनिर्जितशशधरकान्तिर्दृष्टा प्रिया त्वया सम्मोहयन्ती।। 43।।)]

अयिमदकल! कलभोरूर्गजयूथप! यूथिकाशबलकेशी।
स्थिरयौवनास्थिता ते दूरालोके सुखालोका।। 44।।

~~~~~~

करेण, उपनीतं - सम्प्रापितम्, अचिरोद्गतपल्लवं - नूतनोद्धूतकिसलयम्, आसवसुरभिरसं - मद्यगन्धानुकारिक्षीरं, सल्लकीभङ्गं - सल्लकीनामगजप्रियोलतारूपवृक्षविशेषः, तस्याः भङ्गं - खण्डं, तावदिदानीम्, अभिलषति - इच्छति, अतो न समय इति भावः, ततः, क्षणमात्रम् - ईषत्कालं, स्थित्वा - प्रतीक्ष्य प्राहेत्युत्तरेणान्वयः।

[**अनन्तर इति।** अनन्तरे - ततःपरं, चर्चरी - एतदाख्या गीतिर्गीयते, यथा, ललितप्रहारेण - विलासताडनेनैव, नाशिततरुवर - निपातितमहावृक्ष, हे गजवर - करिश्रेष्ठ, अहं, त्वां - भवन्तं, पृच्छामि - प्रश्नं करोमि, आचक्ष्व - कथय, दूरविनिर्जितशशधरकान्तिः - दूरमत्यन्तं, विनिर्जिता - तिरस्कृता, शशधरस्य - चन्द्रस्य, कान्तिः - शोभा यया सा तथोक्ता, वदनेनेति शेषः, सम्मोहयन्ती - सम्यक् मोहं जनयन्ती, प्रिया - मम दयिता, त्वया - भवता, दृष्टा- वीक्षिता वा।]

अयीति। मदकल - मदसहित, अयिगजयूथप - हे कुञ्जरकुलनाथ,
~~~~~~

 In Public domain, Digitization Mahavidyalaya Research Academy

(सहर्षम्) अनेन भवतास्निग्धमन्द्रेण गर्जितेन प्रियोपलम्भशंसिना समाश्वासितोऽस्मि साधर्म्याच्च मे त्वयि भूयसी प्रीतिः, कथमिव -

मामाहुः पृथिवीभृतामधिपतिं नागाधिराजो भवान्
अव्युच्छिन्नपृथुप्रवृत्तिभवतो दानं ममाप्यर्थिषु।
स्त्रीरत्नेषु ममोर्वशी प्रियतमा, यूधे तवेयं वशा,
सर्वं मामनुते, प्रियाविरहजां त्वं तु व्यथां मानुभूः ।। 45 ।।

कलभोरूः - करिकरोरूः, यूधिकाशबलकेशी - गणिकापुष्पचित्रवर्णालका, नि।। ''गणिकायूधिकाम्बष्ठेत्यमरः'', स्थिरयौवना - उत्कटतारुण्या, सुखालोका - प्रियदर्शना ऊर्वशी, ते - तव, दूरालोके - दूरदृष्टा, स्थिता - वर्तते किम्, इत्युक्त्वा राजा, सहर्षं - सानन्दं यथा तथा पुनर्ब्रूते। किमिति। स्निग्धमन्द्रेण - सान्द्र- गम्भीरेण, प्रियोपलम्भशंसिना - दयिता प्राप्तिसूचकेन, अनेन - एतेन, भवतः - तव, गर्जितेन - बृंहितेन, समाश्वासितः - पुनरुज्जीवितः, अस्मि - भवामि, साधर्म्यात् - सादृश्याच्च, त्वयि विषये, मे - मम, भूयसी - अधिका, प्रीतिः - हर्षः, भवतीति शेषः, कथमिव - साधर्म्यं कथमिति चेत्। मामिति। मां, पृथिवी भृतां - राज्ञाम्, अधिपतिम् - अधीश्वरम्, आहुः - वदन्ति, जना इति शेषः, तथा, भवान्, नागाधिराजः - गजाधिपतिः, अव्युच्छिन्नपृथुप्रवृत्ति - अव्युच्छिन्नानिरन्तरा, पृथुः - अधिकाप्रवृत्तिः - स्रवणं यस्य तत्तथोक्तं, भवतः - तव, दानं - मदजलम्, अस्तीति शेषः, अर्थिषु - याचकजनेषु विषये, ममापि, दानम् - अर्थादिवितरणं, नि।। ''दानं गजमदे त्याग इति पक्षद्वयेप्यमरः'', वर्तत इति शेषः, स्त्रीरत्नेषु - युवतिश्रेष्ठेषु मध्ये, मम, ऊर्वशी नाम देवकान्ता, प्रियतमा - अत्यन्त प्रिया, यूधे - गजबृन्दे, इयम् - एषा, वशा - करिणी, नि ।। ''करिणी धेनुकावशेत्यमरः'', तव। प्रियतमा। अतएव। ते - तव, सर्वं - समस्तं, मामनु - मामनुसृत्य वर्तते, किन्तु, त्वं, प्रियाविरहजां - वनिताविश्लेषजनितां, व्यथां -

सुखमास्तां भवान्, साधयामस्तावत् (पार्श्वतो दृष्टिं दत्वा) **अयं सुरभिकन्दरो नाम विशेषरमणीयस्सानुमान्, रमणीयप्रियाश्चाप्सरसः, अपि नामसुतनुरस्योपत्यकायामुपलभ्येत** (परिक्रम्यावलोक्य च) **हन्त मदीयैर्दुरित-परिणामैर्मेघोऽपि शतह्रदा शून्यस्संवृत्तः, तथापि शिलोच्चयमपृष्ट्वैव न निवर्तिष्ये।**

[(अनन्तरे खण्डिका) -

खरखुरदारिअमेइणि ओवणगहणे अवि अल्लु,
परिसप्पइपेच्छहलीणोणि अकज्जुज्जुअकोल्लु
(खरखुरदारितमेदिनी को वनगहनेऽविचलः,
परिसर्पति पश्यत लीनो निजकार्योद्युक्तः कोलः ।। 46 ।।)]

~~~~~~

पीडां, मानुभूः - न प्राप्नुहि, भवान्, सुखं - ससन्तोषं, यथातथा, आस्तां - तिष्ठतु, वयं, तावदिदानीं, साधयामः - गच्छामः, पार्श्वतः - पक्षभागे, दृष्टिं दत्वा - वीक्ष्य, वक्ति, विशेषरमणीयः - अतीवकमनीयः, अयं - पुरोवर्ती, सानुमान् - पर्वतः, सुरभिकन्दरो नाम - सुरभिकन्दरनामकः, अप्सरसः - स्वर्वेश्याश्च, रमणीयप्रियाः - रमणीयेषु - रम्यवस्तुषु, प्रियाः - प्रीतियुक्ताः, सुतनुः - ऊर्वशी, अस्य - पर्वतस्य, उपत्यकायाम् - आसन्नभूमौ, नि।। ''उपत्यकाद्रेरासन्ना भूमिरित्यमरः'', अपि नामोपलभ्येत - दृष्टा भवेत्किम्, परिक्रम्य - किञ्चिद्गत्वा, अवलोक्य - दृष्ट्वा च, प्राह, मेघः - जलदोऽपि, मदीयैः - मत्सम्बन्धिभिः, दुरितपरिणामैः - दुष्कृतपरिपाकैः, शतह्रदाशून्यः - विद्युद्रहितः, संवृत्तः - जातः, हन्तेति विषादे, तथापि - प्रियाया अदर्शनेऽपि, शिलोच्चयं - पर्वतम्, अपृष्ट्वा - प्रश्नमकृत्वा, न निवर्तिष्ये - न पुनर्गमिष्याम्येव।

[अनन्तर इति। अनन्तरे - तदुत्तरं, खण्डिका - खण्डिकाख्यो राग-विशेषः, गीयत इति शेषः। यथा, खरखुरदारितमेदिनीकः - तीक्ष्णखुरविदलित
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

अपि वनान्तरमल्पकुचान्तराश्रयति पर्वत! पर्वसुसन्नता!
इदमनङ्गपरिग्रहमङ्गनापृथुनितम्ब! नितम्बवती तव ॥ 47 ॥

कथं तूष्णीमास्ते? विप्रकर्षान्न शृणोतीति शङ्के। भवतु, समीपमस्य गत्वा पुनरेनमेव पृच्छामि।

[(अनन्तरे चर्चरी) -

फलिअसिलाअलणिम्मलणिज्झरुबहुविअ कुसुमेविरअसेअरु।
किण्णरमहुरुग्गीअमणोहरुदेक्खावहिमहुपिअअमम हिअरु ॥

भूभागः, निजकार्योद्युक्तः - स्वप्रयोजनासक्तः, अविचलः - चलनरहितः, कोलः - कश्चिद्वराहः, वनगहने - सान्द्रारण्ये, लीनः - गूढस्सन्, परिसर्पति - सर्वतश्चरति, पश्यत - प्रेक्षध्वम् ।]

अपि वनान्तरमित्यादि। पृथुनितम्ब - विशालकटकप्रदेश, हे पर्वत - सुरभिकन्दराख्यशैल, अल्पकुचान्तरा - सूक्ष्मस्तनमध्यप्रदेशा, पर्वसु - सन्धिप्रदेशेषु, सन्नता - नम्रा, नितम्बवती - प्रशस्तश्रोणिप्रदेशा, अङ्गना - ऊर्वशी, अनङ्गपरिग्रहं - मन्मथग्रहणार्हं, पुष्पफलभरितत्वादिति भावः, इदं - पुरोवर्ति, तव, वनान्तरं - काननमध्यप्रदेशं, शयत्यपि - अधिवसति किम्, एवं पृष्टोपि, कथं - केन वा कारणेन, तूष्णीमास्ते - प्रतिवाक्यं न ददाति, विप्रकर्षात् - दूरस्थत्वात्, न शृणोति - नाकर्णयतीति, शङ्के - तर्कयामि, भवतु - अस्तु, अस्य - नगस्य, समीपं गत्वा - निकटं प्राप्य, पुनः - भूयः, एनं - शैलमेव, पृच्छामि - प्रश्नं करोमि।

[**अनन्तर इति।** अनन्तरे - ततःपरं, चर्चरी - एतदाख्या गीतिः, गीयत इति शेषः, यथा, स्फटिकशिलातलनिर्मलनिर्झरस्फटिकमयेषु, शिलातलेषु - प्रस्तरप्रदेशेषु, निर्मलाः - स्वच्छाः, निर्झराः - प्रवाहः यस्मिन् स तथोक्तः तस्य

In Public domain. Digitization Muthulakshmi Research Academy

(स्फटिकशिलातलनिर्मलनिर्झरबहुविधकुसुमैर्विरचितशेखर
किन्नरमधुरोद्गीतमनोहर दर्शय मम प्रियतमां महीधर!॥ 48 ॥]

(परिक्रम्य)

सर्वक्षितिभृतां नाथ! दृष्टा सर्वाङ्गसुन्दरी।
रामा रम्येवनोद्देशे त्वया विरहिता मया?॥ 49 ॥

(तदेवाकर्ण्य, सहर्षम्) **कथं यथाक्रमं दृष्टेत्याह, भवतु, भवानेतच्छृणोतु, क्व तर्हि मे प्रियतमा?** (आकर्ण्य) **यथाक्रममेतदाह!** (विभाव्य) **अहो! धिङ्ममैवायं कन्दरमुखविसर्पीप्रतिशब्दः** (विषादं रूपयति) **श्रान्तोऽस्मि, अस्यास्तावद्गिरिनद्यास्तीरेस्थितस्तरङ्गमारुतमासेविष्ये।** (तथा कृत्वा) **इमां नवाम्बुकलुषां स्रोतोवहां पश्यतो मे रमते मनः। कुतः -**

~~~~~~

सम्बुद्धिः, बहुविधकुसुमैः - नानाविधपुष्पैः, विरचितशेखर - अलंकृतशिखरप्रदेश, किन्नरमधुरोद्गीतमनोहर - किन्नराणां - देवयोनिविशेषाणां - मधुरैः - श्राव्यैः, उद्गीतैः - तारतरगानैः, मनोहर - रम्यप्रदेश, महीधर - हे पर्वत, मम, प्रियतमां - प्रेयसीं, दर्शय - प्रकाशय।]

परिक्रम्येत्यादि। राजा। परिक्रम्य - किञ्चिद्गत्वा, प्राह, सर्वक्षितिभृतां - समस्तपर्वतानां, नाथ - अधिपते हे पर्वत, त्वया - मया, विरहिता - वियुक्ता, सर्वाङ्गसुन्दरी - सर्वावयवलावण्या, रामा - ऊर्वशी, रम्ये - रमणीये, वनोद्देशे - विपिनप्रदेशे, तवेति शेषः, दृष्टा - वीक्षिता किम्, इत्युक्त्वनन्तरं, तदेवाकर्ण्य - तद्वाक्यमेवाचलाच्छ्रुत्वा, तद्वाक्यस्य, हे सर्वक्षितिभृतां नाथ - राजाधिराज, मया - त्वया, विरहिता - वियुक्ता, सर्वाङ्गसुन्दरी - सर्वावयवलावण्या, रामा - ऊर्वशी, रम्ये - रमणीये, वनोद्देशे - विपिनप्रदेशे, ममेति शेषः, दृष्टा - वीक्षिता, इत्येवमर्थमनुसन्धाय, सहर्षं - ससन्तोषं यथातथा, प्राह, कथं - केन वा
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

तरङ्गभ्रूभङ्गाक्षुभितविहगश्रेणिरशना,
विकर्षन्ती फेनं वसनमिवसं रम्भशिथिलम्।
यथाविद्धं यान्ती स्खलितमभिसन्धाय बहुशो
नदीभावेनेयं ध्रुवमसहमानापरिणता ।। 50 ।।

भवतु, प्रसादयामि तावदेनाम्।

~~~~~~

कारणेन, यथाक्रमं - मदुक्तक्रमेणैव, दृष्टा - वीक्षितेत्याह, ब्रवीति, भवतु - अस्तु, एनं पृच्छामीति वाक्यशेषः, भवान्, एतत् - मद्वाक्यं, शृणोतु - आकर्णयतु, सू।। "शेषे प्रथम इति प्रथमपुरुषः", मे - मम, प्रियतमा - ऊर्वशी, तर्हि - भवता दृष्टा चेत्, क्व - कुत्र प्रदेशे, वर्तत इति शेषः, आकर्ण्य - क्व तर्हि मे प्रियतमेति वाक्यं शृत्वा, प्राह। यथाक्रमं - क्रममनतिक्रम्य, एतत् - मदुक्तमेव, आह - वक्ति, शैल इति शेषः, इत्युक्त्वा, विभाव्य - पर्यालोच्य, ब्रूते, किमिति। अयं - पर्वताच्छ्रूयमाणश्शब्दः, कन्दरमुखविसर्पी - गुहाद्वारव्यापी, ममैव, प्रतिशब्दः - प्रतिध्वनिः, अहो इत्याश्चर्ये, धिगिति निर्भर्त्सने, इति कथयन्, विषादम् - ऊर्वशीदर्शनाभावप्रयुक्तभेदं, रूपयति - अभिनयति, राजा पुनर्ब्रूते, शान्तोऽस्मि - अध्वगमनात्खिन्नो भवामि, तावत् - शमापनयनपर्यन्तम्, अस्याः - पुरस्स्थितायाः, गिरिनद्याः - पर्वतसरितः, तीरे - तटे, स्थितः - निविष्टस्सन्, तरङ्गमारुतं - वीचीपवनम्, आसेविष्ये - भजिष्ये, तथा- तेन प्रकारेण, कृत्वा - तरङ्गपवनं सेवित्वा, ब्रवीति। नवाम्बुकलुषां - नूतनजला विलां, नि।। "कलुषोऽनच्छ आविल इत्यमरः", इमाम् - एताम्, स्रोतोवहां - शैलधुनीं, पश्यतः - विलोकयतः, मे - मम, मनः - चेतः, रमते - क्रीडते, मोदत इत्यर्थः, कुतः - कस्मादिति चेत्, तरङ्गेत्यादि, तरङ्गभ्रूभङ्गा - तरङ्गः - ऊर्मिरिव, भ्रूभङ्गः - भ्रुकुटिः यस्यास्सा तथोक्ता, क्षुभितविहगश्रेणिरशना - क्षुभिताश्चलिताः, विहगानां - हंसादिपक्षिणां, श्रेणयः - पंक्तय एव, रशना - काञ्चीयस्यास्सा तथोक्ता, संरम्भशिथिलं - संरम्भेण
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

[पसिअपि अअ मसुन्दरिएणए, खुहिअकरुणविहङ्गमएणए।
सुरसरितीरसमूनुअएणए, अलिउलझुङ्कारिअएणए।।
(प्रसीद प्रियतमे सुन्दरिके नदि! क्षुभितकरुणविहङ्गमकेनत्या।
सुरसरित्तीरसमुत्सुकैणके अलिकुलझङ्कारिते एनया।। 51।।

तेन कुटिलिकान्तरे चर्चरी)

पुव्वदिसापवणाह अकल्लोलुग्गअबाहुओ
मेहहङ्गेणच्च इसललि अंजलणिहिणाहओ।
हंसरहङ्गसङ्खकुङ्कुमकआभरणु
करिमअराउलकसणकमलक आवरणु।।
वेलासलिलुव्वेल्लि अहत्थदिण्णतालु।
ओत्थरइदसदि सरुन्धेइणवमेह अलु।।

पूर्वदिक्पवनाहतकल्लोलोद्गतबाहुको
मेघाङ्गैर्नृत्यति सललितं जलनिधिनाथकः।

- सम्भ्रमेण, शिथिलं - विगलितं, वसनम् - अंशुकमिव, फेनं - डिण्डीरं, विकर्षन्ती - सम्यक्कुर्वन्ती, बहुशः - बहुप्रकारेण, स्खलितं - चलितं यथातथा, अभिसन्धाय - मधुरवाचमुक्त्वा, यथाविद्धं - कुटिलं यथातथा, यान्ती - गच्छन्ती, असहमाना - कोपशीला, इयम् - ऊर्वशी, नदीभावेन - नदीत्वेन, परिणता - परिणामं गता, नदीरूपं प्राप्तेत्यर्थः, ध्रुवम् - एष निश्चयः, भवतु - अस्तु, एनामूर्वशीं, तावदिदानीं, प्रसादयामि - प्रसन्नां करोमि।

[**पसिएत्यादि**। प्रियतमे - सुन्दरिके, नदि - प्राप्तनदीरूपे हे प्रेयसि, एनया - अमुया, नत्या - पादपतनेन, प्रसीद - प्रसन्ना भव, नदी कथम्भूता, क्षुभितकरुणविहङ्गमके - क्षुभिताः - चलिताः, करुणाः - दीनाः, विहङ्गमकाः -

In Public domain. Digitization Muthulakshmi Research Academy

हंसरथाङ्ग शङ्खकुङ्कुमकृताभरणः
करिमकराकुलकृष्णकमलकृतावरणः ॥
वेलासलिलोद्वेल्लितहस्तदत्ततालः
अवस्तृणातिदशदिशोरुद्ध्वा नवमेघकालः ॥ 52 ॥]

(अञ्जलिं बद्ध्वा) -

त्वयि निबद्धरतः प्रियवादिनः प्रणयभङ्गपराङ्मुखचेतसः।
कमपराधवलं मम शङ्कसे त्यजसि मानिनि दासजनं यतः ॥ 53 ॥

~~~~~~

जलपक्षिणो यस्यां सा तथोक्ता, तस्यास्सम्बुद्धिः, सुरसरित्तीरसमुत्सुकैणके - सुरसरितो - गङ्गायाः, तीरे - तटे, समुत्सुकाः - आसक्ताः, तत्रत्या इति यावत्, एणकाः - हरिणाः, यस्यां सा तथोक्ता, तस्यास्सम्बुद्धिः, अलिकुलझङ्कारिते - षट्पदसमूहनादिते, हे नदि - प्रसीदेत्यन्वयः, पूर्वदिगित्यादि। पूर्वदिक्पवनाहत-कल्लोलोद्गतबाहुकः, पूर्वदिक्पवनेन - प्राग्दिग्भवनेन वायुना, आहतः - विक्षिप्तः, कल्लोलः - तरङ्ग एव, उद्गतः - प्रासारतः, बाहुः - भुजो येन स तथोक्तः, हंस रथाङ्गशङ्खकुङ्कुमकृताभरणः - हंसैः - चक्राङ्गैः, रथाङ्गैः - चक्रवाकैः, शङ्खैः - कम्बुभिः, कुङ्कुमेन च, कृताभरणः - रचितालङ्कारः, वेलासलिलोद्वेल्लितहस्तदत्त-तालः - वेलासलिलानां - कूलजलानाम्, उद्वेल्लितम् - उल्लुण्ठनमेव, हस्तदत्तं - कराप्सितं, तालं - नाट्याङ्गविशेषो यस्य स तथोक्तः, जलनिधिनाथकः - समुद्र-राजः, मेघाङ्गैः - जलधरोपरितणैः, सललितं - सलिलासं यथातथा, नृत्यति - नटति, नवमेघकालः - नूतनजलदसमयः, दशदिशः - दशसंख्याकाहतः, रुद्ध्वा - आक्रम्य, अवस्तृणाति - आच्छादयति च।]

अञ्जलिमित्यादि। राजा अञ्जलिं बद्ध्वा - करौ सम्पुटीकृत्य, प्राह। त्वयि, निबद्धरतेः - गाढानुरक्तस्य, प्रियवादिनः - मनोहरभाषिणः, प्रणयभङ्ग-
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

(विचिन्त्य) **अथवा परमार्थतस्सरिदेवेयम्, नोर्वशी, पुरूरवसमपहाय कथमन्यथा समुद्राभिसारिणी भविष्यति, भवतु, अनिर्वेदप्राप्याणि श्रेयांसि, यावत्तमेव प्रदेशं गच्छामि यत्र मे नयनयोस्सुवदना तिरोभूता।**

(परिक्रम्य, विभाव्य) **दृष्टमुपलक्षणं तस्य मार्गस्य -**

रक्तकदम्बस्सोयं प्रियया घर्मान्तशंसियस्यैकम्।
कुसुममसमग्रकेसरविषममपिकृतं शिखाभरणम्॥ 54॥

पराङ्मुखचेतसः - प्रणयस्य - सौहृदस्य, भङ्गे - विच्छेदे, पराङ्मुखं - विमुखं, चेतः - चित्तं यस्य तस्य, मम, कं - कीदृशम्, अपराधलवं - दोषलेशं, शङ्कसे - वितर्कयसि, हे मानिनि - ऊर्वशि, यतः - यस्मात्, दासजनं - भृत्यजनं, त्यजसि - विजहासि, इत्युक्त्वा, विचिन्त्य - पर्यालोच्य, अथवा - तथा नोचेत्, परमार्थतः - तत्त्वतः, इयं - परिदृश्यमाना, सरित् - नद्येव, नोर्वशी - ऊर्वशी न भवति, अन्यथा - ऊर्वश्येव यदि, पुरूरवसम् - एतदाख्यं राजानम्, अपहाय - त्यक्त्वा, समुद्राभिसारिणी - सागरगामिनी, कथं - केन वा हेतुना, भविष्यति - सम्पत्स्यते, भवतु - अस्तु नाम, श्रेयांसि - सम्पदः, अनिर्वेदप्राप्याणि - उत्साहसाध्यानि, तस्मात्, तमेवप्रदेशं - तत्स्थानमेव, यावद्गच्छामि - गमिष्यामि, यत्र - प्रदेशे, मे - मम, नयनयोः - चक्षुषोः, सुवदना - सुन्दरानना ऊर्वशी, तिरोभूता - अन्तर्हिता, अभूदिति शेषः।

परिक्रम्येत्यादि। राजा परिक्रम्य - किञ्चिद्गत्वा, विभाव्य - सम्यगालोच्य, प्राह, तस्य - ऊर्वशीसम्बन्धिनः, मार्गस्य - पथः, उपलक्षणम् - अभिज्ञानं, दृष्टं - वीक्षितम्, अयं - पुरोवर्ती, रक्तकदम्बः - रक्तवर्णोनीपवृक्षः, सः - स एव, यस्य - वृक्षस्य, घर्मान्तशंसि - वर्षागमसूचकम्, असमग्रकेसरविषमम् - असम्पूर्ण- किञ्जल्कासममपि, एकम्, कुसुमं - पुष्पं, प्रियया - दयितया ऊर्वश्या, शिखा-

In Public domain. Digitization Muthulakshmi Research Academy

अमुं तावत्प्रियावृत्तान्ताय सारङ्गमासीनमभ्यर्थयिष्ये।

अभिनवकुसुमस्तबकिततरुवरस्य परिसरे
मदकलकोकिलकूजितमधुपझङ्कारमनोहरे
नन्दनविपिने निजकरिणीविरहानलेन सन्तप्तो
विचरति गजाधिपतिरैरावतनामा ।। 55 ।। (गलितकः)

कृष्णसारच्छविर्योऽसौ दृश्यते काननश्रिया।
घनकालावलोकाय कटाक्ष इव पातितः ।। 56 ।।

भरणं - शिरोभूषणं, कृतं - रचितं, तावदिदानीम्, आसीनम् - उपविष्टम्, अमुं - परिदृश्यमानं, सारङ्गं - हरिणं, प्रियावृत्तान्ताय - प्रेयसीवार्तां ज्ञातुम्, अभ्यर्थयिषे - याचिष्ये।

[**अभिनवेति।** मदकलकोकिलकूजितमधुपझङ्कारमनोहरे - मदेन - हर्षेण, कलम् - अव्यक्तमधुरं, यत्कोकिलानां - परभृतानां, कूजितं - ध्वनितं, तेन मधुपानां - भ्रमराणां, यो झङ्कारः - ध्वनिविशेषः, तेन च मनोहरे - रम्ये, नन्दन-विपिने - नन्दनाख्यवने, अभिनवकुसुमस्तबकिततरुवरस्य - अभिनवैर्नूतनैः, कुसुमैः - पुष्पैः, स्तबकितस्य - सञ्जातगुच्छकस्य, तरुवरस्य - वृक्षश्रेष्ठस्य, परिसरे - निकटे, ऐरावतनामा - ऐरावताख्यः, गजाधिपतिः - करिराजः, निज करिणीविरहानलेन - स्वकीयवशावियोगाग्निना, नि ।। "करिणीधेनुकावशेत्यमरः", सन्तप्तः - तापयुक्तस्सन्, विचरति - सञ्चरति। (गलितकः - एतन्नामको नाट्य विशेषः)]

कृष्णेति। काननश्रिया - वनलक्ष्म्या, घनकालावलोकाय - प्रावृट्काल-विलोकनाय, पातितः - प्रसारितः, कटाक्षः - अपाङ्गावलोक इव स्थितः,

In Public domain. Digitization Muthulakshmi Research Academy

(उपसृत्य) किन्नु खलु मामवधीरयन्निव अन्यतो मुखस्संवृत्तः

स्वस्यान्तिकमायान्ती शिशुनास्तनपायिना मुगीरुद्धा।
तामयमनन्यद्दृष्टिर्भुग्नग्रीवो विलोकयति ।। 57 ।।

[चर्चरी -

सुरसुन्दरीजहणभरालसपीणुत्तुङ्गघण-
त्थणी त्थिरजोव्वण तणुसरीरिहंसगइ।
गआणुज्जलकाणणेमि अलोअणिभमन्ते
दिट्ठपञि तह विरहसमुद्धन्तरे उत्तरहिमहु ।।

(सुरसुन्दरीजघनभरालसापीनोत्तुङ्गघन-
स्तनी स्थिरयौवना तनुशरीरा हंसगतिः।

योऽसौ - योऽयं, कृष्णसारच्छविः - नीलचित्रवर्णो हरिणः, दृश्यते - वीक्ष्यते, तं सारङ्गमभ्यर्थयिष्य इति पूर्वेणान्वयः।

उपसृत्येत्यादि। राजा उपसृत्य - मृगसमीपं प्राप्य, प्राह, किन्नुखलु - कस्माद्वा हेतोः, माम्, अवधीरयन् - निराकुर्वन्निव, अन्यतो मुखः - अन्यत्र दत्त दृष्टिः, संवृत्तः - जातः, मृग इति शेषः, स्वस्य - आत्मनः, अन्तिकं - समीपं, आयान्ती - आगच्छन्ती, मृगी - हरिणी, स्तनपायिना - स्तन्यं पिबता, शिशुना-शाबकेन, रुद्धा - प्रतिबद्धा, तां - मृगीम्, अयं - सारङ्गः, अनन्यदृष्टिः - अनितरवीक्षणः, भुग्नग्रीवः - परावृत्तकन्धरस्सन्, विलोकयति - पश्यति, अतो मां न पश्यतीति भावः।

[चर्चरीति। नेपथ्ये चर्चरी गीतिर्गीयते। यथा। जघनभरालसा - श्रोणी-भारेण मन्दगमना, पीनोत्तुङ्गघनस्तनी - पीवरोन्नतनिरन्तरपयोधरा, स्थिरयौवना-स्थिरतारुण्या, तनुशरीरा - तन्वङ्गी, हंसगतिः - चक्राङ्गगमना, मृगलोचना -

In Public domain. Digitization Muthulakshmi Research Academy

गगनोज्ज्वलकानने मृगलोचनाभ्रमन्ती दृष्टा
त्वया तद्विरहसमुद्रान्तरादुत्तारय माम् ।। 58 ।।)]

हंहो हरिणयूथपते -

अपि दृष्टवानसि मम प्रियां वने
कथयामि ते तदुपलक्षणं शृणु।
पृथुलोचना सहचरी यथैव ते
सुभगं तथैव खलु सापि वीक्षते ।। 59 ।।

कथमनादृत्य मद्वचनं कान्ताभिमुखं प्रस्थितः, उपपद्यते, परिभवास्पदं हि दशाविपर्ययः, सुखमास्तां भवान्, इतो वयम् ।

कुरङ्गनयना, सुरसुन्दरी - देवकान्ता ऊर्वशी, गगनोज्ज्वलकानने - गगनवदाकाशवत्, उज्ज्वले - भासमाने, कानने - अरण्ये, भ्रमन्ती - सञ्चरन्ती, हे सारङ्ग, त्वया, दृष्टा - वीक्षिता किम्, तद्विरहसमुद्रान्तरात् - ऊर्वशीवियोगसागरमध्यात्, माम्, उत्तारय - पारगतं कुरु ।]

हंहो हरिणयूथपते - हे कुरङ्गकुलनाथ, त्वं, वने - कानने, मम, प्रियां-दयितां, दृष्टवानस्यपि - विलोकयसि किम्, ते - तुभ्यं, तदुपलक्षणं - तस्याः - ऊर्वश्याः, उपलक्षणं - चिह्नं, कथयामि - वच्मि, शृणु - आकर्णय, पृथुलोचना - विशालनयना, ते - तव, सहचरि - सहचारिणी मृगी, सुभगं - सविलासं यथा तथा, यथा - येन प्रकारेणैव, वीक्षते - पश्यति, सा - मत्प्रियापि, तथा - तेन प्रकारेणैव, वीक्षते - विलोकयति, कथं - कस्माद्धेतोः, मद्वचनं - मद्वाक्यम्, अनादृत्य - तिरस्कृत्य, कान्ताभिमुखं - प्रियाभिमुखं, प्रस्थितः - प्रयातः, मृग इति शेषः, उपपद्यते - युज्यते, यानं - युक्तमेवेत्यर्थः, कुतः, दशाविपर्ययः - अवस्था व्यत्यासः, परिभवास्पदम् - अनादरणकारणं हि, हे मृग - भवान्, सुखं - स्वास्थ्येन, आस्तां - वर्तताम्, वयम्, इतः - अनेन मार्गेण गच्छाम इति शेषः ।

In Public domain. Digitization Muthulakshmi Research Academy

(परिक्रामितकेन अवलोक्य) अये! शिलाभेदान्तरगतं नितान्त-रक्तं किमेतदालक्ष्यते?

प्रभालेपी नायं हरिहतमृगस्यामिषलवः
स्फुलिङ्गस्स्यादग्नेर्गहनमभिवृष्टं पुनरिदम्। (विभाव्य)
अये रक्ताशोकस्तबकसमरागो मणिरयं,
यमुद्धर्तुं पूषा व्यवसित इव व्यापृतकरः॥ 60॥

अहो! हरति मे मनः, आदास्ये तावदेनम्।

[पणइणिबद्धासा इअओ बाहाउलणिअणअणओ।
गअवइग हणेदुहिअओपरिभमइकिलामिअवअणओ॥

परिक्रामितकेनेति। राजा परिक्रामितकेन - परिक्रान्त्यभिनयेन, परिक्रान्तिर्नाम किञ्चिद्दूरं गमनम्, अवलोक्य - वीक्ष्य, प्राह, शिलाभेदान्तरगतं - शिलाद्वयमध्यभागस्थितं, नितान्तरक्तम् - अत्यन्तलोहितम्, एतत् - इदं, किं - किं वा, आलक्ष्यते - दृश्यते, अये - आश्चर्यम्, प्रभेति। प्रभालेपी - प्रभापुञ्जपरिव्याप्त इत्यर्थः, अयं - पुरोवर्ती, हरिहतमृगस्य - हरिणा - सिंहेन, हतस्य - विदारितस्य, मृगस्य - आरण्यकमृगस्य, आमिषलवः - मांसखण्डः, न - न भवति, तथा नोचेत्, अग्नेः - वह्नेः, स्फुलिङ्गः - स्थूलकणः, स्यात् - भवेत्किम्, इदम् - एतत्, गहनं पुनः - वनं तु, अभिवृष्टम् - अद्यैव वर्षधारासिक्तम्, अतस्स्फुलिङ्गोऽपि न भवतीति भावः, विभाव्य - सम्यगालोच्य, राजा पुनःप्राह, किमिति। अयं - परिदृश्यमानः, रक्ताशोकस्तबकसमरागः - लोहिताशोकसुममञ्जरीसदृशद्युतिः, मणिः - रत्नं, यं - मणिम्, उद्धर्तुं - ग्रहीतुं, पूषा - सूर्यः, व्यापृतकरः - प्रसारितकिरणस्सन्, व्यवसितः - उद्युक्त इवस्थितः, अये - आश्चर्यम्, मे - मम, मनः - चेतः, हरति - आकर्षति, अहो - चित्रम्, तावदिदानीम्, एनं - मणिम्, आदास्ये - स्वीकरिष्ये।

In Public domain. Digitization Muthulakshmi Research Academy

(द्विपदिकयोपसृत्य)

(प्रणयिनी बद्धाशार्दितको बाष्पाकुलनिजनयनकः।
गजपतिर्गहने दुःखितकः परिभ्रमति क्लान्तवदनकः॥ 61॥]

अथवा -

मन्दारपुष्पैरधिवासितायां यस्याश्शिखायामयमर्पणीयः।
सैव प्रिया सम्प्रतिदुर्लभा मे किमेनमस्रोपहतं करोमि॥ 62॥

(नेपथ्ये) **वत्स! गृह्यतां गृह्यताम् -**

सङ्गमनीय इति मणिश्शैलसुताचरणरागयोनिरयम्।
आवहति धार्यमाणस्सङ्गममचिरात्प्रियजनेन॥ 63॥

~~~~~~

[**पणइतीति**। प्रणयिनीबद्धाशार्दितकः - प्रणयिन्यां - प्रियतमायां, बद्धया - दृढनिक्षिप्तया, आशया - अतितृष्णया, आर्दितकः - पीडितः, बाष्पाकुलनिजनयनकः - नेत्रजलविशिष्टस्वकीयलोचनः, क्लान्तवदनकः - म्लानाननः, गजपतिः - करिराजः, गहने - वने, दुःखितकः - व्यथितस्सन्, परिभ्रमति - विचरति, द्विपदिकया - अनया गीत्या, उपसृत्य - समीपं प्राप्य, ब्रूते।

अथवेत्यादि। अथवा - तथा नोचेत्, अयम् - एषमणिः, मन्दारपुष्पैः - देवतरुविशेषप्रसूनैः, अधिवासितायां - सुरभीकृतायां, यस्याः - ऊर्वश्याः, शिखायां - केशपाशे, अर्पणीयः - आभरणत्वेन स्थापनीयः, सम्प्रति - इदानीं, सा प्रिया- ऊर्वश्येव, मे - मम, दुर्लभा - प्राप्तुमशक्या, एनं - मणिं, किं - किमर्थम्, अस्रोपहतम् - अश्रुदूषितं, करोमि - विदधामीति काकुः, न करोम्येवेत्यर्थः।

नेपथ्य इत्यादि। नेपथ्ये - यवनिकाभ्यन्तरे, किञ्चिद्वाक्यं निर्गतं, यथा, हे वत्स - बाल, गृह्यतां - स्वीक्रियतां, त्वया मणिरिति पदद्वमध्याहार्यम्, आदराद् द्विरुक्तिः, शैलसुताचरणरागयोनिः - उमाचरणपङ्कजलाक्षारसज्ञातः, अयं - पुरोवर्ती,
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

राजा - (कर्णं दत्वा) **कोनु खलु मामेवमनुशास्ति**? (दिशोऽवलोक्य) **अनुकम्पते मां भगवान् मृगचर्मधारी, भगवन्**! **अनुगृहीतोऽस्मि**।

(मणिमादाय) **अयि सङ्गमनीय**!

तया वियुक्तस्य वने सुमध्यया
भविष्यसि त्वं यदि सङ्गमाय मे।
ततः करिष्यामि भवन्तमात्मन-
शिशखामणिं बालमिवेन्दुमीश्वरः॥ 64॥

सङ्गमनीय इति मणिः - एतदाख्यं रत्नं, धार्यमाणः - अलंक्रियमाणः, अचिरात्-आशु, प्रियजनेन - इष्टजनेन, सङ्गमम् - समावेशम्, आवहति - सम्पादयति, तस्मान्न परित्याज्य इति भावः।

राजेति। राजा - पुरूरवाः, कर्णं दत्वा - वत्सेत्यादि नेपथ्योक्तवाक्यं श्रुत्वा, प्राह, कोनु खलु - को वा पुरुषः, एवम् - अनेन प्रकारेण, माम्, अनुशास्ति - नियोजयति, दिशः - आशाः, अवलोक्य - प्रेक्ष्य, पुनराह, भगवान् - षड्गुणैश्वर्यसम्पन्नः, मृगचर्मधारी - व्याघ्रचर्मचेलः परमेश्वरः, माम्, अनुकम्पते - अनुगृह्णाति, हे भगवन् - स्वामिन्, अनुगृहीतः - अभ्युपपन्नः, अस्मि - भवामि, त्वयेत्यध्याहारः।

मणिमादायेत्यादि। इत्युक्त्वा, मणिं - रत्नम्, आदाय - स्वीकृत्य, प्राह, अयि सङ्गमनीय - हे सङ्गमनीयाख्यमणे, वने - कानने, सुमध्यया - सुन्दरमध्यमया, तया - ऊर्वश्या, वियुक्तस्य - विरहितस्य, मे - मम, सङ्गमाय - संयोगाय, त्वं, भविष्यसि यदि - सम्पत्स्यसे चेत्, ततस्तर्हि, ईश्वरः - शङ्करः, बालमिव - रेखामात्रम्, इन्दुं - चन्द्रमिव, भवन्तं - त्वाम्, आत्मनः - स्वस्य, शिखामणिं - चूडारत्नं, करिष्यामि - विधास्यामि।

In Public domain. Digitization Muthulakshmi Research Academy

(परिक्रम्यावलोक्य च) अये किन्नु खलु कुसुमरहितामपि लतामिमां पश्यतो मे रतिरुपलब्धा? अथवा, स्थाने, मनोरमा मम। इयं हि-

तन्वीमेघजलार्द्रपल्लवतया धौताधरे वाश्रुभि-
श्शून्ये वाभरणैस्स्वकालविरहाद्विश्रान्तपुष्पोद्गमा।
चिन्तामौनमिवास्थिता मधुलिहां शब्दैर्विना लक्ष्यते
चण्डीमामवधूय पादपतितं जातानुतापेव सा ।। 65 ।।

यावदस्याः प्रियानुकारिण्याः परिष्वङ्गप्रणयी भवामि।

~~~~~~

परिक्रम्येत्यादि। राजा। परिक्रम्य - किञ्चिद्गत्वा, अवलोक्य - वीक्ष्य च, प्राह - किमिति, किन्नु खलु - कुतो वा हेतोः, कुसुमरहितां - पुष्पशून्यामपि, इमां - परिदृश्यमानां, लतां - वल्लीं, पश्यतः - विलोकयतः, मे - मम, रतिः - आसक्तिः, उपलब्धा - प्राप्ता, अये - आश्चर्यम्, अथवा - तथा न चेत्, मम, मनोरमा - मनःप्रीतिकरीति यत्, स्थाने - तद्युक्तमेव, ''नि।। युक्ते द्वे साम्प्रतं स्थाने इत्यमरः'', हि - यस्मात्कारणात्, इयं - लता, तन्वी - क्षीणा, मेघजलार्द्रपल्लवतया - घनाम्बुसिक्तकिसलयतया, अश्रुभिः - नेत्रवारिभिः, धौताधरा - क्षालिताधरोष्ठेव स्थिता, स्वकालविरहात् - वसन्तसमयाभावात्, विश्रान्तपुष्पोद्गमा-विगतकुसुमोदया, अतएव, आभरणैः - भूषणैः, शून्या - विहीनेव स्थिता, तथा मधुलिहां - भ्रमराणां, शब्दैः - ध्वनिभिर्विना, चिन्तामौनं - चिन्तया - प्रिय समागमध्यानेन, यन्मौनं - तूष्णीं भावः, तत्, आस्थिता - प्राप्तेव स्थिता, चण्डी - कोपना, अतएव पादपतितं - चरणगतं, माम्, अवधूय - निराकृत्य, जातानुतापा - उत्पन्नपश्चात्तापा, सा - ऊर्वशीव, लक्ष्यते - दृश्यते, प्रियानुकारिण्याः - प्रेयसीसदृशायाः, अस्याः - लतायाः, परिष्वङ्गप्रणयी - आलिङ्गनपरिचितः, यावद्भवामि - भविष्यामि, ''सू।। यावत्पुरानिपातयोर्लडिति भविष्यदर्थे लट्''।
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

[लए पेक्खविण्णहिअएभवामि,
जइविहिओ एणपुणुतहिंपाविमि -
तारण्णेविणकरोमिणिब्भन्ती
पुणुणइमेल्लइताइकअन्ती

(चर्चरिकयोपसृत्य)

(लते ! प्रेक्षस्व भिन्नहृदयो भवामि,
यदि विधियोगेन पुनस्त्वां प्राप्नोमि -
तदारण्येपि न करोमि निर्भ्रान्तिं,
पुनर्नहि प्रवेशयामि तां कृतान्ताम्) ॥ 66 ॥]

(इति लतामालिङ्गति) **ततः प्रविशति तदीयं स्थानमाक्रम्योर्वशी राजा** (निमीलिताक्ष एव स्पर्शं रूपयित्वा) **ऊर्वशीगात्रसंसर्गादिव निर्वृतं मे गात्रम्, तथापि न पुनरस्ति विश्वासः, कुतः -**

[**लए इति**। हे लते - वल्लिके, प्रेक्षस्व - पश्य, मामिति शेषः, अहं, भिन्नहृदयः - व्यथितचेतस्कः, भवामि - अस्मि, विधियोगेन - दैववशेन, पुनः- भूयः, त्वां - भवतीं, प्राप्नोमि यदि - लब्धवानस्मि चेत्, तदा - तस्मिन् समये, अरण्ये - वने, निर्भ्रान्तिं - भ्रमणमपि, न करोमि - न विदधामि, कृतान्ताम् - कृतः - विहितः, अन्तः - आदर्शनेन मत्प्राणात्ययो यया तां तथोक्तां, ताम् - ऊर्वशीं, पुनः - भूयः, नहि प्रवेशयामि - न प्रापयाम्येव। चर्चरिकया - एतदाख्यया अनया गीत्या, उपसृत्य - समीपं गत्वेत्युत्तरेणान्वयः।]

इतीति। इति - एवमुक्त्वा, लतां - वल्लीम्, आलिङ्गति - परिष्वजति, ततः - आलिङ्गनानन्तरम्, ऊर्वशी, तदीयं - लतासम्बन्धि, स्थानं - प्रदेशम्, आक्रम्य - आवृत्य, प्रविशति - प्राप्नोति, राजा - पुरूरवाः, निमीलिताक्षः -

In Public domain. Digitization Muthulakshmi Research Academy

समर्थये यत्प्रथमं प्रियां प्रति क्षणेन तन्मे परिवर्ततेऽन्यथा।

अतो विनिद्रे सहसा विलोचने करोमि न स्पर्शविभावितप्रियः।। 67।।

(मुहूर्तं स्थित्वा, शनैरुन्मील्य चक्षुषी, सहर्षम्) **सत्यमेव प्रिया।**

ऊर्वशी - (बाष्पं विसृज्य) जेदुमहाराओ **(जयतु महाराजः)।**

राजा -

त्वद्वियोगोद्भवे चण्डि मया तमसि मज्जता।

दिष्ट्या! प्रत्युपलब्धासि चेतनेव गतासुना।। 68।।

मुकुलितनेत्रस्सन्नेव, स्पर्शं - सम्पर्कसुखं, रूपयित्वा - नाटयित्वा, ब्रूते, मे - मम, गात्रं - शरीरम्, ऊर्वशीगात्रसंसर्गात् - ऊर्वशीदेहसम्पर्कादिव, निर्वृतं - सुखितं, तथापि - तदपि, विश्वासः पुनः - विस्रम्भस्तु, नास्ति - न विद्यते, कुतः - कस्मादिति चेत्, समर्थय इति। यत् - वस्तु, प्रथमम् - आदौ, प्रियां - प्रेयसीं प्रति, समर्थये - प्रियाज्ञापकमिति निश्चिनोमि, तत् - वस्तु, क्षणेन - अचिरमेव, मे - मम, अन्यथा - अन्यरूपेण, परिवर्तते - परिणमति, अतः - अस्माद्धेतोः, स्पर्शविभावितप्रियः - स्पर्शेन - सम्पर्कसुखेन, विभाविता - अनुमिता, प्रिया - दयिता येन स तथाभूतोऽहं, विलोचने - नेत्रे, विनिद्रे - उन्मीलिते, न करोमि - न विदधामि।

मुहूर्तमिति। राजा। मुहूर्तम् - अल्पकालं, स्थित्वा - तूष्णीं भूत्वा, शनैः - मन्दं, चक्षुषी - नेत्रे, उन्मील्य - विकास्य, सहर्षं - ससन्तोषं यथातथा, प्राह, सत्यं - तथ्यं, प्रिया - ऊर्वश्येव, भवतीति शेषः।

ऊर्वशीति। ऊर्वशी। बाष्पं - नेत्रोदकं, विसृज्य - विमुच्य, वक्ति, महाराजः - राजचूडामणिः, जयतु - सर्वोत्कर्षेण वर्तताम्।

राजेति। राजा प्राह। किमिति। हे चण्डि - कोपने, त्वद्वियोगोद्भवे -

In Public domain. Digitization by Muthulakshmi Research Academy

[अनन्तरे चर्चरी -

मोरापरहुअहं सरहङ्गं अलिगअपव्वअसरि अकुरङ्गम् ।
तुज्झहकारणरण्णभमन्तेकोणहुपुच्छिअमज्झिरो अन्ते ।।
**(मयूरपरभृतहं सरथाङ्गम्, अलिगजपर्वतसरित्कुरङ्गम् ।
तवकारणादरण्ये भ्रमता को न खलु पृष्टो मया रुदता)।। 69 ।।]**

ऊर्वशी - अब्भन्तरकरणाएमहपच्छक्ख उत्तन्तो महाराओ **(अभ्यन्तर-करणाया मम प्रत्यक्षवृत्तान्तो महाराजः)।**

राजा - अभ्यन्तरकरणाहमिति न खलु ते वचनार्थमवैमि।

भवद्विरहजन्ये, तमसि - मोहान्धकारे, मज्जता - लीयमानेन, मया, त्वम्, गतासुना - विगतप्राणेन, चेतना - संज्ञेव, प्रत्युपलब्धा - पुनःप्राप्ता, असि - भवसि।

अनन्तर इति। अनन्तरे - ततःपरं, चर्चरी - एतदाख्या गीतिः, नेपथ्ये गीयत इति शेषः। यथा। मयूरादीनाम् आल्यादीनां च समाहारद्वन्द्वः। "सू।। सडनपुंसकमिति नपुंसकत्वम्।" समाहारस्यैकत्वादेकवचनं च। मयूरपरभृतहंस-रथाङ्गम् - बर्हिणकोकिलचक्राङ्गचक्रवाकम्, अलिगजपर्वतसरित्कुरङ्गम् - भ्रमर-द्विरदनगनदीहरिणञ्च, एतेषां मध्ये, कःखलु - को वा, अरण्ये - कानने, भ्रमता - सञ्चरता, रुदता - अश्रूणि मुञ्चता, मया, तव कारणात् - त्वदर्थं, न पृष्टः - पृच्छां न कृतः, सर्वोऽपि पृष्ट एवेति भावः ।

ऊर्वशीति। ऊर्वशी वदति। महाराजः - पुरूरवाः, अभ्यन्तरकरणायाः - अभ्यन्तराणि - अवशानि, करणानि - इन्द्रियाणि, यस्यास्तस्याः, लतारूपेण-स्थितत्वादिति भावः, मम, प्रत्यक्षवृत्तान्तः - प्रत्यक्षीकृतप्रवृत्तिः, सर्वं जानामीति भावः ।

In Public domain. Digitization: Muthulakshmi Research Academy

ऊर्वशी - कहइस्सं इमं दाव पसीदम महाराओ, जं मए कोववसं गदाए इमं अवत्थंदरं पाविदो महाराओ (**कथयिष्यामीमं तावत्प्रसीदतु महाराजः, यन्मया कोपवशं गतया इदमवस्थान्तरं प्रापितो महाराजः**)।

राजा - न तावदहं प्रसादयितव्यः, त्वद्दर्शनादेव स बाह्यकरणो ममान्तरात्मा प्रसन्नः, तत्कथय कथमियन्तं कालं मया विना स्थिता?।

ऊर्वशी - सुणोदु महाराओ, भअवदा महासेणेण सासदं कुमारव्वदं गेण्हिअ अकलुसो णाम गन्धमादण वणकच्छो अज्झासिदो, किदो णेण एसो विही

~~~~~~

राजेति। राजा प्राह। हे प्रिये, ते - तव, अभ्यन्तरकरणाहमिति - अवशेन्द्रियाहमिति, वचनार्थं - वाक्यार्थं, न खल्ववैमि - न जानामि हि, निदानं ज्ञातव्यमिति भावः।

ऊर्वशीति। ऊर्वशी वक्ति। अहम्। तावदिदानीम्, इमं - भवत्पृष्टं, वृत्तान्तमिति शेषः, कथयिष्यामि - वक्ष्यामि, महाराजः, प्रसीदतु - प्रसन्नो भवतु, यद्यस्मात्कारणात्, कोपवशं - क्रोधाधीनत्वं, गतया - प्राप्तया, मया, महाराजः, इदम् - एतादृशम्, अवस्थान्तरं - दशाविपर्ययं, प्रापितः - नीतः, णीञ् प्रापण इति धातोः प्रापणार्थत्वात्प्रापित इत्यस्य नीत इति विवरणं कृतम्।

राजेति। राजा प्राह। हे प्रिये - अहं, तावदिदानीं, न प्रसादयितव्यः - नानुग्राहणीयः, त्वयेति शेषः, त्वद्दर्शनादेव - भवद्वीक्षणमात्रेण, सबाह्यकरणः - बाह्येन्द्रियसहितः, मम अन्तरात्मा - अन्तःकरणं, प्रसन्नः - प्रसादं प्राप्तः, तत्तस्मात्, कथं - कुतो हेतोः, इयन्तम् - एतावन्तं, कालं - समयं, मया विनामामन्तरेण, स्थिता - वर्तसे, कथय - वद ।

ऊर्वशीति। ऊर्वशी वदति। महाराजः - राजाधिराजः, शृणोतु - आकर्णयतु, भगवता - षड्गुणैश्वर्यसम्पन्नेन, महासेनेन - कुमारस्वामिना, शाश्वतं - नित्यं,
~~~~~~

(शृणोतु महाराजः, भगवता महासेनेन शाश्वतं कुमारव्रतं गृहीत्वा अकलुषो नाम गन्धमादनवनकच्छोऽध्यासितः, कृतोऽनेनैष विधिः)।

राजा - **क इव?।**

ऊर्वशी - कहइस्सं, जाइदंपदेसं इत्थि आपविसदिसालदाभावे णपरिणमिस्सदि, गोरीसंगमणिज्ञमणिणिमित्तं विणाणमुच्चिस्सदित्ति, अहं गुरुसावसम्मूढ हि अआ देवदासमअं विसुमरिअअगहीदाणुणआ कुमार वणं पविट्ठम्हि, पवेसाणन्तरं एवं वासन्तीलदासं वुत्तम्हि **(कथयिष्यामि, या इमं प्रदेशं स्त्री प्रविशति सा लताभावेन परिणमिष्यति, गौरीसङ्गमनीयमणिनिमित्तं विना न मोक्ष्यत इति, अहं गुरुशाप-**

कुमारव्रतं - कुमाराख्यव्रतविशेषं, गृहीत्वा - अवलम्ब्य, अकलुषो नाम - अकलुष नामधेयः, गन्धमादनवसकच्छोऽध्यासितः - गन्धमादनाख्यपर्वतकाननस्थितजलप्रायप्रदेशोऽधिष्ठितः, अनेन - षडाननेन, एषविधिः - वक्ष्यमाणप्रकारो नियमः, कृतः - विहितः।

राजेति। राजा प्राह। क इव - कीदृशः, कुमारकृतो विधिरित्यनुषज्यते।

ऊर्वशीति। ऊर्वशी वदति। किमिति। अहं, कथयिष्यामि - वक्ष्यामि, तत्प्रकारमिति शेषः, या, स्त्री - नारी, इमम् - एतं, प्रदेशं - स्थानं, प्रविशति-प्राप्नोति, सा - स्त्री, लताभावेन - वल्लीत्वेन, परिणमिष्यति - रूपान्तरं गमिष्यति, गौरीसङ्गमनीयमणिनिमित्तं विना - गौरीसङ्गमनीयाख्यरत्नरूपकारणं विना, न मोक्ष्यते - लतात्वेन मुक्ता न भविष्यतीति विधिः कृत इति पूर्वेणान्वयः, अहं, गुरुशापसम्मूढहृदया - गुरोर्भरताचार्यस्य शापेन, सम्मूढहृदया - विवेकशून्यचित्तासती, देवतासमयं - कुमारस्वामिकृतनियमं, विस्मृत्य - विस्मरणं प्राप्य, अगृहीतानुनया - अस्वीकृतभवत्प्रार्थना, कुमारवनं - कुमारकाननं, प्रविष्टा

In Public domain. Digitization: Muthulakshmi Research Academy

सम्मूढहृदया देवतासमयं विस्मृत्य अगृहीतानुनया कुमारवनं प्रविष्टास्मि, प्रवेशानन्तरमेवं वासन्तीलता संवृत्तास्मि)।

राजा - सर्वमुपपन्नम् -

रतिखेदसुप्तमपि मां शयनेयामन्यसे प्रवासगतम्।
सात्वमबले सहेथाः कथं मदीयं चिरवियोगम्।। 70।।

इदं तद्यथा कथितं त्वत्सङ्गमनिमित्तं मुनेरुपलब्धम् (इति मणिं दर्शयति)।

ऊर्वशी - अहो सङ्गमणिज्जो! अदोक्खु महाराएण अलिङ्गिद मेत्तेण पकिदित्थासंवुत्तम्हि (इति मणिमादाय वन्दते) **(अहो सङ्गमनीयः! अतः खलु महाराजेनालिङ्गितमात्रेण प्रकृतिस्था संवृत्तास्मि)।**

- प्राप्तास्मि, प्रवेशानन्तरं - वनप्राप्त्युत्तरकालमेव, एवम् - अनेन प्रकारेण, वासन्तीलता - माधव्याख्यावल्ली, संवृत्ता - जातास्मि।

राजेत्यादि। राजा प्राह। हे प्रेयसि, सर्वम् - एतत्समस्तम्, उपपन्नं - युक्तमेव, या त्वं, शयने - शय्यायां, रतिखेदसुप्तं - सुरतक्रीडाजनितपरिश्रम-निद्रितमपि, मां, प्रवासगतं - विदेशस्थितं, मन्यसे - जानीषे, सात्वं, मदीयं - मत्सम्बन्धिनं, चिरवियोगं - दीर्घकालविरहं, हे अबले - मुग्धे, कथं - केन वा प्रकारेण, सहेथाः - क्षमेथाः, किं तया - चिन्तया, मुनेः - महर्षेः, त्वत्सङ्गमनिमित्तं-त्वत्समावेशकारणं, यथा - येन प्रकारेण, कथितम् - उक्तं, तदिदं - तदेतद्रत्नम्, उपलब्धं - प्राप्तं, इति - एवमुक्त्वा, मणिं - सङ्गमनीयरत्नं, दर्शयति - प्रेक्षयति।

ऊर्वशीति। ऊर्वशी कथयति। सङ्गमनीयः - सङ्गमनीयाख्यो मणिः, अयमुपस्थित इति शेषः, अहो - आश्चर्यम्, अतःखलु - अस्मादेव हेतोः, महाराजेन - पुरूरवसा, आलिङ्गितमात्रेण - परिरब्धेनैव, प्रकृतिस्था - स्वभावे

In Public domain. Digitization Muthulakshmi Research Academy

राजा - एवमेव सुन्दरि क्षणमात्रं स्थीयताम् -

स्फुरताविच्छुरितमिदं रागेण मणेर्ललाटनिहितस्य।
श्रियमुद्वहति मुखं ते बालातपरक्तकमलस्य ।। 71 ।।

ऊर्वशी - महन्तोक्खुकाळोतुहपट्टणादोणिग्गदस्स, असूअन्तिमं पकिदीओ, एहिणिवट्टम्ह **(महान् खलु कालस्तव पट्टणान्निर्गतस्य, असूयन्ति मां प्रकृतयः, एहि निवर्तावहे)।**

राजा - यदाज्ञापयति भवती।

ऊर्वशी - कहंमहाराओ गन्तुं इच्छदि **(कथं महाराजो गन्तुमिच्छति ?)।**

वर्तमाना, संवृत्ता - जातास्मि, इति - एवमुक्त्वा, मणिं - सङ्गमनीयरत्नम्, आदाय - स्वीकृत्य, वन्दते - अभिवादयते।

राजेत्यादि। राजा प्राह। हे सुन्दरि - लावण्यवति, एवमनेन प्रकारेणैव, क्षणमात्रं - क्षणपरिमितं कालं, स्थीयताम् - स्थितिः क्रीयतां, त्वयेति शेषः, ललाटनिहितस्य - फालविन्यस्तस्य, मणेः - सङ्गमनीयमणेः, स्फुरता - प्रकाशमानेन, रागेण - रक्तिम्णा, विच्छुरितम् - अनुलिप्तम्, इदम् - एतत्, ते - तव, मुखम् - आननं, बालातपरक्तकमलस्य - बालातपेन - प्रातःकालातपेन, रक्तं-लोहितवर्णं, यत्कमलं - पद्मं, तस्य - श्रियं - शोभाम्, उद्वहति - धत्ते।

ऊर्वशीति। ऊर्वशी वदति। पट्टणात् - त्वन्नगरात्, निर्गतस्य - प्रयातस्य, तव, महान् - दीर्घतमः, कालः - समयः, अतीत इति शेषः, प्रकृतयः - प्रजाः, माम्, असूयन्ति - दूष्यन्ति, तस्मात्, निवर्तावहे - पुनर्गच्छावः, एहि - आगच्छ।

राजेति। राजा प्राह। भवती, यदाज्ञापयति - नियोजयति, तत्करोमीति वाक्यशेषः।

In Public domain. Digitization of Muthulakshmi Research Academy

राजा -

अचिरप्रभाविलसितैः पताकिना सुरकार्मुकाभिनवचित्रशोभिना।
गमितेन खेलगमने विमानवतां नय मां नवे नवसतिं पयोमुचा ।। 72 ।।

[पाविअसहअरिसङ्गओ पुलअपसाहिअअङ्गओ ।
साच्छापत्तविमाणओविहरइहंसजुआणओ ।।
(प्राप्तसहचरीसङ्गकः पुलकप्रसाधिताङ्गकः।
स्वेच्छाप्राप्तविमानको विहरति हंसयुवकः) ।। 73 ।।]

(इति खण्डधारया निष्क्रान्तौ)

।। इति चतुर्थोऽङ्कः ।।

ऊर्वशीति। ऊर्वशी वक्ति। महाराजः - राजचूडामणिः, कथं - केन प्रकारेण, गन्तुं - यातुम्, इच्छति - अभिलषति ।

राजेति। राजा प्राह। हे खेलगमने - विलासान्वितगतिविशिष्टे ऊर्वशि, अचिरप्रभाविलसितैः - विद्युत्स्फुरणैः, पताकिना - ध्वजवता, सुरकार्मुकाभिनव-चित्रशोभिना - सुरकार्मुकम् - इन्द्रधनुरेव, अभिनवं - नूतनं, यच्चित्रमालेख्यं तेन शोभते - प्रकाशत इति तथोक्तेन, विमानतां - व्योमयानत्वं, गमितेन - प्रापितेन, नवेन - नवीनेन, पयोमुचा - जलदेन, मां, वसतिं - स्वस्थानं, नय - प्रापय।

[पाविएति। प्राप्तसहचरीसङ्गकः - लब्धप्रियासमागमः, पुलकप्रसाधिताङ्गकः - रोमाञ्चालंकृतशरीरः, स्वेच्छाप्राप्तविमानकः - स्वैराधिगतव्योमयानः, हंसयुवकः - कश्चित्तरुणराजहंसः, विहरति - क्रीडति, इति - एवं प्रकारया, खण्ड धारया - खण्डधाराख्यगीत्या, निष्क्रान्तौ - एनां गीतिं गायन्तौ सन्तौ निर्गतौ। ऊर्वशीपुरूरवसाविति शेषः ।]

।। इति श्रीमन्मृत्युञ्जयनिश्शङ्कक्षितिपालविरचिते विक्रमोर्वशीयव्याख्याने रत्नदीपिकासमाख्याने चतुर्थोऽङ्कः।। श्रीरस्तु ।।

In Public domain. Digitization Muthulakshmi Research Academy

☙ पञ्चमोऽङ्कः ☙

(ततः प्रविशति परितुष्टो विदूषकः)

विदूषकः - दिट्ठिआचिरस्सकालस्सउव्वसी सहाओतत्तभवंनन्दण वणप्प मुहेसुदेवदारण्णेसुविहरि अपडिणिउत्तोवअंसो, दाणिंसस्सकज्जाणु सारिणी हिंपकिदीहिं अणुरंजिदो रज्जंकरेदि। असन्ताणुत्तणंवज्जि अणकिं विसेवअणीअं, अज्जतिहिविसेसोत्तिभअवदीणं गङ्गाजमुणाणं सङ्गमे देवी हिंसहकिदाहि सेओसंपदं उअआरिअंपविट्ठो, जाव अहंतत्तभवदो अलं करिअमाणस्स अङ्गाणुळेवणमङ्गले अग्गभाईभोमि (परिक्रामति) **(दिष्ट्या चिरस्य कालस्योर्वशीसहायस्तत्रभवान् नन्दनवनप्रमुखेषु देवतारण्येषु विहृत्य प्रतिनिवृत्तो वयस्यः, इदानीं स्वस्वकार्यानु-**

~~~~~~

कविरिदानीमङ्कान्तरमारभमाणः कथासङ्घटनाय प्रवेशकं नामार्थोपक्षेपकं प्रस्तौति। **ततः प्रविशतीत्यादि**। ततोऽनन्तरं, परितुष्टः - संहृष्टः, विदूषकः - तन्नामको राजनिकटवर्ती नटः, प्रविशति - रङ्गस्थलं प्राप्नोति, हर्षकारणं त्वनुपदमेव स्फुटी भविष्यति। **विदूषक इति**। विदूषकः प्रब्रवीति। किमिति। दिष्ट्या - दैव-वशेन, चिरस्य कालस्य - दीर्घकालस्य, तत्रभवान् - पूज्यः, वयस्यः - सखा पुरूरवाः, ऊर्वशीसहायः - ऊर्वशीनामकाप्सरस्सहितः, नन्दनवनप्रमुखेषु - इन्द्रोद्यान प्रभृतिषु, देवतारण्येषु - सुरोपवनेषु, विहृत्य - क्रीडित्वा, प्रतिनिवृत्तः - प्रत्यागत-स्सन्, इदानीमद्य, स्वस्वकार्यानुसारिणीभिः - स्वस्वार्थानुवर्तिनीभिः, प्रकृतिभिः-प्रजाभिः, अनुरञ्जितः - सन्तोषितस्सन्, राज्यं - प्रजापरिपालनं, करोति - विदधाति, अस्य - राज्ञः, आसन्तात्वं - सन्तत्यभावमपुत्रत्वमित्यर्थः, वर्जयित्वा - त्यक्त्वा, किमपि - किञ्चिदपि, वचनीयम् - अपवादः, न - न विद्यते। अद्य-अस्मिन् दिने, तिथिविशेषः - कश्चिदुत्कृष्टतिथिरिति ज्ञात्वा, भगवत्योः - पूज्ययोः,
~~~~~~

In Public domain. Digitization: Mathulakshmi Research Academy

सारिणीभिः प्रकृतिभिरनुरञ्जितो राज्यं करोति। असन्तानत्वं वर्जयित्वा न किमप्यस्य वचनीयम्। अद्य तिथिविशेष इति भगवत्योर्गङ्गायमुनयोस्सङ्गमे देवीभिस्सह कृताभिषेकस्साम्प्रत-मुपकार्यां प्रविष्टः, यावदहं तत्रभवतोऽलङ्क्रियमाणस्याङ्गानु-लेपनमङ्गलेऽग्रभागी भवामि)।

(नेपथ्ये) हद्धीहद्धी! एसोदुऊलुत्तरच्छदेतालवेंटाधारेणिक्खिवि अणि अमाणो-मएभट्टिणोअब्भन्तरविलासिणीमोलि विरअणाजोग्गोमणी आमिससङ्किणागिद्धेणअक्खित्तो **(हाधिक् हाधिक्! एष दुकूलोत्तरच्छदे तालवृन्ताधारे निक्षिप्य नीयमानो मया भर्तुरभ्यन्तरविलासिनी-मौलिविरचनायोग्यो मणिरामिषशङ्किना गृध्रेणाक्षिप्तः)।**

विदूषकः - (कर्णं दत्वा) अच्चाहिदं! बहुमदोक्खु वअंसस्ससङ्गमणिज्रणाम

गङ्गायमुनयोः - तन्नाम्न्योर्नद्योः, सङ्गमे - संयोगस्थले, देवीभिस्सह - पत्नीभि-स्समं, कृताभिषेकः - विहितस्नानस्सन्, साम्प्रतमिदानीम्, उपकार्याम् - उपकारिकां गृहविशेषमित्यर्थः, प्रविष्टः - प्राप्तः - अहम्, अलङ्क्रियमाणस्य - भूष्यमाणस्य, तत्रभवतः - राज्ञः, अङ्गानुलेपनमङ्गले - शुभप्रदशरीरविलेपने, अग्रभागी - प्रथमांशभाक्, यावद्भवामि - भविष्यामि, इत्युक्त्वा, परिक्रामति - गच्छति।

नेपथ्य इति। नेपथ्ये - यवनिकान्तरितदेशे, श्रुतं किञ्चिद्वाक्यम्। किमिति। हाधिक् हाधिक् - इतिपदद्वयमाक्रोशे, तालवृन्ताधारे - व्यजनस्थिते, दुकूलोत्तरच्छदे - क्षामोत्तरीये, निक्षिप्य - संस्थाप्य, मया नीयमानः - प्राप्यमाणः, अभ्यन्तर-विलासिनीमौलिविरचनायोग्यः - अन्तःपुरयुवतीजनचूडालङ्करणार्हः, एष भर्तुर्मणिः- अयं राज्ञस्सङ्गमनीयमणिः, आमिषशङ्किना - मांसखण्डभ्रमवता, गृध्रेण - आतायिना, ''नि॥ आतायिचिल्लौ दाक्षाय्यगृध्रावित्यमरः'', आक्षिप्तः - अपहृतः।

In Public domain. Digitization Muthulakshmi Research Academy

हे ओ चूडामणी, अदोक्खुअसमत्तणेवच्छोतत्तभवं आसणादो उट्ठिदोइदो एव्वआअच्छदि, जावणं उअ सप्पामि (इति निष्क्रान्तः) **(अत्याहितम्! बहुमतः खलु वयस्यस्य सङ्गमनीयनामधेयश्चूडामणिः, अतः खलु असमाप्तनैपथ्यस्तत्र भवानासनादुत्थित इत एवागच्छति, यावदेनमुपसर्पामि)**।

॥ इति प्रवेशकः ॥

(ततः प्रविशति सावेगपरिजनो राजा)

राजा -

आत्मनो वधमाहर्ता क्वासौ विहगतस्करः।
येन तत्प्रथमं स्तेयं गोप्तुरेव गृहे कृतम्॥ 1॥

विदूषक इति। विदूषकः। कर्णं दत्वा - नेपथ्यनिस्सृतं वाक्यमाकर्ण्य, वदति, अत्याहितं - कोऽयं गृध्रस्य स्वजीवननिरपेक्षव्यापारः, "नि॥ अत्याहितं महाभीतिः कर्मजीवानपेक्षिचेत्यमरः", वयस्यस्य - प्रियसुहृदो राज्ञः, सङ्गमनीय-नामधेयः - तन्नामकः, चूडामणिः - शिरोरत्नं, बहुमतःखलु - परमप्रेमास्पदी भूतो हि, अतःखलु - अस्मादेवहेतोः, तत्र भवान् - पूज्यो राजा, असमाप्तनैपथ्यः - अनवसितप्रसाधनः, आसनात् - पीठात्, उत्थितः - उत्थानं गतस्सन्, इतः - इमं प्रदेशमेव, आगच्छति - एति, एनं - राजानं, यावदुपसर्पामि - अनुसरिष्यामि, इत्युक्त्वा, निष्क्रान्तः - निर्गतः, विदूषक इत्यनुषज्यते।

तत इति। ततोऽनन्तरं, राजा - पुरूरवाः, सावेगपरिजनः - ससम्भ्रम-परिजनस्सन्, प्रविशति - प्राप्नोति। रङ्गस्थलमिति शेषः। **राजेति।** राजा प्राह। किमिति। आत्मनः - स्वस्य, वधं - हननम्, आहर्ता - सम्पादकः, "सू॥ तृन्निति तच्छीलार्थे तृन्प्रत्ययः", नलोकेत्यादिना षष्ठी प्रतिषेधाद्द्वितीया, असौ - अयं,

In Public domain. Digitization by Mahalakshmi Research Academy

किराती - एसोमुहकोडिळग्ग हेमसुत्तेणमणिणा आळिहन्तोवि अआआसं परिब्भमइ **(एष मुखकोटिलग्नहेमसूत्रेण मणिना आलिखन्निवाकाशं परिभ्रमति)।**

राजा - पश्याम्येनम्।

असौ मुखालम्बितहेमसूत्रं बिभ्रन्मणिं मण्डलचारशीघ्रः।
अलातचक्रप्रतिमं विहङ्गस्तद्रागलेखावलयं तनोति ।। 2।।

किंनु खलु कर्तव्यम्?।

विदूषकः (उपेत्य) - किं एत्थदिन्तिज्ञदि? अळंपक्खिहिंसाघिणाए, अवराहीक्खुसासणिज्ञो **(कथमत्र चिन्त्यते, अलं पक्षिहिंसा घृणया, अपराधी खलु शासनीयः)।**

विहगतस्करः - पक्षिचोरः, क्व - कुत्र, वर्तत इति शेषः, येन - विहगतस्करेण, गोप्तुः - रक्षकस्यैव, गृहे - अगारे, तत्प्रथमं - तत्पूर्वं, अभूतपूर्वमित्यर्थः, स्तेयं - चौर्यं, कृतं - विहितम्।

किरातीति। किराती वक्ति। हे राजन्, एष गृध्रः, मुखकोटिलग्नहेमसूत्रेण - आननाग्रसक्तस्वर्णतन्तुना, मणिना - सङ्गमनीयरत्नेन, आकाशम् - अम्बरतलम्, आलिखन् - रञ्जयन्निव, परिभ्रमति - चक्रवच्चरति।

राजेति। राजा प्राह। हे किराति - एनमातायिनं, पश्यामि - विलोकयामि,

असाविति। मुखालम्बितहेमसूत्रं - वदनधृतहाकटगुणं, मणिं - सङ्गमनीयरत्नं, बिभ्रत् - धारयन्, मण्डलचारशीघ्रः, मण्डलचारेण - चक्रगत्या, शीघ्रः - वेगयुक्तगतिः, असौ - विहङ्गः, एष गृध्रः, अलातचक्रप्रतिमम् - उल्मुकभ्रमणजनितमण्डलमिव, तद्रागलेखावलयं, तस्य - मणेः, रागस्य - रक्तिम्णः, या लेखा - रेखा, तस्याः वलयं - चक्राकारं, तनोति - करोति - तदिदानीं किंनु खलु कर्तव्यम् - अस्माभिः किं वा विधातव्यम् ।

In Public domain. Digitization Muthulakshmi Research Academy

राजा - सम्यगाह भवान्, धनुस्तावत्।

यवनिका - एसाआणइस्सं (इति निष्क्रान्ता) **(एषा आनयिष्यामि)।**

राजा - न दृश्यते क्वनु खलु विहङ्गः?।

विदूषकः - इदोदक्खिणेणअव आदोसा सणिज्ञोसउणहदओ **(इतो दक्षिणेन अपयातश्शासनीयश्शकुनहतकः)।**

राजा - (परिवृत्य, अवलोक्य च) दृष्ट इदानीम् -

~~~~~~

विदूषक इति। विदूषकः। उपेत्य - राजनिकटं प्राप्य, ब्रवीति राजन्, अत्र - अस्मिन्विषये, कथं चिन्त्यते - किमर्थं विचार्यते, पक्षिहिंसाघृणया - पक्षिणं कथं हन्मीति कृपया, अलं - मास्तु, अपराधी - आगस्कारी, शासनीयः खलु - दण्डनीयो हि।

राजेति। राजा प्राह। हे विदूषक, भवान्, सम्यक् - समीचीनं यथातथा, आह - ब्रवीति, तावदिदानीं, धनुः - चापः, आनीयतामिति शेषः।

यवनिकेति। यवनिका वक्ति। एषा - इयमहम्, आनयिष्यामि - आगमयिष्यामि, इति - एवमुक्त्वा, निष्क्रान्ता - निर्गता।

राजेति। राजा प्राह। विहङ्गः - पक्षी, न दृश्यते - न प्रेक्ष्यते, क्वनु खलु-कुत्र वा, तिष्ठेदिति शेषः।

विदूषक इति। विदूषको वदति। इतोऽस्मात्प्रदेशात्, दक्षिणेन - दक्षिण मार्गेण, शकुनहतकः - पक्षिजाल्मः, शासनीयः - दण्डनीयस्सन्, अपयातः - पलायितः।

राजेत्यादि। राजा। परिवृत्य - दक्षिणतो निवृत्य, अवलोक्य - दृष्ट्वा च, प्राह। इदानीमद्य, दृष्टः - विलोकितः, असौ - वयं, खगः - पक्षी, प्रभापल्लवितेन - प्रभया - कान्त्या, पल्लवितेन - सञ्जातकिसलयेन, मणिना - सङ्गमनीयरत्नेन,
~~~~~~

In Public domain. Digitization by Vidyalankar Research Academy

प्रभापल्लवितेनासौ विभाति मणिना खगः।
अशोकस्तबकेनेव दिङ्मुखस्यावतंसकः॥ 3॥

(प्रविश्य चापहस्ता यवनिका) भट्टा! इदं हत्थावावसहिदं सरासणं **(भर्तः! इदं हस्तावापसहितं शरासनम्)।**

राजा - किमिदानीं धनुषा, बाणपथमतीतः कुणपाशनः। तथाहि -

आभाति मणिविशेषो दूरमिदानीं पतत्रिणानीतः।
नक्तमिव लोहिताङ्गः परुषघनच्छेदसंवीतः॥ 4॥

अशोकस्तबकेन - अशोकपुष्पगुच्छेनेव, दिङ्मुखस्य - दिङ्मण्डलस्य, अवतंसकः - चूडामणिस्सन्, विभाति - शोभते, करोत्यवतसंकमिति पाठान्तरे शिरोभूषणं सम्पादयतीत्यर्थः, शिष्टं समानम्।

प्रविश्येति। यवनिका - यवनी, चापहस्ता - गृहीतकोदण्डा सती, प्रविश्य - रङ्गस्थलं प्राप्य, वक्ति। भर्तः - हे प्रभो, हस्तावापसहितं - हस्तरक्षा-विशिष्टं, शरासनं - धनुः, इदम् - एतत्, गृह्यतामिति शेषः। अस्मिन्वाक्ये हस्तावापशब्दस्य ज्याघातवारणमित्यर्थः। स्पष्टार्थमस्माभिः हस्तरक्षाविशिष्टमिति व्याख्यातम्।

राजेति। राजा प्राह। इदानीमद्य, धनुषा - चापेन, किं - न किमपि प्रयोजनमित्यर्थः। कस्मादिति चेत्, कुणपाशनः - गृध्रः, बाणपथं - शरमार्गम्, अतीतः - अतिक्रान्तः, तथाहि - तदेवोपपादयति, आभातीति। इदानीमधुना, पतत्रिणा - पक्षिणा, दूरम् - अतीवोर्ध्वं, नीतः - आकृष्टः, मणिविशेषः - रत्न-श्रेष्ठं, परुषघनच्छेदसंवीतः - सान्द्रमेघखण्डाच्छादितः, नक्तं - रात्रौ, लोहिताङ्गः - अङ्गारकग्रह इव, आभाति - प्रकाशते, इति कथयन्, कञ्चुकिनं - कञ्चित्सौवि-दल्लं, विलोक्य - वीक्ष्य, प्राह, राजेत्यनुषज्यते। हेलातव्य, नागरिकाः - नगर-

In Public domain. Digitization Muthulakshmi Research Academy

(कञ्चुकिनं विलोक्य) **लातव्य! मद्वचनादुच्यन्तां नागरिकाः, सायं निवास वृक्षाश्रयी विचीयतां विहङ्गदस्युरिति।**

कञ्चुकी - **यदाज्ञापयति देवः** (इति निष्क्रान्तः)।

विदूषकः - उअविसदुभवं, सम्पदं कहिंगदोसोर अणकुम्भीळ ओतुहसासणादो मुञ्चिस्सदि **(उपविशतु भवान्, साम्प्रतं कुत्र गतस्सरत्नकुम्भीलकस्तव शासनान्मोक्ष्यते)।**

राजा - (विदूषकेणोपविश्य) **वयस्य!**

रत्नमितिमेन तस्मिन् मणौ स्पृहासीद्विहङ्गमाक्षिप्ते।
प्रियया येनास्मि सखे! सङ्गमनीयेन सङ्गमितः॥ 5॥

~~~~~~

रक्षणे नियुक्ता भटाः, मद्वचनात् - मद्वाक्यात्, उच्यन्तां - भाष्यन्तां, किमिति, सायं - सायङ्काले, निवासवृक्षाश्रयी - आवासद्रुमाश्रितः, विहङ्गदस्युः - मणितस्करो गृध्रः, विचीयतां - मृग्यतामिति।

कञ्चुकीति। कञ्चुकी वदति। देवः - राजा, यदाज्ञापयति - नियोजयति, तत्करोमीति वाक्यशेषः, इत्युक्त्वा, निष्क्रान्तः - निर्गतः।

विदूषक इति। विदूषको वदति। भवान्, उपविशतु - निषीदतु, साम्प्रतमिदानीं, सः, रत्नकुम्भीलकः - मणिचोरः, कुत्रगतः - क्व वा स्थितस्सन्, तव शासनात् - दण्डात्, मोक्ष्यते - विसृज्यते, न मोक्ष्यत एवेत्यर्थः।

राजेति। राजा - पुरूरवाः, विदूषकेण सह, उपविश्य - निषण्णो भूत्वा, प्राह। हे वयस्य - सखे, रत्नमिति। मे - मम, विहङ्गमाक्षिप्ते - गृध्रपक्ष्यपहृते, तस्मिन्मणौ, रत्नमिति, स्पृहा - इच्छा, नासीत् - नाभवत्, परन्तु, हे सखे - वयस्य, येन - हेतुना, सङ्गमनीयेन - सङ्गमनीयाख्येन तेन मणिना, प्रियया - ऊर्वश्या, अहं, सङ्गमितः - संयोजितोऽस्मि, तेन, तस्मिन्मणौ मम पूर्णाशयोऽभूदिति
~~~~~~

In Public domain. Digitization Mahalakshmi Research Academy

विदूषकः - णंपुढमं एव्वपरिगहीदद्धोम्हिकिदो भवदा **(ननु प्रथममेव परिगृहीतार्थोऽस्मि कृतो भवता)।**

(ततः प्रविशति सशरं मणिमादाय कञ्चुकी)

कञ्चुकी - (उपसृत्य) **जयतु देवः।**

अनेन निर्भिन्नवपुस्सवध्यो बलेन ते मार्गणतां गतेन।
प्राप्यापराधोचितमन्तरिक्षात्समौलिरत्नः पतितः पतत्री ।। 6 ।।

(सर्वे विस्मयं रूपयन्ति)

कञ्चुकी - अद्भिः प्रक्षालितो मणिः कस्मै प्रदीयताम्?।

वाक्यशेषः, अस्मिन् श्लोके, प्रयास इति। स्पृहासीदित्यत्र पाठान्तरमुदीचीनपुस्तकेषु वर्तते। तत्र, प्रयासः - प्रयत्नः, आसीदिति शेषः, शिष्टं समानम्।

विदूषक इति। विदूषको ब्रवीति। ननु राजन्, प्रथमं - पूर्वमेव, भवता - त्वया, परिगृहीतार्थः - ज्ञातवृत्तान्तः, कृतः - विहितोऽस्मि।

तत इति। ततो अनन्तरं, कञ्चुकी, सशरं - बाणसहितं, मणिं - रत्नम्, आदाय - गृहीत्वा, प्रविशति - प्राप्नोति, कञ्चुकीति। कञ्चुकी। उपसृत्य - राजानमनुसृत्य, कथयति। किमिति। देवः - राजा, जयतु - सर्वोत्कर्षेण वर्तताम्। अनेनेति। मार्गणतांगतेन - बाणत्वं प्राप्तेन, अनेन - एतेन, ते - तव, बलेन - वीर्येण, निर्भिन्नवपुः - विदारिततनुः, वध्यः - हन्तव्यः, सः, पतत्री - पक्षी, अपराधोचितम् - आगसोऽर्हं दण्डं, प्राप्य - लब्ध्वा, समालीरत्नः - चूडामणिसहितस्सन्, अन्तरिक्षात् - आकाशात्, पतितः - अधोभागं गतः।

सर्व इति। सर्वे - तत्रत्यास्समस्ताः, विस्मयम् - अद्भुतं, रूपयन्ति - अभिनयन्ति।

राजा - किराति! गच्छ, कोशपेटके स्थापयैनम्।

किराती - जंभट्टाआणवेदि **(यद्भर्ता आज्ञापयति)।**

(इति मणिं गृहीत्वा निष्क्रान्ता)

राजा - लातव्य! **अपि जानीषे कस्यायं बाण इति**?।

कञ्चुकी - नामाक्षराणि दृश्यन्ते, न मे वर्णविभावनक्षमा दृष्टिः।

राजा - तर्ह्युपश्लेषय शरं यावन्निरूपयामि।

~~~~~~

कञ्चुकीति। कञ्चुकी ब्रूते। मणिः - सङ्गमनीयमणिः, अद्भिः - वारिभिः, प्रक्षालितः - विशोधितः, कस्मै - भृत्याय, प्रदीयतां - प्रतिपाद्यतां, सम्प्रश्ने लोट्॥

राजेति। राजा प्राह। हे किराति। गच्छ - याहि, एनं - मणिं, कोश-पेटके - कोशागारस्थितमञ्जूषायां, स्थापय - प्रवेशय।

किरातीति। किराती वक्ति। भर्ता - राजा, यदाज्ञापयति - नियोजयति, तत्तथा करोमीति वाक्याध्याहारः।

इत्युक्त्वा, मणिं - रत्नं, गृहीत्वा - स्वीकृत्य, निष्क्रान्ता - निर्गता, किरातीत्यनुषज्यते।

राजेति। राजा प्राह। हे लातव्य - तन्नामक कञ्चुकिन्, अयं बाणः - असौ शरः, कस्येति, अपि जानीषे - जानासि किम्।

कञ्चुकीति। कञ्चुकी वदति। नामाक्षराणि - अभिधानबोधकवर्णानि, दृश्यन्ते - विलोक्यन्ते, मयेति शेषः, मे - मम, वर्णविभावनक्षमा - अक्षरपरि-शीलनार्हा, दृष्टिः - प्रेक्षणं, न - न विद्यते, अतो न जानामीति भावः।

राजेति। राजा प्राह। तर्हि - तवाक्षरज्ञानं न चेत्, शरं - बाणम्, उप-श्लेषय - मन्निकटं प्रापय, यावन्निरूपयामि - निरूपयिष्यामि।
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

(कञ्चुकी यथोक्तं करोति)

(राजा नामाक्षराणि वीक्ष्य विचारयति)

कञ्चुकी - यावन्नियोगमशून्यं करिष्यामि (इति निष्क्रान्तः)।

विदूषकः - किं भवंविआरेदि **(किं भवान् विचारयति?)**।

राजा - शृणु तावत्प्रहर्तुर्नामाक्षराणि।

विदूषकः - अवहिदोम्हि **(अवहितोऽस्मि)**।

राजा - (वाचयति)

ऊर्वशीसम्भवस्यायमैलसूनोर्धनुर्भृतः।
कुमारस्यायुषो बाणस्संहर्तुर्द्विषदायुषाम्॥ 7॥

कञ्चुकीति। कञ्चुकी, यथोक्तं - राज्ञा यथाज्ञप्तं, करोति - तथा विदधाति।

राजेति। राजा - पुरूरवाः, नामाक्षराणि - बाणस्थिताभिधानबोधकवर्णानि, वीक्ष्य - दृष्ट्वा, विचारयति - परिशीलयति।

कञ्चुकीति। कञ्चुकी। नियोगम् - आज्ञां, यावत् - साकल्येन, आशून्यं - सम्पूर्णं यथा तथा, करिष्यामि - विधास्यामि, इत्युक्त्वा, निष्क्रान्तः - प्रस्थितः।

विदूषक इति। विदूषकः वदति। भवान्, किं विचारयति - पर्यालोचयति।

राजेति। राजा प्राह। तावदिदानीं, प्रहर्तुः - निहन्तुः, पक्षिण इति शेषः, नामाक्षराणि - अभिधानघटकवर्णानि, शृणु - आकर्णय।

विदूषक इति। विदूषको ब्रूते। आवहितः - अप्रमत्तोऽस्मि, कथयेति शेषः।

राजेति। राजा वाचयति - पठति, किमिति। ऊर्वशीति। अयम् - एषः, ऊर्वशीसम्भवस्य - ऊर्वशीगर्भसञ्जातस्य, ऐलसूनोः - इलानाम्नीबुधेन परिणीता

In Public domain. Digitization Muthulakshmi Research Academy

विदूषकः - (सपरितोषम्) दिट्ठिआसन्ताणेणवड्ढदिभवं **(दिष्ट्या सन्तानेन वर्धते भवान्)।**

राजा - कथमेतत्? **अन्यत्र नैमिशीयसत्त्रादिवियुक्तोऽहमूर्वश्या, न च मया गर्भव्यतिकरो लक्षितः, कुत एव प्रसूतिः, किन्तु -**

आविलपयोधराग्रं लवलीदलपाण्डुराननच्छायम्।
कानि दिनानि वपुरभूत्केवलमलसेक्षणं तस्याः ॥ 8॥

विदूषकः - माभवं एवं सव्वं माणुसीधम्मंदिव्वासुसम्भावेदु, पहावणिगूढा

मनोः कन्या, तस्या अपत्यं पुमानैलः - पुरूरवाः, तस्य सूनोः - पुत्रस्य, तथा धनुर्भृतः - चापधरस्य, द्विषदायुषाम् - शत्रुजीवितकालानां, संहर्तुः - विनाशकरस्य, कुमारस्य - युवराजस्य, आयुषः - आयुर्नामकस्य, बाणः - मार्गणः।

विदूषक इति। विदूषकः। सपरितोषं - ससन्तोषं यथा तथा ब्रवीति। भवान्, दिष्ट्या - भाग्यवशेन, सन्तानेन - वंशवृद्ध्या, वर्धते - वृद्धिं प्राप्नोति॥

राजेति। राजा प्राह। एतत् - पुत्रजननं, कथं - केन प्रकारेण, अभूदिति शेषः। अहम्। नैमिशीयसत्त्रादन्यत्र - नैमिशारण्यं विना, ऊर्वश्या, अवियुक्तः - संयुक्तः, मया, गर्भव्यतिकरः - गर्भसम्बन्धः, न च लक्षितः - न दृष्टः, प्रसूतिः - प्रसवः, कुत एव - कस्मादेव, भवतीति शेषः, किन्तु - परन्तु, आविलेति। तस्याः - ऊर्वश्याः, वपुः केवलं - शरीरमेव, आविलपयोधराग्रम् - आनीलचूचुकं, लवलीदलपाण्डुराननच्छायं - परिणतलवलीपत्रपाण्डुमुखशोभम्, अलसेक्षणं - मन्दवीक्षणं च, कानि दिनानि - केषुचिद्दिनेष्वित्यर्थः, "सू॥ कालाध्वनोरत्यन्तसंयोग इति द्वितीया", अभूत् - अजनि।

विदूषक इति। विदूषको वदति। भवान्। एवम् - अनेन प्रकारेण, सर्वं - समस्तं, मानुषीधर्मं - मनुष्याङ्गना व्यापारं, दिव्यासु - देवाङ्गनासु, मा सम्भावयतु

In Public domain. Digitization Muthulakshmi Research Academy

इताणंचरिदाणि (**मा भवान् एवं सर्वं मानुषीधर्मं दिव्यासु सम्भावयतु, प्रभावनिगूढानि तासां चरितानि**)।

राजा - अस्तु तावदेवं यथा भवानाह, पुत्रसंवरणे किमिव कारणं तत्र-भवत्या।

विदूषकः - किं अण्णं, महाराओ परिहविस्सदित्ति (**किमन्यत्, महाराजः परिभविष्यतीति**)।

राजा - कृतं परिहासेन, विचिन्त्यताम्।

विदूषकः - कोदेवदारहस्साणितक्कइस्सदि (**को देवतारहस्यानि तर्कयिष्यति?**)

- न तर्कयतु, किन्तु, तासां - दिव्यानां स्त्रीणां, चरितानि - चारित्राणि, प्रभावनिगूढानि - प्रभावेन - महिम्ना, निगूढानि - अत्यन्तगुप्तानि खलु।

राजेति। राजा प्राह। भवान्, यथा - येन प्रकारेण, आह - ब्रवीति, तावत् - तत्सर्वम्, एवम् - इत्थमेवास्तु, देवानां प्रभावो भवत्वित्यर्थः, तत्र भवत्या - पूज्यया ऊर्वश्या, कृते इति शेषः, पुत्रसंवरणे - तनयगोपने, किमिव कारणं - को वा हेतुर्भवेत्।

विदूषक इति। विदूषको वक्ति। महाराजः - पुरूरवाः, परिभविष्यति - अनादरं करिष्यति, इति हेतोः, पुत्रसंवरणमित्यनुषज्यते, किमन्यत् - एतदतिरिक्तं प्रयोजनं किं वा विद्यते, अनादरे कारणं तु प्रसूत्यन्तं हि यौवनमिति यौवनापगम एव।

राजेति। राजा प्राह। परिहासेन - हास्येन, कृतम् - अलं, विचिन्त्यतां - विचार्यताम्, भवतेति शेषः।

विदूषक इति। विदूषको ब्रूते। कः पुमान्, देवतारहस्यानि - देवमर्माणि, तर्कयिष्यति - ऊहिष्यते, न कोपि तर्कयिष्यतीत्यर्थः।

प्रविश्य कञ्चुकी - जयतु जयतु देवः, देव! च्यवनाश्रमात्कुमारं गृहीत्वा तापसी सम्प्राप्ता देवं द्रष्टुमिच्छति।

राजा - उभावप्यविलम्बं प्रवेशय।

कञ्चुकी - यदाज्ञापयति महाराजः (इति निष्क्रम्य चापहस्तेन कुमारेण तापस्या च सह प्रविश्य) **इतइतो भवती।**

(सर्वे परिक्रामन्ति)

विदूषकः - (विलोक्य) णंखुतत्तभवंखत्तिअकुमारो, जस्सएसोणा मङ्किदोगि-

~~~~~~

प्रविश्येति। कञ्चुकी प्रविश्य - राजनिकटं प्राप्य, प्राह। कथम्। देवः - महाराजः, जयतु - सर्वोत्कर्षेण वर्तताम्, आदरादिद्वरुक्तिः, देव - महाराज, तापसी - काचित्तापसाङ्गना, कुमारं गृहीत्वा - बालमादाय, च्यवनाश्रमात् - च्यवनाख्यस्य महर्षेस्तपोवनात्, सम्प्राप्ता - समागता सती, देवं - महाराजं, द्रष्टुमिच्छति - विलोकयितुं वाञ्छति।

राजेति। राजा प्राह। हे कञ्चुकिन्, उभौ - द्वावपि, तापसीं - कुमारं चेत्यर्थः, अविलम्बं - सत्वरं यथा तथा, प्रवेशय - मत्समीपं प्रापय।

कञ्चुकीति। कञ्चुकी। महाराजः - पुरूरवाः, यदाज्ञापयति - नियोजयति, तत्करोमीति वाक्यशेषः, इति - एवमुक्त्वा, निष्क्रम्य - निर्गत्य, चापहस्तेन - धनुस्सहितपाणिना, कुमारेण - बालकेन, तापस्या च सह - तापसाङ्गनया च समं, प्रविश्य - प्राप्य, वक्ति, भवती, इतइतः - अनेनानेन मार्गेण, आगच्छत्वित्यध्याहारः।

सर्व इति। सर्वे - बालकतापसी कञ्चुकिनः, परिक्रामन्ति - राजसमीपं गच्छन्ति।

विदूषक इति। विदूषकः। विलोक्य - वीक्ष्य, ब्रूते, ननु - राजन्, अयं,
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

द्धलक्खवेहि अद्धणाराओ, तधाहि भवदो बहुअणुकरेदि (**ननु खलु तत्रभवान् क्षत्रियकुमारः, यस्यैष नामाङ्कितो गृध्रलक्ष्यभेदी अर्धनाराचः, तथा हि भवतो बह्वनुकरोति**)।

राजा - स्यादेवम्, अतः खलु -

बाष्पायते निपतिता मम दृष्टिरस्मिन्
वात्सल्यबन्धिहृदयं वहति प्रसादम्।
सञ्जातवेपथुभिरुज्झितधैर्यवृत्ति-
रिच्छामि चैनमदयं परिरब्धुमङ्गैः॥ 9॥

कञ्चुकी - भवत्यत्र स्थीयताम् (तापसी कुमारेण स्थिता)।

तत्र भवान् - पूज्यः, क्षत्रियकुमारः खलु - राजपुत्र एव, यस्य, एषः - असौ, अर्धनाराचः - बाणखण्डः, नामाङ्कितः - लिखितनामाक्षरस्सन्, गृध्रलक्ष्यभेदी - गृध्ररूपशरव्यवेधी अभूदिति शेषः, तथाहि - तेनैव प्रकारेण, भवतः - भवन्तमित्यर्थः, सम्बन्धसामान्ये षष्ठी, बहु - अधिकम्, अनुकरोति - अनुसरति।

राजेति। राजा प्राह। एवमनेन प्रकारेण, स्यात् - भवेत्, सम्भावनायां लिङ्, अतः खलु - अस्मादेव हेतोः, बाष्पायत इति। मम दृष्टिः - विलोकनम्, अस्मिन्बालके, निपतिता - प्रसृता सती, बाष्पायते - अश्रुणा आकुली भवति, हृदयं - मानसं, वात्सल्यबन्धि - स्नेहयुक्तं सत्, प्रसादं - प्रसन्नतां, वहति - बिभर्ति, अहम्, उज्झितधैर्यवृत्तिः - त्यक्तधैर्यव्यापारस्सन्, सञ्जातवेपथुभिः - कम्पमानैः, अङ्गैः - अवयवैः, एनं - कुमारम्, अदयं - गाढमिति भावः, परिरब्धुम् - आलिङ्गितुं च, इच्छामि - वाञ्छामि।

कञ्चुकीति। कञ्चुकी वक्ति। भवति - पूज्ये तापसि, अत्र - अस्मिन्प्रदेशे, स्थीयताम् - आस्यताम्, त्वयेति शेषः, तापसी - तापसाङ्गना, कुमारेण - बालकेन समं, स्थिता - उषिता।

In Public domain. Digitization: Mahalakshmi Research Academy

राजा - **भगवत्यभिवादये।**

तापसी - महाराअ! सोमवंसवित्थार इत्तओहोहि, (आत्मगतम्) अहो! अणाचक्खिदोवि विण्णादो इमस्सरा एसिणो पुरूरवसो आउसो अउरसोसम्बन्धो (प्रकाशम्) जाद! पणमदेगुरुं (**महाराज! सोमवंश-विस्तारयितृको भव ... अहो! अनाख्यातोऽपि विज्ञातोऽस्य राजर्षेः पुरूरवस आयुष औरसस्सम्बन्धः .. जात! प्रणमते गुरुम्**)।

(कुमारः चापगर्भमञ्जलिं करोति)

राजा - **आयुष्मान् भव।**

कुमारः - (स्पर्शं रूपयित्वा आत्मगतम्)

राजेति। राजा प्राह। हे भगवति - पूज्ये, अहम्, अभिवादये - नमस्कुर्वे।

तापसीति। तापसी वक्ति। हे महाराज - पुरूरवः, त्वं, सोमवंशविस्तार-यितृको भव - चन्द्रकुलाभिवृद्धिकरो भूयाः, आत्मगतं - स्वगतम्, अस्य - एतस्य, राजर्षेः - नृपशेष्ठस्य, पुरूरवसः, आयुषः - एतन्नाम्नः कुमारस्य च, औरस-स्सम्बन्धः - जन्यजनकभावरूपानुबन्धः, अनाख्यातः - अकथितोऽपि, विज्ञातः-विदितः, अहो - आश्चर्यम्, प्रकाशम् - सर्वश्राव्यम्, पुनर्वदति, हे जात - कुमार, ते - तव, गुरुं - पितरं, प्रणम - वन्दस्व।

कुमार इति। कुमारः - बालकः, चापगर्भम् - अन्तस्थितकार्मुकम्, अञ्जलिं करोति - पाणिद्वयं संयुक्तं विदधातीत्यर्थः।

राजेति। राजा प्राह। हे वत्स - त्वम्, आयुष्मान् भव - चिरञ्जीव।

कुमार इति। कुमारः - बालकः, स्पर्शं - स्पर्शसुखं, रूपयित्वा - अभिनीय, आत्मगतं - स्वगतम् आलोचयति। यदिति। अयं - राजा, मम, पिता - जनकः, अहम्, अस्य - राज्ञः, सुतः - पुत्रः, इति - एवं प्रकारेण,

In Public domain. Digitization Muthulakshmi Research Academy

यदिदं हार्दं श्रुत्वा पिता ममायं सुतोऽहमस्येति।
उत्सङ्गवर्धितानां गुरुषु भवेत्कीदृशस्स्नेहः ।। 10 ।।

राजा - भगवति! किमागमनप्रयोजनम्?।

तापसी - सुणोदुमहाराओ, एसोदीहा ऊआऊजादमेत्तोज्ञेव्व उव्वसी एकिम्पि-णिमित्तं पेक्खि अमहहत्थेणासीकिदो, जंखत्ति अकुमार स्सजाद-कम्मादिविहाणंतं सेभ अवदाचवणेण असेसं अणुट्ठिदं, गहीदविज्ञो, धणुव्वेदे अअहिविणीदो (**श्रृणोतु महाराजः, एष दीर्घायुरायुर्जात-मात्र एव ऊर्वश्या किमपि निमित्तं दृष्ट्वा मम हस्ते न्यासीकृतः, यत्क्षत्त्रियकुमारस्य जातकर्मादिविधानं तदस्य भगवता च्यवने-नाशेषमनुष्ठितम्, गृहीतविद्यो धनुर्वेदे च अभिविनीतः)।**

राजा - सनाथः खलु संवृत्तः।

श्रुत्वा - आकर्ण्यैव, यद्यस्मात्कारणात्, इदम् - ईदृशं, हार्दं - प्रेम, भवतीति शेषः, तस्मात्, उत्सङ्गवर्धितानाम् - अङ्कपरिपोषितानां, बालानामिति शेषः, गुरुषु - पितृषु, कीदृशः - कीदृक्, स्नेहः - प्रेमा, भवेत् - स्यादिति सम्भावयामि।

राजेति। राजा प्राह। हे भगवति - पूज्ये तापसि, आगमनप्रयोजनम्-आगमनकारणं, किं - किं स्वरूपं, वदेति शेषः ।

तापसीति। तापसी वक्ति। महाराजः - पुरूरवाः, श्रृणोतु - आकर्णयतु, मदागमनकारणमिति शेषः, दीर्घायुः - चिरजीवी, एष पुरोवर्ती, आयुः - आयु-र्नामको बालकः, ऊर्वश्या - एतन्नामकदेवकान्तया, किमपि निमित्तं - कं वा हेतुं, दृष्ट्वा - आलोच्य, मम, हस्ते - करे, न्यासीकृतः - उपनिधित्वेन दत्तः, क्षत्त्रियकुमारस्य - राजकुमारस्य, यज्ञातकर्मादिविधानं - जातकर्मप्रभृतिसंस्का-रानुष्ठानं, वर्तत इति शेषः। तदशेषं - तत्सर्वं, भगवता - पूज्येन, च्यवनेन -

In Public domain. Digitization Mahalakshmi Research Academy

तापसी - अज्जपुप्फसमिदत्थं इसि कुमारेहिं सहणिग्गदेण इमिणा अस्सम-विरुद्धं आअरिदं **(अद्य पुष्पसमिदर्थमृषिकुमारैस्सहनिर्गतेनानेनाश्रमविरुद्धमाचरितम्)**।

विदूषकः - (सावेगम्) किंविअ **(किमिव?)**।

तापसी - गहीदामिसोगिद्धोपादवसिह रेणिलीअमाणोणेणळ क्खीकिदोबाणस्स **(गृहीतामिषो गृध्रः पादपशिखरे निलीयमानोऽनेन लक्षीकृतो बाणस्य)**।

(विदूषको राजानमवलोकयति)

च्यवनाख्यमहर्षिणा, अस्य - आयुर्नामककुमारस्य, अनुष्ठितं - विहितम्, अनन्तर मयं बालकः, गृहीतविद्यः - स्वीकृतसाङ्गवेदादिविद्यः, धनुर्वेदे च, अभिविनीतः - सम्यक्शिक्षितः।

राजेति। राजा प्राह। सनाथः - सरक्षकः, संवृत्तः - जातःखलु, च्यवनेनेति शेषः।

तापसीति। तापसी कथयति। अद्येदानीं, पुष्पसमिदर्थं - कुसुमहोमेन्धनानयनार्थं, ऋषिकुमारैस्सह - मुनिपुत्रैस्साकं, निर्गतेन - वनं प्रति प्रस्थितेन, अनेन - बालकेन, आश्रमविरुद्धम् - मुन्याश्रमानर्हं कृत्यम्, आचरितं - कृतम्।

विदूषक इति। विदूषकः। सावेगं - सभयं ब्रवीति, किमिव - तत्किं वा स्यात्।

तापसीति। तापसी वदति। गृहीतामिषः - स्वीकृतमांसशकलः, गृध्रः - कश्चिच्चिल्लः, पादपशिखरे - वृक्षाग्रे, निलीयमानः - निविशमानः, अनेन - कुमारेण, बाणस्य - मार्गणस्य, लक्षीकृतः - विद्धः।

विदूषकः। राजानं - पुरूरवसम्, अवलोकयति - पश्यति।

In Public domain. Digitization Muthulakshmi Research Academy

राजा - ततस्ततः।

तापसी - तदोउअळद्धवुत्तन्तेण भअवदाचवणेण अहं समादिट्ठा, णिय्यावेहि देहत्थणित्थेवंति इच्छामि देविं उव्वसिं पेक्खिदुं **(तत उपलब्धवृत्तान्तेन भगवता च्यवनेन अहं समादिष्टा, निर्यापयते हस्तनिक्षेपमिति। इच्छामि देवीमूर्वशीं प्रेक्षितुम्)।**

राजा - तेन ह्यासनमनुगृह्णातु भवती।

(तापसी परिजनोपनीत आसन उपविशति)

राजा - लातव्य! **आहूयतामूर्वशी।**

कञ्चुकी - तथा करोमि (इति निष्क्रान्तः)।

राजेति। राजा प्राह। ततोऽनन्तरम्। आदराद्द्विरुक्तिः।

तापसीति। तापसी वक्ति। ततोऽनन्तरम्। उपलब्धवृत्तान्तेन - ज्ञातकुमारोदन्तेन, भगवता - कालत्रयवेदिना, च्यवनेन - च्यवनाख्यमुनिना, अहं, ते - तव, हस्तनिक्षेपं - हस्ते न्यासीकृतं कुमारं, निर्यापय - प्रत्यर्पय, इति - एवं प्रकारेण, समादिष्टा - आज्ञप्ता, तस्मात्, ऊर्वशीं - ऊर्वशीनाम्नीं, देवीं - देवकान्तां, प्रेक्षितुम् - अवलोकयितुम्, इच्छामि - वाञ्छामि।

राजेति। राजा प्राह। तेनहि - तस्माद्धेतोः, भवती, आसनं - पीठम्, अनुगृह्णातु - स्वीकरोत्वित्यर्थः।

तापसीति। तापसी। परिजनोपनीते - परिचारकानीते, आसने - पीठे, उपविशति - निषीदति।।

राजेति। राजा प्राह। हे लातव्य - लातव्याख्य कञ्चुकिन्, ऊर्वशी, आहूयताम् - आकार्यताम्, त्वयेति शेषः।

In Public domain. Digitization: Mahalakshmi Research Academy

राजा - (कुमारमवलोक्य) **एह्येहि वत्स**!

सर्वाङ्गीणस्पर्शस्सुतस्य किल तेन मामुपगतेन।
प्रह्लादयस्व तावच्चन्द्रकरश्चन्द्रकान्तमिव॥ 11॥

तापसी - जाद! आणन्देहि पितरं (**जात! आनन्दय पितरम्**)।

(कुमारः, राजानमुपगम्य, पादग्रहणं करोति)

राजा - (कुमारं परिष्वज्य पादपीठे चोपवेश्य) **वत्स! इतस्तव पितुः प्रियसखं ब्राह्मणमविशङ्कितो वन्दस्य।**

कञ्चुकीति। कञ्चुकी वक्ति। तथा - भवदाज्ञाप्रकारेण, करोमि - विदधामि, इति - एवमुक्त्वा, निष्क्रान्तः - निर्गतः।

राजेति। राजा - पुरूरवाः, कुमारं - पुत्रम्, अवलोक्य - वीक्ष्य, प्राह। हे वत्स - कुमार, एहि - आगच्छ, आदरादि्द्वरुक्तिः। सर्वाङ्गीण इति। सुतस्य - तनयस्य, स्पर्शः - सम्पर्कः, सर्वाङ्गीणः किल - समस्तशरीरव्यापी खलु, ''सू॥ तत्सर्वादेरित्यादिना व्याप्त्यर्थे खप्रत्ययः'', उपगतेन - सम्प्राप्तेन, तेन - स्पर्शेन, मां, चन्द्रकरः - इन्दुकिरणः, चन्द्रकान्तं - चन्द्रोपलमिव, तावदिदानीं, प्रह्लादयस्व - प्रकर्षेण तोषयस्व।

तापसीति। तापसी कथयति। हे जात - वत्स, पितरं - जनकम्, आनन्दय - सन्तोषय।

कुमार इति। कुमारः - पुत्रः, राजानमुपगम्य - राजसमीपं प्राप्य, पाद ग्रहणम् - अभिवादनम्, ''नि॥ समेतु पादग्रहणमभिवादनमित्युभे इत्यमरः'', करोति - विदधाति।

राजेति। राजा। कुमारम् - आत्मजं, परिष्वज्य - आलिङ्ग्य, पादपीठे-पीठस्य पुरोभागस्थिते आसने, उपवेश्य - निषण्णं कृत्वा च, प्राह, हे वत्स -

In Public domain. Digitization Muthulakshmi Research Academy

विदूषकः - किंतिमेसङ्किस्सदि, णंअस्समवासपरिइदा एव्वसे साहा मिआ **(किमिति शङ्किष्यते, नन्वाश्रमवासपरिचिता एवास्य शाखा-मृगाः)।**

कुमारः - (सस्मितम्) **तात! वन्दे।**

विदूषकः - सोद्धिभवदे **(स्वस्ति भवते)।**

(ततः प्रविशत्यूर्वशी कञ्चुकी च)

कञ्चुकी - **इतइतो देवी।**

ऊर्वशी - (पुत्रमवलोक्य) कोणुक्खुए सोनबाणासणोपादपीठे उअवेसिदो

कुमार, तव, पितुः - जनकस्य, प्रियसखं - प्रियसुहृदम्, इतः, अमुं, ब्राह्मणं - विप्रम्, अविशङ्कितः - शङ्कारहितस्सन्, वन्दस्य - अभिवादयस्व।

विदूषक इति। विदूषकस्सचमत्कारं ब्रूते। किमिति - किमर्थं, शङ्किष्यते - साध्वसमेष्यति, अस्य - कुमारस्य, शाखामृगाः - कपयः, आश्रमवासपरिचिता एव ननु - आश्रमवासेन - तपोवननिवासेन, परिचिताः - सम्यग्ज्ञाता एव खलु।

कुमार इति। कुमारः - आयुर्नामको बालकः, सस्मितं - समन्दहासं यथा तथा वदति, हे तात - जनकतुल्य विप्र, वन्दे - नमस्कुर्वे।

विदूषक इति। विदूषको वदति। भवते - तुभ्यं, स्वस्ति - शुभं, भवत्वित्यध्याहारः।

तत इति। ततोऽनन्तरम्, ऊर्वशी कञ्चुकी च, प्रविशति - रङ्गस्थलं प्राप्नोतीति प्रत्येकान्वयः।

कञ्चुकीति। कञ्चुकी वक्ति। देवी - ऊर्वशी, इतइतः - अनेनानेन मार्गेण, आगच्छत्विति शेषः, वीप्सायां द्विर्भावः।

महाराएण संजमिअमाणसिहण्डो चिट्ठदि (तापसीं दृष्ट्वा) अम्हो! सच्चवदीएसू इदोमेपुत्तओ आऊमहन्तोक्खुसंवुत्तो (सहर्षं परिक्रामति) **(कोनु खल्वेष स बाणासनः पादपीठ उपवेशितो महाराजेन संयम्यमान शिखण्डस्तिष्ठति? ... अहो सत्यवत्या सूचितो मे पुत्र आयुर्महान् खलु संवृत्तः)।**

राजा - (ऊर्वशीमवलोक्य) **वत्स!**

इयं ते जननी प्राप्ता त्वदालोकनतत्परा।
स्नेहप्रस्नवनिर्भिन्न मुद्वहन्ती स्तनां शुकम्।। 12।।

तापसी - ताद! पच्चुगच्छमादरं (तात! पत्युद्गच्छ मातरम्)।

ऊर्वशीति। ऊर्वशी। पुत्रं - कुमारम्, अवलोक्य - वीक्ष्य, वदति, एष बालकः, स बाणासनः - धनुष्पाणिस्सन्, महाराजेन - पुरूरवसा, पादपीठे - चरणसमीपवर्तिन्यासने, उपवेशितः - निषण्णः कृतः, किञ्च, संयम्यमानशिखण्डः - सम्यक्क्रियमाणचूडः, तिष्ठति - वर्तते, को नु खलु - को वा भवेत्, तापसीं दृष्ट्वा - अनन्तरं तापसस्त्रियं विलोक्य, कथयति, किमिति। मे - मम, पुत्रः - सुतः, आयुः - आयुर्नामक इति, सत्यवत्या - एतदाख्यया तापस्या, सूचितः - बोधितः, महान् - युववयस्कः, संवृत्तः खलु - जातो हि, अहो - आश्चर्यम्, इत्युक्त्वा, सहर्षं - सानन्दं, परिक्रामति - समीपं गच्छति।

राजेति। राजा। ऊर्वशीम्। अवलोक्य - वीक्ष्य, प्राह। हे वत्स - कुमार, इयमिति। इयमेषा। त्वदालोकनतत्परा - भवद्वीक्षणासक्ता, ते - तव, जननी - माता, स्नेहप्रस्नवनिर्भिन्नं - स्नेहः - पुत्रप्रेमा तस्मात्, यः प्रस्नवः - क्षीरस्रवणं तेन, निर्भिन्नं - शिथिलं, स्तनांशुकं - पयोधरपटम्, उद्वहन्ती - धारयन्ती सती, प्राप्ता - आगता।

In Public domain. Digitization Muthulakshmi Research Academy

(कुमार ऊर्वशीं प्रत्युद्गच्छति)

ऊर्वशी - अम्ब! पाअवन्दणं करेमि (अम्ब! पादवन्दनं करोमि)।

तापसी - वच्छे! भत्तुणो बहुमदा होहि (वत्से! भर्तुर्बहुमता भव)।

कुमारः - अम्ब! अभिवादये।

ऊर्वशी - (पुत्रमुन्नमितमुखं परिष्वज्य) वच्छ! पिदरं आराहइत्त ओहोहि (राजानमुपेत्य) जेदुजेदु महाराओ **(वत्स! पितरमाराधयितृको भव .... जयतु जयतु महाराजः)।**

तापसीति। तापसी ब्रवीति। हे तात - बालक, पुत्रादेस्तातेत्यामन्त्रणं लोकप्रसिद्धिः, मातरम् - त्वज्जननीं, प्रत्युद्गच्छ - प्रत्युद्याहि, मातरं प्रति किञ्चिद्दूरमभिमुखं गच्छेत्यर्थः।

कुमार इति। कुमारः - आयुर्नामकः पुत्रः, ऊर्वशीं, प्रत्युद्गच्छति - प्रत्युत्तिष्ठति।

ऊर्वशीति। ऊर्वशी वदति। हे अम्ब - मातस्सत्यवति, पादवन्दनं - चरणयोरभिवादनं, करोमि - विदधामि।

तापसीति। तापसी आशास्ते। हे वत्से - ऊर्वशि, भर्तुः - पत्युः, बहुमता - अभिमता, भव - एधि।

कुमार इति। कुमारो ब्रूते। हे अम्ब - जननि, अभिवादये - वन्दे।

ऊर्वशीति। ऊर्वशी। पुत्रं - कुमारम्, उन्नमितमुखम् - उद्गमिताननं, कृत्वेति शेषः, परिष्वज्य - आलिङ्ग्य, कथयति, हे वत्स - बालक, पितरं - जनकम्, आराधयितृकः - पूजादिभिस्तोषणशीलः, भव - एधि, राजानमुपेत्य - राजसमीपं प्राप्य, वदति, महाराजः - पुरूरवाः, जयतु - सर्वोत्कर्षेण वर्तताम्, आदरादि्द्वरुक्तिः।

In Public domain. Digitization Muthulakshmi Research Academy

राजा - **स्वागतं पुत्रवत्यै! इत आस्यताम्** (इत्यर्थासनं ददाति)।

ऊर्वशी - **अय्य! सव्वे उअविसम्ह** (आर्य! सर्वे उपविशामः)।

(सर्वे यथास्थानमुपविशन्ति)

तापसी - एसोगहीदविज्जो आऊसम्पदं कवअहरोसंवुत्तो, ताएद स्सदेभत्तुणो समक्खं णिय्यादिदोहत्थणिक्खेवो, तातुहत्तो अत्ताणं विशज्झिदुं इच्छामि, उवरुज्झदिमे आसमधम्मो (**एष गृहीतविद्य आयुस्साम्प्रतं कवच-धरस्संवृत्तः, तदेतस्य ते भर्तुस्समक्षं निर्यातितो हस्तनिक्षेपः, तत्त्वत्त आत्मानं विसर्जयितुमिच्छामि, उपरुध्य ते मे आश्रमधर्मः**)।

राजेति। राजा प्राह। पुत्रवत्यै - जातापत्यायै, स्वागतं - शुभागमनं किम्, इतः - अत्र, आस्यताम् - उपविश्यतां, त्वयेति शेषः, भावे लोट् इत्युक्त्वा, अर्थासनं - स्वपीठैकदेशम्, "सू।। अर्थं नपुंसकमित्येकदेशि समासः", ददाति - वितरति।

ऊर्वशीति। ऊर्वशी वदति। हे आर्य - महाराज, सर्वे - समस्ताः, वयमिति शेषः, उपविशामः - निषीदामः।

सर्व इति। सर्वे - राजादयः, यथास्थानं - स्वस्वस्थानानतिक्रमेण, उपविशन्ति - निषीदन्ति।

तापसीति। तापसी ब्रवीति। किमिति। गृहीतविद्यः - स्वीकृतवेदधनु-र्वेदादिविद्यः, आयुः - आयुर्नामकः, एषः - बालकः, साम्प्रतमिदानीं, कवच-धरः - वर्मधारणयोग्यवयस्कः, संवृत्तः - जातः, तत्तस्मात्, एतस्य - अस्य, ते-तव, भर्तुः - पत्युः पुरूरवसः, समक्षं - पुरतः, हन्तनिक्षेपः - मम हस्ते न्यासी कृत आयुः, निर्यातितः - प्रत्यर्पितः, तत्तस्मात्, त्वत्तः - भवत्यास्सकाशात्, आत्मानं - मां, विसर्जयितुं - मोचयितुम्, इच्छामि - अभिलषामि, कुत इति चेत्, मे - मम, आश्रमधर्मः - तपोधर्मः, उपरुध्यते - प्रतिबध्यते।

In Public domain. Digitization Muthulakshmi Research Academy

ऊर्वशी - चिरस्सअय्यं पेक्खिअविसण्णं हि अअं, किन्तु णजु ञ्जदिउण आस्समधम्मोणिरो हिदुं, ताअय्ये! गच्छ पुणोदं सणाअ (**चिरस्य आर्यं प्रेक्ष्य विषण्णं हृदयं, किन्तु न युज्यते पुनराश्रमधर्मो निरोधितुं, तदार्ये! गच्छ पुनर्दर्शनाय**)।

राजा - अम्ब! भगवते च्यवनाय मां प्रणिपातय।

तापसी - एवं होदु (**एवं भवतु**)।

कुमारः - आर्ये! यदि निवर्तसे मामप्याश्रमं नयस्व।

राजा - अयि वत्स! उषितं त्वया पूर्वस्मिन्नाश्रमे, द्वितीयमध्यासितुं तव समयः।

~~~~~~

ऊर्वशीति। ऊर्वशी वदति। आर्यां - पूज्यां, त्वां, चिरस्य - बहुकालस्य, प्रेक्ष्य - विलोक्य, हृदयं - मच्चित्तं, विषण्णं - भिन्नं, त्वां त्यक्तुमिति शेषः, किन्तु - परन्तु, आश्रमधर्मः पुनः - तपोधर्मस्तु, निरोधितुं - निवारयितुं, न युज्यते - न युक्तः, तत्तस्मात्, हे आर्ये - पूज्ये सत्यवति, पुनर्दर्शनाय - भूयो दर्शनं दातुं, गच्छ - प्रयाहि।

राजेति। राजा प्राह। हे अम्ब - मातृतुल्ये सत्यवति, भगवते - पूज्याय, च्यवनाय - च्यवनाख्यमुनये, मां, प्रणिपातय - वन्दनं कारय, तस्मै मत्प्रणिपातं वदेत्यर्थः।

तापसीति। तापसी वक्ति। एवं भवतु - इत्थमस्तु।

कुमार इति। कुमारः कथयति। हे आर्ये - पूज्ये, यदि निवर्तसे - पुनर्गच्छसि चेत्, आश्रमं - तपोवनं प्रति, मामपि, नयस्व - प्रापयस्व।

राजेति। राजा प्राह। अयि वत्स - हे कुमार, त्वया, पूर्वस्मिन्नाश्रमे -
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

तापसी - ताद! गुरुणोव अणं अणुचिट्ठ (**तात! गुरोर्वचनमनुतिष्ठ**)।

कुमारः - तेन हि -

यस्सुप्तवान्ममाङ्के शिखण्डकण्डूयनोपलब्धसुखः।
तं मे जातकलापं प्रेषय मणिकण्ठकं शिखिनम्॥ 13॥

तापसी - एवं करेमि, सोत्थिभवदुतुम्हाणं (इति निष्क्रान्ता) (**एवं करोमि, स्वस्ति भवतु युष्माकम्**)।

राजा - (ऊर्वशीं विलोकयन्) **कल्याणि**!

ब्रह्मचर्याश्रम इत्यर्थः, उषितं - स्थितम्, इदानीं तु, तव, द्वितीयं - गृहस्थाश्रमम्, अध्यासितुम् - अधिष्ठातुं, समयः - कालो हि, "सू॥ कालसमयवेलासु तुमुनिति तुमुन्प्रत्ययः"।

तापसीति। तापसी ब्रवीति। हे तात - बालक, गुरोः - जनकस्य, वचनं - वाक्यम्, अनुतिष्ठ - अनुवर्तस्व।

कुमार इति। कुमारः कथयति। हे आर्ये, तेन हि - तर्हि त्वं, गच्छसि चेदित्यर्थः, य इति। मम, अङ्के - उत्सङ्गे, यश्शिखी, शिखण्डकण्डूयनोपलब्धसुखः - शिखण्डस्य - पिञ्छस्य, कण्डूयनेन - विघर्षणेन, उपलब्धसुखः - प्राप्त शर्मासन्, सुप्तवान् - निद्रितः, जातकलापं - प्ररूढबर्हं, मणिकण्ठकं - नीलमणि सदृशकण्ठरुचिं, तं शिखिनं - मयूरं, मे - मह्यं, प्रेषय - प्रापय।

तापसीति। तापसी ब्रूते। हे वत्स, एवं - त्वदुक्तप्रकारेण, करोमि - विदधामि, युष्माकम् - युष्मभ्यं, स्वस्ति भवतु - कल्याणं भूयात्, इत्युक्त्वा, निष्क्रान्ता - निर्गता।

राजेति। राजा - पुरूरवाः, ऊर्वशीं विलोकयन् - पश्यन्, प्राह। हे

In Public domain: Digitization Muthulakshmi Research Academy

अहं हि पुत्रिणामग्र्यस्सत्पुत्रेणामुना तव।
पौलोमीसम्भवेनेव जयन्तेन पुरन्दरः ॥ 14 ॥

(ऊर्वशी स्मृत्वा, रोदिति)

विदूषकः - (सावेगम्) किंणुतत्त भोदी एक्कपदे अंसुमुहि संवृत्ता (**किन्तु तत्रभवती एकपदेऽश्रुमुखी संवृत्ता**)।

राजा - (सावेगम्)

किं सुन्दरि! प्ररुदितासि ममोपपन्ने
वंशस्थिते रथिगमान्महतिप्रमोदे।
पीनोन्नतस्तननिपातिभिरानयन्ती
मुक्तावली विरचनं पुनरुक्तमस्रैः ॥ 15 ॥

(बाष्पमस्याः प्रमार्ष्टि)।

कल्याणि - मङ्गलप्रदे, अहमिति। अमुना - अनेन, तव, सत्पुत्रेण - आयुर्नामकेन पुत्रसत्तमेन, अहं, पौलोमीसम्भवेन - शचीतनूजेन, जयन्तेन - जयन्ताख्येन पुत्रेण, पुरन्दरः - इन्द्र इव, पुत्रिणां - पुत्रवताम्, अग्र्यः - श्रेष्ठो हि।

ऊर्वशीति। ऊर्वशी, स्मृत्वा - कञ्चिद्विषयं संस्मृत्य, रोदिति - क्रन्दति।

विदूषक इति। विदूषकः, सावेगं - ससंभ्रमं यथा तथा वदति, तत्र भवती - पूज्या ऊर्वशी, एकपदे - आनन्दानुपदे, किंनु - केन वा हेतुना, अश्रुमुखी - बाष्पाकुलानना, संवृत्ता - जाता।

राजेत्यादि। राजा - पुरूरवाः, सावेगं - सत्वरं यथातथा प्राह। हे सुन्दरि - लावण्यवत्यूर्वशि, मम, वंशस्थितेः - अन्वयप्रतिष्ठायाः, अधिगमात् - प्राप्तेः, महति - उत्कृष्टे, प्रमोदे - सन्तोषे, उपपन्ने - सम्प्राप्ते सति, पीनोन्नतस्तन-निपातिभिः - अक्षीणौन्नत्यविशिष्टपयोधरच्युतैः, अस्रैः - बाणैः, पुनरुक्तं - द्विगुणं

In Public domain. Digitization Mahalakshmi Research Academy

ऊर्वशी - सुणोदु महाराओ, अहं पुढमं उणपुत्तमुहदं सणेणविसु मरिदम्हि, दाणिं महिन्दसंकित्तणेण सुमरामि (**श्रृणोतु महाराजः, अहं प्रथमं पुनः पुत्रमुखदर्शनेन विस्मृतास्मि, इदानीं महेन्द्रसङ्कीर्तनेन स्मरामि**)।

राजा - क इव?।

ऊर्वशी - अहंपुरा महाराअगदहि अआमहिन्देण आणत्ता (**अहं पुरा महाराजगतहृदया महेन्द्रेणाज्ञप्ता**)।

राजा - किमिति?।

ऊर्वशी - जदासोरा एसीतुइ समुप्पण्णस्सवं सङ्कुरस्स मुहं पेक्खि स्सदितदातु एभूओविमहसमीवं आअन्तव्वमिति, तदोमहारा अविरहभीरु आएम-

~~~~~~

यथातथा, मुक्तावलीविरचनं - तारहारशोभाम्, आनयन्ती - प्रापयन्ती सती, किं प्ररुदितासि - किमर्थं दुःखिता भवसि, तोषसमये किं व्यधाकारणमिति भावः, इत्युक्त्वा, अस्याः - ऊर्वश्याः, बाष्पं - नेत्रजलं, प्रमार्ष्टि - अपनयति।

ऊर्वशीति। ऊर्वशी वदति। महाराजः - पुरूरवाः, शृणोतु - आकर्णयतु, कारणं वच्मीति वाक्यशेषः, अहं, प्रथमं पुनः - पूर्वं तु, पुत्रमुखदर्शनेन - सुताननालोकनेन, विस्मृता - विस्मृतिं प्राप्ता, अस्मि - भवामि, इदानीमद्य, महेन्द्र सङ्कीर्तनेन - इन्द्रनामोच्चारणेन, स्मरामि - स्मरणं गतास्मि।

राजेति। राजा प्राह। क इव - स्मरणविषयः कीदृशो वा, कथयेति शेषः।

ऊर्वशीति। ऊर्वशी वदति। पुरा - पूर्वस्मिन् समये, महाराजगतहृदया - भवदासक्तचित्ता, अहं, महेन्द्रेण - सुरपतिना, आज्ञप्ता - आदिष्टा।

राजेति। राजा प्राह। किमिति - केन वा प्रकारेण, आज्ञप्तेत्यनुषज्यते।

ऊर्वशीति। ऊर्वशी कथयति। स प्रसिद्धः, राजर्षिः - राजश्रेष्ठः पुरूरवाः,
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

एजादमेत्तोज्ञेव्व एसोविज्ञाहि गमणिमित्तं भअवदो चवणस्स अस्समपदे अय्या एसच्चवदीएहत्थे अप्पआसंणिक्खित्तो, अज्ज पिदुणो आराहण-समत्थो संवुत्तो, कलअन्ती एताएणिज्ञादि दोदीहा ऊआऊ, ताएत्ति ओज्ञेव्व महमहराएणसहसंवासो (**यदा स राजर्षिस्त्वयि समुत्पन्नस्य वंशाङ्कुरस्य मुखं प्रेक्षिष्यते तदा त्वया भूयोऽपि मम समीप-मागन्तव्यमिति, ततो महाराज विरहभीरुकया मया जातमात्र एवैष विद्याधिगमनिमित्तं भगवतश्च्यवनस्याश्रमपदे आर्याया-स्सत्यवत्या हस्तेऽप्रयासं निक्षिप्तः, अद्य पितुराराधनसमर्थ-स्संवृत्तः, कलयन्त्या तया निर्यातितो दीर्घायुरायुः, तदेतावानेव मम महाराजेन सह संवासः**)।

यदा - यस्मिन् समये, त्वयि समुत्पन्नस्य - सञ्जातस्य, वंशाङ्कुरस्य - सन्ताना-ङ्कुरस्य, पुत्रस्येति यावत्, मुखमाननं, प्रेक्षिष्यते - अवलोकयिष्यति, तदा - तस्मिन् समये, त्वया, भूयः - पुनरपि, मम, समीपं - निकटम्, आगन्तव्यम् - आयातव्यम्, इति - एवं प्रकारेण, आज्ञप्तेति पूर्वेणान्वयः, ततोऽनन्तरं, महाराज विरहभीरुकया - महाराजेन - भवता सह, विरहभीरुकया - वियोगकातरया, मया, जातमात्रः - उत्पन्नमात्र एव, एष कुमारः, विद्याधिगमनिमित्तं - वेद-शास्त्रादिविद्यालाभार्थं, भगवतः - पूज्यस्य, च्यवनस्य - च्यवनाख्यस्य मुनेः, आश्रम पदे - तपोवने, आर्यायाः - पूजनीयायाः, सत्यवत्याः - एतदाख्यायास्तापस्याः, हस्ते - करे, अप्रयासम् - आश्रमं यथातथा, निक्षिप्तः - न्यासीकृतः, अद्येदानीं, पितुः - जनकस्य, आराधनसमर्थः - आराधने - परिचर्यया सन्तोषणे, समर्थः - शक्तः, संवृत्तः - जातः, एवं कलयन्त्या - जानन्त्या, तया - तापस्या, दीर्घायुः - चिरजीवी, आयुः - आयुर्नामा पुत्रः, निर्यातितः - प्रत्यर्पितः, तत्तस्मात्, मम, महाराजेन सह - भवता समं, संवासः - समागमः, एतावान् - इयत्परिमाण एव।

In Public domain. Digitization Mahalakshmi Research Academy

(सर्वे विषादं रूपयन्ति)

राजा - (सनिश्श्वासम्) अहो! **सुखप्रत्यर्थिता दैवस्य -**

अश्श्वासितस्य मम नाम सुतोपलब्ध्या

सद्यस्त्वया सह कृशोदरि विप्रयोगः।

व्यावर्तिता तपरुजः प्रथमाभ्रवृष्ट्या

वृक्षस्य वैद्युत इवाग्निरुपस्थितोऽयम् ।। 16 ।।

विदूषकः - अअंसोहणत्थो अणत्थाणुबन्धणो संवुत्तो सम्पदं तक्केमि तत्तभवदा-वक्कलं गेण्हिअ तवोवणं गन्तव्वन्ति **(अयं शोभनार्थोऽनर्थानुबन्धनस्संवृत्तस्साम्प्रतं तर्कयामि - तत्रभवता वल्कलं गृहीत्वा तपोवनं गन्तव्यमिति)।**

सर्व इति। सर्वे - राजादयः, विषादं - खेदं, रूपयन्ति - अभिनयन्ति।

राजेति। राजा - पुरूरवाः, सनिश्श्वासं - निश्श्वाससहितं, यथातथा प्राह, दैवस्य - विधेः, सुखप्रत्यर्थिता - शर्मप्रतिकूलता, भवतीति शेषः, अहो - आश्चर्यम्, आश्श्वासितस्येति। हे कृशोदरि - तनुमध्ये ऊर्वशि, सुतोपलब्ध्या - पुत्रप्राप्त्या, आश्वासितस्य - सुखितस्य, मम, सद्यः - तत्क्षण एव, त्वया सह - भवत्यासाकं, विप्रयोगो नाम - वियोगः किल, प्रथमाभ्रवृष्ट्या - मेघादिमवर्षेण, व्यावर्तितातपरुजः - निवर्तितग्रीष्मसन्तापस्य, वृक्षस्य - पादपस्य, वैद्युतः - विद्युत्सम्बन्धी, अग्निः - ज्वलन इव, अयमुपस्थितः - एष सम्प्राप्तः।

विदूषक इति। विदूषको वदति। हे राजन्। अयमेषः, शोभनार्थः - पुत्रसमागमरूपशुभारम्भः, साम्प्रतमिदानीम्, अनर्थानुबन्धनः - अनर्थावहः, संवृत्तः - जात इति, तर्कयामि - मन्ये, तत्रभवता - महाराजेन, वल्कलं - तपस्विजनोचितं चीरं, गृहीत्वा - धृत्वा, तपोवनम् - आश्रमं, गन्तव्यं - यातव्यमिति।

In Public domain. Digitization Muthulakshmi Research Academy

ऊर्वशी - मंविमन्दभाइ णिंकिद विनयस्सवुत्तस्सळाहाणन्दरं सग्गारोहणेण अवसिदकज्ञविसेसं महाराओ समत्थइस्सदि (**मामपि मन्दभाग्यां कृतविनयस्य पुत्रस्य लाभानन्तरं स्वर्गारोपणेन अवसितकार्य-विशेषां महाराजस्समर्थयिष्यति**)।

राजा - **सुन्दरि मामैवम्।**

नहि सुलभवियोगाकर्तुमात्मप्रियाणि
प्रभवतिपरवत्ता शासने तिष्ठ भर्तुः।
अहमपि तव सूना वायुषिन्यस्तराज्यो
विचरित मृगयूधान्याश्रयिष्ये वनानि।। 17।।

कुमारः - **नार्हति तातः पुङ्गवधार्यायां धुरिदम्यं नियोजयितुम्।**

ऊर्वशीति। ऊर्वशी वक्ति। महाराजः - पुरूरवाः, कृतविनयस्य - सर्व विद्याविनीतस्य, पुत्रस्य - आत्मजस्य, लाभानन्तरं - प्राप्त्यनन्तरम्, अवसित-कार्यविशेषां - समाप्ताशेषकृत्यां, मन्दभाग्यां - स्वल्पभागधेयां, मामपि, स्वर्गा-रोहणेन समर्थयिष्यति - समर्थित स्वर्गगमनां करिष्यतीत्यर्थः।

राजेति। राजा प्राह। हे सुन्दरि - ऊर्वशि, एवमनेन प्रकारेण, मामावा-दीरिति शेषः - वीप्सायां द्विर्भावः, नहीति। सुलभवियोगा - सुगमविरहा, परवत्ता - अन्याधीनता, आत्मप्रियाणि - स्वाभिलषितानि, कर्तुं - विधातुं, न प्रभवति हि - न समर्थं भवत्येव, अतः, भर्तुः - स्वामिनो महेन्द्रस्य, शासने - नियोगे, तिष्ठ - वस, त्रिदशालयं याहीत्याश्यः, अहमपि, तव, सूनौ - पुत्रे, आयुषि - आयुर्नामके कुमारे, न्यस्तराज्यः - निक्षिप्तराज्यभारस्सन्, विचरितमृगयूधानि - मृगकुलसञ्चार-विशिष्टानि, वनानि - तपोयोग्यकाननानि, आश्रयिष्ये - सेविष्ये।

कुमार इति। कुमारः कथयति। तातः - जनकः, पुङ्गवधार्यायां - महोक्ष-

राजा - अयि वत्स! मामैवम्

शमयति गजानन्यान् गन्धद्विपः कलभोऽपि सन्
भवति सुतरां वेगोदग्रं भुजङ्गशिशोर्विषम्।
भुवमधिपतिर्बाल्यावस्थोऽप्यलं परिरक्षितुं,
न खलु वयसा जात्यैवायं स्वकार्यसहोभरः ॥ 18 ॥

लातव्य! मद्वचनादमात्यपरिषदं ब्रूहि। सम्भ्रियतां कुमारस्यायुषो राज्याभिषेकः ।

कञ्चुकी - यदाज्ञापयति (इति सदुःखो निष्क्रान्तः)।

वाह्यायां, धुरि - धारे, दम्यं - वत्सतरं, नियोजयितुम् - आज्ञापयितुं, नार्हति - अर्हो न भवति।

राजेत्यादि। राजा प्राह। अयिवत्स - हे बालक, मामैवम् - इत्थं मावादीरित्यर्थः। कुतः। गन्धद्विपः - मदगजः, कलभः - शिशुस्सन्नपि, अन्यान् - इतरान्, गजान् - करिणः, शमयति - निवारयति, भुजङ्गशिशोः - सर्पकिशोरस्यापि, विषं - गरलं, सुतरामत्यन्तं, वेगोदग्रं - जवाधिकं, भवति - सम्पद्यते, अधिपतिः - राजा, बाल्यावस्थः - शैशवदशायुक्तोऽपि, भुवम् - अवनिं, परिरक्षितुं - परिपालयितुम्, अलं - समर्थः, अयम् - एषः, स्वकार्यसहः - आत्मकार्यनिर्वहणसमर्थः, भरः - भरणशक्तिः, वयसा - प्रायाधिक्येन, न खलु - न भवति हि, परन्तु, जात्यैव - जातेनैव, भवतीति शेषः इत्युक्त्वा कञ्चुकिनं प्राह। हे लातव्य - एतन्नामककञ्चुकिन्, त्वं, मद्वचनात् - मद्वाक्यं पुरस्कृत्य, अमात्यपरिषदं - सभास्थितं मन्त्रिवर्गं, ब्रूहि - वद। किमिति। आयुषः - आयुर्नामकस्य, कुमारस्य - आत्मजस्य, राज्याभिषेकः - राज्याभिषेचनिकोपकरणं, सम्भ्रियतां - सम्पाद्यताम्।

In Public domain. Digitization Muthulakshmi Research Academy

(सर्वे दृष्टिप्रतिघातं रूपयन्ति)

राजा - (आकाशमवलोक्य) **किन्नु खलु निरभ्रे विद्युत्सम्पात इव?।**

ऊर्वशी - (विलोक्य) अम्हहे! भअवं नारदो **(अहो! भगवान् नारदः)।**

राजा - अये! भगवान् नारदः, य एषः -

गोरोचनानिकषपिङ्गजटाकलाप-
स्संलक्ष्यते शशिकलामलवीतसूत्रः।
मुक्तागुणातिशयसंवृतमण्डनश्री-
र्हैमप्ररोह इव जङ्गमकल्पवृक्षः।। 19।।

आनयार्घ्यमस्मै।

कञ्चुकीति। कञ्चुकी वक्ति। यदाज्ञापयति - राजा यन्नियोजयति, तथा करोमीति वाक्यशेषः, इत्युक्त्वा, सदुःखः - व्यथा सहितस्सन्, निष्क्रान्तः - निर्गतः।

सर्व इति। सर्वे - तत्रस्थाः राजादयः, दृष्टिप्रतिघातम् - ईक्षणप्रतिबन्धं, रूपयन्ति - अभिनयन्ति।

राजेति। राजा - पुरूरवाः, आकाशम् - अम्बरं, विलोक्य - वीक्ष्य, प्राह। निरभ्रे - मेघरहिते आकाशे, विद्युत्सम्पातः - तटित्समुदाय इव, विद्योतत इति शेषः, किन्नु खलु - किं वा कारणं भवेत्, नुशब्दो वितर्के, ''नि।। नुपृच्छायां वितर्के चेत्यमरः''।

ऊर्वशीति। ऊर्वशी। विलोक्य - अन्तरिक्षमवलोक्य वदति, भगवान् - त्रिकालज्ञः, नारदः - नारदाख्यमुनिः, दृष्ट इति शेषः, अहो - आश्चर्यम्।

राजेति। राजा प्राह। अये - ऊर्वशि, अयं, भगवान् - पूज्यः, नारदः - नारदमुनिः, यः - एषः, गोरोचनेति। गोरोचनानिकषपिङ्गजटाकलापः - गोरोचना-

In Public domain. Digitization Muthulakshmi Research Academy

ऊर्वशी - (यथोक्तमादाय) इअंभ अवदोअरिहणा **(इयं भगवतोऽर्हणा)**।

(ततः प्रविशति नारदः)

नारदः - विजयतां मध्यमलोकपालः।

राजा - ऊर्वशी हस्तादर्घ्यमादाय भगवन्नभिवादये।

~~~~~~

निकषवत् - निकषोपलगतरोचनारेखावत्, पिङ्गः - पिशङ्गवर्णः, जटाकलापः - जटासमूहो यस्य स तथोक्तः, शशिकलामलवीतसूत्रः - शशिकलावत् - चन्द्र-किरणवत्, अमलं - स्वच्छं, वीतसूत्रं - यज्ञोपवीतं यस्य सः, अतएव, मुक्ता-गुणातिशयसंवृतमण्डनश्रीः - मुक्तागुणैः - मौक्तिकहारैः, अतिशयेन - अतीव, संवृता - प्रकाशिता, मण्डनश्रीः - अलङ्कारशोभा यस्य स तथोक्तः, हैमप्ररोहः - स्वर्णमयाङ्कुरः, जङ्गमकल्पवृक्षः - सञ्चरत्कल्पशाखीव, संलक्ष्यते - परिदृश्यते, अस्मै - एतस्मै नारदाय, अर्घ्यं - पूजाद्रव्यं, ''सू।। पादार्घाभ्यां चेति यत्प्रत्ययः'', आनय - उपहर।

ऊर्वशीति। ऊर्वशी। यथोक्तमादाय - राजाज्ञा प्रकारेणार्घ्यं स्वीकृत्य वदति, इयम् - एषा, भगवतो - नारदस्य, अर्हणा - सपर्या, ''नि।। पूजानमस्या-पचितिस्सपर्यार्चार्हणास्समा इत्यमरः'', स्वीक्रियतामित्यध्याहारः।

तत इति। ततोऽनन्तरं, नारदः - नारदमुनिः, प्रविशति - रङ्गस्थलं प्राप्नोति।

नारद इति। नारदो वदति। मध्यमलोकपालः - भूलोकपालकः पुरूरवाः, विजयतां - सर्वोत्कर्षेण वर्तताम्।

राजेति। राजा। ऊर्वशीहस्तात् - ऊर्वश्याः करात्, अर्घ्यं - पूजाद्रव्यम्, आदाय - गृहीत्वा, प्राह, हे भगवन् - स्वामिन्नारद, अभिवादये - अहं वन्दे।
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

ऊर्वशी - पणमामि (प्रणमामि)।

नारदः - अविरहितौ दम्पती भूयास्ताम्।

राजा - (जनान्तिकम्) **अपि नामैवं स्यात्**? (प्रकाशम्) **और्वशेयः पुत्रो वः प्रणमति।**

(कुमारः प्रणमति)

नारदः - आयुष्मानेधि।

राजा - भगवन्नयं विष्टरोऽनुगृह्यताम्।

(नारदस्तथोपविष्टः, सर्वे नारदमनूपविशन्ति)

ऊर्वशीति। ऊर्वशी वक्ति। हे स्वामिन्, प्रणमामि - अहं वन्दनं करोमि।

नारद इति। नारदः आशास्ते। दम्पती - जायापती, अविरहितौ - सङ्गतौ, भूयास्ताम् - सम्पद्येताम्।

राजेति। राजा - पुरूरवाः, जनान्तिकं - नियतश्राव्यम्, ऊर्वशीमात्र-श्राव्यं यथा तथा, प्राह, ऊर्वशि। एवं - मुन्युक्तप्रकारेण, स्यादपि नाम - भवेद्वा किम्, प्रकाशं - सर्वश्राव्यं यथा तथा, ब्रूते, हे भगवन्, और्वशेयः - ऊर्वश्या अपत्यं, ''सू।। स्त्रीभ्यो ढगिति ढक्प्रत्ययः'', पुत्रः - तनयः, वः - युष्मभ्यं, प्रणमति - नमस्करोति।

कुमार इति। कुमारः - बालकः, प्रणमति - नमस्यति, मुनय इति शेषः।

नारद इति। नारदः। आशिषं प्रयुङ्क्ते। आयुष्मानेधि - दीर्घायुर्भव।

राजेति। राजा प्राह। हे भगवन् - स्वामिन्, अयं विष्टरः - एतदासनम्, अनुगृह्यताम् - अभ्युपपद्यताम्।

नारद इति। नारदः - एतन्नामा महर्षिः, तथा - राजोक्तप्रकारेण,

In Public domain. Digitization Mahalakshmi Research Academy

नारदः - राजन्! श्रूयतां महेन्द्रसन्देशः।

राजा - अवहितोऽस्मि।

नारदः - प्रभावदर्शी मघवा भवन्तं वनगमनाय कृत बुद्धिमनुशास्ति।

राजा - किमाज्ञापयति?।

नारदः - त्रिकालदर्शिभिर्मुनिभिरादिष्टस्सुरासुरविमर्दोभावी, भवांश्च सांयुगीनस्सहायः, तेन त्वया शस्त्रं न संन्यसितव्यम्, इयं चोर्वशी यावदायुस्ते सह धर्मचारिणी भवत्विति।

~~~~~~

उपविष्टः - आसने निषण्णः, सर्वे - राजादयः, नारदमनु - नारदमुनिमनुसृत्य, उपविशन्ति - स्वस्वासनेषु निषीदन्ति।

नारद इति। नारदः कथयति। हे राजन्, महेन्द्रसन्देशः - देवेन्द्रवाचिकं, श्रूयताम् - आकर्ण्यताम्, त्वयेति शेषः।

राजेति। राजा प्राह। अवहितोऽस्मि - इन्द्रसन्देशश्रवणे सावधानो भवामि।

नारद इति। नारदो वदति। प्रभावदर्शी - सामर्थ्यविदी, मघवा - महेन्द्रः, वनगमनाय - अरण्ययानाय, कृतबुद्धिं - निश्चितमतिं, भवन्तं - त्वाम्, अनुशास्ति - आज्ञापयति।

राजेति। राजा प्राह। किमाज्ञापयति - इन्द्रो मां कस्मिन्नियोजयति।

नारद इति। नारदः कथयति। त्रिकालदर्शिभिः - कालत्रयवेदिभिः, मुनिभिः - महर्षिभिः, सुरासुरविमर्दः - देवराक्षससंग्रामः, भावी - भविष्यति, भवान् - त्वञ्च, सांयुगीनः - समरनिपुणः, सहायः - अनुचर इति, आदिष्टः - अभिहितः, तेन हेतुना, त्वया, शस्त्रम् - आयुधं, न संन्यसितव्यं - न परि-
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

ऊर्वशी - अम्हहे! सल्लं मे हि अआदो ओणीदंविअ (**अहो! शल्यं मे हृदयादपनीतमिव**)।

राजा - परवानस्मि देवेश्वरेण।

नारदः - युक्तम्,

त्वत्कार्यं वासवः कुर्यात्त्वं वा तस्येष्टमाचरेः।
सूर्यस्समेधयत्यग्निमग्निस्सूर्यं स्वतेजसा।। 20।।

(आकाशमवलोक्य) **रम्भे! उपनीयतां स्वयं महेन्द्रेण सम्भृतः कुमारस्यायुषो यौवराज्याभिषेकसम्भारः।**

~~~~~~

त्याज्यम्, इयम् - एषा, ऊर्वशी च, ते - तव, यावदायुः - यावज्जीवितकालं, सहधर्मचारिणी - त्वया सह धर्माचरणशीला, भवतु - भूयात्, इति - एवं प्रकारेण आज्ञापयतीति पूर्वेणान्वयः।

ऊर्वशीति। ऊर्वशी वदति। मे - मम, हृदयात् - मनसः, शल्यं - शङ्कुः, अवनीतम् - उद्धृतमिव, स्थितमिति शेषः।

राजेति। राजा प्राह। अहं, देवेश्वरेण - इन्द्रेण, परवान् - पराधीनः, अस्मि - भवामि, इन्द्राज्ञावशवर्त्यहमिति भावः।

नारद इति। नारदः। प्राह। युक्तं - परवानस्मीत्याद्युक्तिस्तवोचितैव, त्वदिति, वासवः - इन्द्रः, त्वत्कार्यं - तव प्रयोजनं, कुर्यात् - विदध्यात्, त्वं वा-त्वञ्च, तस्य - वासवस्य, इष्टम् - अभिलषितम्, आचरेः - कुर्याः, तथाहि, सूर्यः - रविः, अग्निं - पावकं, स्वतेजसा - आत्मीयदीप्त्या, समेधयति - वर्धयति, अग्निः - हुताशनः, सूर्यं - दिवाकरं, स्वतेजसा - स्वीयरुचा, समेधयति - प्रकाशयति, इत्युक्त्वा, आकाशमवलोक्य - गगनं वीक्ष्य, ब्रूते, हेरम्भे - तन्नामक देवकान्ते, महेन्द्रेण - देवेन्द्रेण, सम्भृतः - सञ्चितः, आयुषः - आयुर्नामकस्य,
~~~~~~

In Public domain. Digitization Mahalakshmi Research Academy

(प्रविष्टा यथोक्तहस्ता अप्सरसः)

अप्सरसः - अअंसेअहिसे असम्भारो (अयमस्याभिषेकसम्भारः)।

नारदः - उपवेश्यतामायुष्मान् भद्रपीठे।

रम्भा - इदोइदो वच्छ! (कुमारमुपवेशयति) **(इतइतो वत्स)।**

नारदः - (कुमारस्य शिरसि कलशमावर्ज्य) **रम्भे! निर्वर्त्यतामस्य शेषो विधिः।**

कुमारस्य - पुरूरवस्तनयस्य, यौवराज्याभिषेकसम्भारः - युवराजत्वाभिषेकोपकरण-सामग्री, उपनीयताम् - आनीयताम्, त्वयेति शेषः।

प्रविष्टा इति। अप्सरसः - रम्भादयः, यथोक्तहस्ताः - अभिषेकार्हवस्तु-ग्राहिण्यस्सत्यः, प्रविष्टाः - रङ्गस्थलं प्राप्ताः।

अप्सरस इति। अप्सरसः वदन्ति। अस्य - कुमारस्य, अभिषेकसम्भारः - यौवराज्याभिषेकवस्तुसमुदायः, अयम् - एषः, स्वीक्रियतामिति शेषः।

नारद इति। नारदो ब्रवीति। आयुष्मान् - चिरायुरायुः, भद्रपीठे - नृपासने, उपवेश्यतां - निषण्णः क्रियताम्।

रम्भेति। रम्भा वदति। हे वत्स - बालक, इत इतः - अनेनानेन मार्गेण, आगच्छेति शेषः, इत्युक्त्वा, कुमारं - बालकम्, उपवेशयति - उपविष्टं करोति, भद्रपीठ इति शेषः।

नारद इति। नारदः - एतन्नामा सुरमुनिः, कुमारस्य - आयुषः, शिरसि - मूर्ध्नि, कलशं - गङ्गोदकपूर्णपात्रम्, आवर्ज्य - आनम्य, कथयति, हे रम्भे - एतन्नामकदेवकान्ते, अस्य - कुमारस्य, शेषो विधिः - अवशिष्टकृत्यं, निर्वर्त्यतां - निष्पाद्यताम्, त्वयेति शेषः।

In Public domain. Digitization Muthulakshmi Research Academy

रम्भा - (यथोक्तं निर्वर्त्य) वच्छ! **पणमभअवन्तं पिदराअ (वत्स! प्रणम भगवन्तं पितरौ च)।**

(कुमारः, यथाक्रमं प्रणमति)

नारदः - स्वस्ति भवते।

राजा - कुलधुरन्धरो भव।

ऊर्वशी - पिदुणोआराहइत्त ओहोहि (पितुराराधयितृको भव)।

(नेपथ्ये वैतालिकौ)

प्रथमः - विजयतां युवराजः।

रम्भेति। रम्भा। यथोक्तं - नारदोक्तप्रकारेण, निर्वर्त्य - विधाय, ब्रूते, हे वत्स - कुमार, भगवन्तं - नारदमुनिं, पितरौ च - ऊर्वशीपुरूरवसावपि, प्रणम - अभिवादयस्व।

कुमार इति। कुमारः - आयुः, यथाक्रमं - रम्भोक्तक्रमानुसारेण, प्रणमति - वन्दते।

नारद इति। नारदः - आशास्ते, हे वत्स, भवते - तुभ्यं, स्वस्ति - शुभं, सर्वदा भवतु।

राजेति। राजा। आशिषं करोति। हे कुमार - त्वं, कुलधुरन्धरः - वंश-धौरेयः, भव - एधि।

ऊर्वशीति। ऊर्वशी आशीर्वादं करोति। हे तनय, पितुराराधयितृकः - पितृशुश्रूषापरः, भव - एधि।

नेपथ्य इति। नेपथ्ये - यवनिकाभ्यन्तरे, वैतालिकौ - स्तुतिपाठकौ वदत इति शेषः।

In Public domain. Digitization Muthulakshmi Research Academy

अमरमुनिरिवात्रिर्ब्रह्मणोऽत्रेरिवेन्दु-
बुंध इव शिशिरांशोर्बोधनस्येव देवः।
भव पितुरनुरूपस्त्वं गुणैर्लोककान्तै-
रतिशयिनि समस्तावंश एषाशिषस्ते ॥ 21 ॥

द्वितीयः -

तव पितरि पुरस्तादुन्नतानां स्थितेऽस्मिन्
स्थितिमति च विभक्ता त्वय्यनाकम्प्यधैर्ये।
अधिकतरमिदानीं राजते राजलक्ष्मी-
र्हिमवति जलधौ च व्यस्ततोयेव गङ्गा ॥ 22 ॥

प्रथम इति। प्रथमः - वैतालिकयोराद्यः, ब्रूते। युवराजः - आयुर्नामकः कुमारः, विजयतां - सर्वोत्कर्षेण वर्तताम्, अमरमुनिरिति। ब्रह्मणः - स्रष्टुः, अत्रिः - अत्रिनामकः, अमरमुनिः - देवर्षिरिव, अत्रेः - अत्रिमुनेः, इन्दुः - चन्द्र इव, शिशिरांशोः - इन्दोः, बुधः - सौम्य इव, बोधनस्य - बुधस्य, देवः - राजा पुरूरवा इव, पितुः - जनकस्य पुरूरवसः, त्वं, लोककान्तैः - जनमनोहरैः, गुणैः - शौर्यौदार्यादिभिः, अनुरूपः - सदृशः, भव - एधि, अतिशयिनि - सर्वोत्कृष्टे, ते - तव, वंशे - अन्वये, समस्ताः - सर्वा एव, आशिषः - शुभाशंसाः, भवन्त्विति शेषः।

द्वितीय इति। द्वितीयः - तयोर्द्वितीयः। ब्रवीति। तवेति। उन्नतानां - महात्मनां, पुरस्तात् - अग्रे, स्थिते - निविष्टे, अस्मिन् - एतस्मिन्, तव, पितरि - जनके, स्थितिमति - लोकमर्यादाप्रवर्तके, तथा, अनाकम्प्यधैर्ये - अचलित-धैर्यशालिनि, त्वयि च, विभक्ता - विभिन्ना सती, राजलक्ष्मीः - नृपश्रीः, इदानीमद्य, अधिकतरं - सर्वातिशयेन, हिमवति - हिमालये, जलधौ - समुद्रे च, व्यस्ततोया - विभक्तजला, गङ्गा - भागीरथीव, राजते - भासते।

In Public domain. Digitization Muthulakshmi Research Academy

अप्सरसः - (ऊर्वशीं विलोक्य) दिटिआतुमं पुत्तअस्सजोव्वरज्ज सिरिएभत्तुणो अविरहेण अवड्ढसि **(दिष्ट्या त्वं पुत्रकस्य यौवराज्यश्रिया भर्तुर-विरहेण च वर्धसे)।**

ऊर्वशी - णंखुसाहारणो एव्वणोएसोअब्भुदओ **(ननु खलु साधारण एव न एषोऽभ्युदयः)।**

रम्भा - (कुमारं हस्ते गृहीत्वा) वच्छ! एहि जेट्ठमादरं अहिना देहि **(वत्स! एहि ज्येष्ठमातरमभिवादय)।**

(कुमारः प्रतिष्ठते)

राजा - तिष्ठ, सममेव तत्र भवत्यास्समीपं यास्यामस्तावत्।

अप्सरस इति। अप्सरसः - रम्भादयः, ऊर्वशीं, विलोक्य - वीक्ष्य, वदन्ति, हे सखि, त्वं, पुत्रकस्य - आत्मजस्य, यौवराज्यश्रिया - युवराजत्वलक्ष्म्या, भर्तुः - पत्युः, अविरहेण - अवियोगेन च, दिष्ट्या - दैवात्, वर्धसे - समेधसे।

ऊर्वशीति। ऊर्वशी वदति। नन्वप्सरसः, नः - अस्माकम्, एषः - अयम्, अभ्युदयः - अभिवृद्धिः, साधारणः - समान एव खलु।

रम्भेति। रम्भा। कुमारं - बालकं, हस्ते गृहीत्वा - करे स्वीकृत्य, वक्ति, हे वत्स - कुमार, त्वम्, एहि - आगच्छ, ज्येष्ठमातरं - पट्टमहिषीम्, अभिवादय - वन्दस्व।

कुमार इति। कुमारः - आयुः, प्रतिष्ठते - प्रयाति, "सू।। ......समव-प्रविभ्यस्थ इत्यात्मनेपदम्"।

राजेति। राजा प्राह। हे कुमार, तिष्ठ - वर्तस्व, समं - सैव, तत्र भवत्याः - पूज्यायास्त्वज्ज्येष्ठमातुः, समीपं - सकाशं, तावदिदानीं, यास्यामः - गमिष्यामः।

In Public domain. Digitization Muthulakshmi Research Academy

नारदः - अधुनास्य,

आयुषो यौवराज्यश्रीस्स्मारयत्यात्मजस्य ते।
अभिषिक्तं महासेनं सैनापत्ये मरुत्वता ॥ 23 ॥

राजा - एवमनुगृहीतो मघवता कथमसौ न योग्यो भविष्यति।

नारदः - किं ते भूयः पाकशासनः प्रियं करोतु।

राजा - किमतः परमपि प्रियमस्ति, यदि भगवान् प्रसन्नः। तथापीदमस्तु भरतवाक्यम् -

~~~~~~

नारद इति। नारदो ब्रूते। अधुना - इदानीं, ते - तव, आत्मजस्य - पुत्रस्य, आयुषः - आयुर्नामकस्य, अस्य - कुमारस्य, यौवराज्यश्रीः - युवराजभावलक्ष्मीः, मरुत्वता - इन्द्रेण, सैनापत्ये - देवचमूनायकत्वे, ''सू॥ पत्यन्तपुरोहितादिभ्यो यगिति यक्प्रत्ययः'', अभिषिक्तं - पट्टाभिषिक्तं, महासेनं - कुमारस्वामिनं, स्मारयति - स्मृतिविषयं करोति।

राजेति। राजा प्राह। हे मुने, मघवता - इन्द्रेण, एवमनेन प्रकारेण, अनुगृहीतः - अभ्युपपन्नः, असौ - कुमारः, कथं - कुतः, योग्यो न भविष्यति - अर्हो न सम्पत्स्यत इति काकुः।

नारद इति। नारदो ब्रवीति। हे राजन्, पाकशासनः - देवेन्द्रः, ते - तव, भूयः - पुनः, किं प्रियं - किं वा ईप्सितं, करोतु - विदधातु, वदेति शेषः।

राजेति। राजा प्राह। हे मुने, भगवान् - इन्द्रः, यदि प्रसन्नः - अनुग्रहयुक्तो भवति चेत्, अतःपरम् - इन्द्रप्रसादादप्यधिकं, प्रियम् - अभीष्टं, किमस्ति - किं वा विद्यते।

तथेत्यादि। तथापि अस्माकं सर्वेष्टसिद्धावपि। इदं - वक्ष्यमाणप्रकारकं,
~~~~~~

In Public domain. Digitization Muthulakshmi Research Academy

परस्परविरोधिन्योरेकसंश्रयदुर्लभम्।
सङ्गतं श्रीसरस्वत्योर्भूतयेऽस्तु सदा सताम् ॥ 24 ॥

(इति निष्क्रान्तास्सर्वे)

॥ इति श्रीकालिदासमहाकविप्रणीते
विक्रमोर्वशीयनामनाटके पञ्चमोऽङ्कः॥

॥ श्रीरस्तु ॥

भरतवाक्यं - मङ्गलाचरणरूपं नटवचनम्, अस्तु - भवतु, सतां - सत्पुरुषाणां, सदा भूतये - सन्तताभिवृद्धये, परस्परविरोधिन्योः - इतरेतरभिन्नाधिकरणवृत्तित्व-शीलयोः, श्रीसरस्वत्योः - लक्ष्मीवाण्योः, एकसंश्रयदुर्लभम् - एकसंश्रये - एकाधि करणे, दुर्लभं - दुर्घटं, सङ्गतं - मेलनम्, अस्तु - भूयात्, सज्जनास्सर्वैश्वर्ययुक्ता भवन्त्विति भावः।

॥ इति श्रीसङ्गमवलसराजधान्यधिवासीश्वरी रमणविश्वेश्वरचरणारविन्द-
मकरन्दास्वादनतुन्दिलेन्दिन्दिरायमाणान्तरङ्गेण, निश्शङ्कवंशपयः
पारावारराकासुधाकरेण, दामोदरगोत्रपवित्रविचित्रचरित्रेण,
श्रीमद्वेङ्कटनिश्शङ्कमहीपालपौत्रेण, श्रीपेद्दन्ननिश्शङ्कवसुधाधीशपुत्रेण,
श्रीसन्यासाम्बागर्भशुक्तिमुक्ताफलेन, संस्कृतादिभाषापञ्चक-
शास्त्रजन्यपरिज्ञानेन, श्रीमन्मृत्युञ्जयनिश्शङ्कक्षितिपालेन विरचिते
विक्रमोर्वशीयव्याख्याने रत्नदीपिकासमाख्याने पञ्चमोऽङ्कः॥

॥ समाप्तं विक्रमोर्वशीयं नाम सव्याख्यानं नाटकम् ॥

॥ मङ्गलं भूयात् ॥

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकानुक्रमणिका

	श्लो.सं.	पु.सं.
अग्रे यान्ति रथस्य रेणुवदमी	1.4	11
अग्रे स्त्री नखपाटलं	2.7	49
अङ्गमनङ्गक्लिष्टं सुखये	3.15	125
अचिरप्रभाविलसितैः पताकिना	4.72	190
अधिकं दूनमासकोदरितं	4.28	158
अनिर्देश्यसुखस्स्वर्गः कस्तं	3.17	128
अपि वनान्तरमल्पकुचान्तर	4.47	170
अपि दृष्टवानसि मम	4.59	178
अभिनवकुसुमस्तबकित	4.55	176
अयिमदकल! कलभोरू	4.44	167
अधस्सुरेन्द्रस्य कृतापराधान्	1.19	31
अनीशया शरीरस्य हृदयं	2.18	75
अनेन कल्याणिमृणालकोमलं	3.12	116
अनेन निर्भिन्नवपुस्सवध्यो	5.6	198
अनुपनतमनोरथस्य पूर्वं	3.21	133
अपराधीनामाहं प्रसीद	2.20	85
अमरमुनिरिवात्रिर्ब्रह्मणो	5.21	229
अयमचिरोद्गतपल्लवमुपनीतं	4.42	167
अयमेकपदे तया वियोगः	4.9	145
अयञ्च गगनात्कोऽपि	1.15	26

In Public domain. Digitization Muthulakshmi Research Academy

	श्लो.सं.	पु.सं.
अयं तस्या रथक्षोभादं	3.10	109
अवधूतप्रणिपाताः पश्चात्	3.5	97
अश्श्वासितस्य मम नाम	5.16	219
अस्यास्सर्गविधौ प्रजापति	1.9	18
असौ मुखालम्ब्तिहेम	5.2	194
अहं त्वां पृच्छामि आचक्ष्व	4.43	167
अहं हि पुत्रिणामग्र्यः	5.14	216
आत्मनो वधमाहर्ता	5.1	193
आदर्शनात्प्रविष्टा सा मे	2.2	40
आविर्भूते शशिनि तमसा	1.8	16
आविलपयोधराग्रं लवलीदल	5.8	201
आभरणस्याभरणं प्रसाधन	2.3	44
आभाति मणिविशेषो दूर	5.4	196
आयुषो यौवराज्यश्रीः	5.23	231
आरक्तराजिभिरियं कुसुमैः	4.14	149
आलोकयति पयोदान् प्रब्ल	4.17	151
इदमसुलभवस्तुप्रार्थना	2.6	47
इदं रुणद्धि पद्मं मामन्तः	4.38	164
इदं रुणद्धि पद्मं मामन्तः	4.39	164
इयं ते जननी प्राप्ता	5.12	211
उत्कीर्णा इव वासयष्टिषु	3.2	94
उदयगूढशशाङ्कमरीचि	3.6	99
उष्णालुश्शिशिरे निषीदति	2.22	87
ऊर्वशीसम्भवस्यायमैल	5.7	200

In Public domain. Digitized by Muthulakshmi Research Academy

	श्लो.सं.	पु.सं.
एकक्रमवर्धितगुरुतर	4.40	165
एतास्सुतनु मुखं ते	1.11	20
एषा मनो मे प्रसभं	1.20	32
कृष्णसारच्छविर्योऽसौ	4.56	176
कुपिता न तु कोपकारणं	4.25	156
कुत्र त्वया शिक्षितमेतत्	4.33	161
कार्यान्तरितोत्कण्ठं दिनं	3.4	95
खरखुरदारितमेदिनी को	4.46	169
गतं भयं भीरु! सुरारिसम्भवं	1.5	14
गन्धोन्मादितमधुकरगीतैः	4.11	147
गहनं गजेन्द्रनाथः प्रिय	4.5	142
गोरचना कुङ्कुमवर्णचक्र	4.35	162
गोरोचनानिकषपिङ्गजटा	5.19	222
गूढानूपुरशब्दमात्रमपि मे	3.14	123
जलधर संहर अत्र कोप	4.10	145
त्वत्कार्यं वासवः कुर्यात्त्वं	5.20	226
त्वयि निबद्धरतः प्रियवादिनः	4.53	174
त्वद्वियोगोद्भवे चण्डि मया	4.68	184
त्वां कामिनां मदनदूति	4.24	155
तन्वीमेघजलार्द्रपल्लवतया	4.65	182
तया वियुक्तस्य वने सुमध्यया	4.64	181
तरङ्गभ्रूभङ्गाक्षुभितविहग	4.50	172
तव पितरि पुरस्तादुन्नतानां	5.22	229
तुल्यानुरागपिशुनं ललितार्थ	2.13	66

In Public domain. Digitization Muthulakshmi Research Academy

	श्लो.सं.	पु.सं.
दयितारहितोऽधिकं दुःखितो	4.13	148
देव्याहं दत्त इति व्यापारं	3.16	127
दातुं वा प्रभवसि मामन्यस्मै	3.13	121
किं सुन्दरि! प्ररुदितासि	5.15	216
चिन्तादूनमानसिका	4.4	141
तिष्ठत्येकं क्षणमधिपति	2.1	39
तिष्ठेत्कोपवशात्प्रभाव	4.8	144
नितान्तकठिनां रुजं मम	2.11	61
निषिञ्चन्माधवीमेतां कौन्दीं	2.4	46
प्रियतमा विरहक्लान्तवदन	4.27	158
प्रियमाचरितं लते त्वया	1.18	31
प्रियवचनकृतोऽपि योषितां	2.21	86
प्रियसखीवियोगविमना	4.1	134
विविक्षुर्यदहं तूर्णमुद्यानं	2.5	47
विद्याधरकाननलीनको दुःख	4.22	154
विद्युल्लेखाकनकरुचिरं	4.12	147
सितांशुका मङ्गलमात्रभूषणा	3.11	113
न तथा नन्दयसि मां	2.14	68
न सुलभा सकलेन्दुमुखी	2.9	52
नहि सुलभवियोगाकर्तुमात्म	5.17	220
नीलकण्ठहरोत्कण्ठां वने	4.20	152
ननु वज्रिण एव वीर्य	1.17	28
नवजलधरस्सन्नद्धोऽयं	4.6	143
नद्या इव प्रवाहो विषम	3.8	102

In Public domain. Digitization Muthulakshmi Research Academy

	श्लो.सं.	पु.सं.
पद्भ्यां स्पृशेद्वसुमतीं यदि	4.15	149
परिजनवनिताकरार्पिताभिः	3.3	94
पर्युत्सुकां कथयसि प्रिय	2.15	69
पश्चात्सरः प्रतिगमिष्यसि	4.30	159
परभृते मधुरप्रलापिनि	4.23	155
परस्परविरोधिन्योरेकसंश्रय	5.24	232
पादास्त एव शशिनस्सुखयन्ति	3.19	130
पुरा नारायणेनेय	1.16	27
पूर्वदिक्पवनाहतकल्लोलोद्गत	4.52	173
प्रणयिनी ब्धाशार्दितकः	4.61	180
प्रणयिषु वा दाक्षिण्यादथवा	प्रस्तावना	5
प्रणयिषु वा दाक्षिण्यादथवा	प्रस्तावना	6
प्रभापल्लवितेनासौ विभाति	5.3	196
प्रभालेपी नायं हरिहत	4.60	179
प्रसीद प्रियतमे सुन्दरिके	4.51	173
प्राप्तसहचरीसङ्गकः पुलक	4.73	191
बर्हिणप्रभो! त्वामभ्यर्थये	4.19	152
बष्पायते निपतिता मम	5.9	204
भवतु विदितमेतन्मत्प्रिया	4.21	153
मेघश्यामादिशो दृष्ट्वा	4.29	159
मधुकर! मदिराक्ष्याश्शंस	4.41	165
मन्दारकुसुमदाम्ना	1.6	15
मन्दारपुष्पैरधिवासितायां	4.62	180

In Public domain. Digitization Muthulakshmi Research Academy

	श्लो.सं.	पु.सं.
मम कुसुमितास्वपि सखे	2.8	51
मर्मररणितमनोहरके	4.34	162
मया ज्ञातं मृगलोचनीं	4.7	143
मया नाम जितं यस्मात्	2.16	71
मयूरपरभृतहं सरथाङ्गम्	4.69	185
महदपि परदुःखं शीतलं	4.26	156
मामाहुः पृथिवीभृतामधिपतिं	4.45	168
मुनिना भरतेन यः प्रयोगो	2.17	72
मुञ्चति न तावदस्याः	1.7	15
यदेवोवनतं दुःखात्सुखं	3.20	131
यदयं रथसंक्षोभा	1.12	22
यदि हंसगता न ते नतभ्रूः	4.31	160
यदिदं रथसंक्षोभा	1.13	23
यदिदं हार्दं श्रुत्वा पिता	5.10	206
यस्सुप्तवान्ममाङ्के शिखण्ड	5.13	215
यद्दच्छया त्वं सकृद...	1.10	19
यावत्पुनरियं सुभ्रूरु	1.14	24
रक्तकदम्ब्स्सोयं प्रियया	4.54	175
रत्नमितिमेन तस्मिन् मणौ	5.5	197
रथाङ्गनामन्! वियुतो	4.35	163
रतिखेदसुप्तमपि मां शयने	4.70	188
रविमावसते सतां क्रियायै	3.7	100
लते! प्रेक्षस्व भिन्नहृदयो	4.66	183

In Public domain. Digitized by Muthulakshmi Research Academy

	श्लो.सं.	पु.सं.
वचोभिराशाजननैः	3.9	102
वेदान्तेषु यमाहुरेकपुरुषं	प्रस्तावना	1
वासार्थं हरसम्भृतं सुरभिणा	2.19	80
शमयति गजानन्यान् गन्ध	5.18	221
स्फुरताविच्छुरितमिदं रागेण	4.71	189
स्फटिकशिलातलनिर्मल	4.48	171
स्वस्यान्तिकमायान्ती	4.57	177
स्वामिन् सम्भाविता यथाहं	2.12	65
सङ्गमनीय इति मणिश्शैल	4.63	180
सम्प्राप्तविसूरणकस्त्वरितं	4.18	151
समर्थये यत्प्रथमं प्रियां प्रति	4.67	184
सरसि नलिनीपत्रेणापि	4.37	163
सर्वः कल्ये वयसि यतते	3.1	93
सर्वक्षितिभृतां नाथ	4.49	171
सर्वाङ्गीणस्पर्शस्सुतस्य	5.11	209
सहचरी दुःखालीढं	4.2	135
सहचरी दुःखालीढं	4.3	140
सामन्तमौलिमणिरञ्जितपाद	3.18	129
सुरसुन्दरीजघनभरालसा	4.58	177
सूर्याचन्द्रमसौ यस्य	4.36	163
हंसप्रयच्छमेकान्तां गतिः	4.32	161
हृतोष्ठरागैर्नयनोदबिन्दुभिः	4.16	150
हृदयमिषुभिः कामस्यान्त	2.10	60

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy



Urvashi and Pururavas

Sanskrit Academy
Adarsha Shodha Sansthan
(Recognised by Central Sanskrit University, New Delhi)
Osmania University Campus, Hyderabad – 500 007

ISBN 978-93-80171-67-8